रजतजयन्तीग्रन्थमाला - 1

वाल्मीकिरामायणं कम्बरामायणञ्च

(समीक्षात्मकं तुलनात्मकं संक्षिप्तकथावर्णनम्)

आद्याचरणझा

राष्ट्रिय-संस्कृत-संस्थानम्

पुस्तकमिदमादिकाव्यस्य वाल्मीकिरामायणस्य तमिलभाषायां निबद्धेन कम्बरामायणेन सह तोलनं संक्षेपेण कथावर्णनम् च विधाय, उभयोर्भावपक्षं कलापक्षञ्चाश्रित्य वैशिष्ट्यं, वैविध्यं वैभिन्न्यं च वैशद्येन सुबोधया भाषया प्रदर्शयति ।

रजतजयन्तीग्रन्थमाला - 1

वाल्मीकिरामायणं कम्बरामायणञ्च

(समीक्षात्मकं तुलनात्मकं संक्षिप्तकथावर्णनम्)

आद्याचरणझा

Sri Sankaracharya Sanskrit Mahavidyalaya
631
विद्या भवन, नई दिल्ली
28-1-98

राष्ट्रियसंस्कृतसंस्थानम्
ए-४०, राजा गार्डन, विशाल एन्क्लेव
नई दिल्ली-११००२७

प्रकाशकः
डॉ० कमलाकान्त मिश्रः,
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
४०-ए, राजागार्डन, विशालएन्क्लेव
नई दिल्ली-११००२७

© राष्ट्रिय-संस्कृत-संस्थानम्

रजतजयन्तीग्रन्थमाला-1

प्रथमसंस्करणम् १९९५

वि० सं० २०५२

मूल्यम् : रु० ५०/-

अमर प्रिंटिंग प्रेस
दिल्ली-११०००९
दूरभाष : ७२५२३६२

प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्यागमस्योद्घोषं परिदधत् स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं रजतजयन्तीवर्षं पूरयतीति विज्ञाय समेषां विदुषां संस्कृतानुरागिणाञ्च चेतोऽवश्यं मोमुद्येत।

प्राचीनशास्त्राणां ज्ञाननिधीनां संरक्षणे संवर्द्धने संस्कृतपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारणार्थं संस्थानस्यावदानं कियदित्यत्र संस्कृतलोक एव प्रमाणम्।

अस्मिन् रजतजयन्तीशुभावसरे राष्ट्रेऽस्मिन् नानाप्रान्तेषु विद्योतमानैः विद्वद्भिः विविधशास्त्रविषयानवलम्ब्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य सङ्ग्रथ्य रजतजयन्तीग्रन्थमालात्वेन तत्रभवतां समक्षं प्रस्तूयामन्दानन्दोऽनुभूयते।

तत्रेदं कुसुमं **वाल्मीकिरामायणं कम्बरामायणञ्च** राष्ट्रियैकतां संवर्द्धयद् आदिकाव्यस्य वाल्मीकिरामायणस्य तमिलभाषायां निबद्धस्य कम्बरामायणस्य च समीक्षां तुलनाञ्च विधायोभयत्र वैशिष्ट्यं वैभिन्न्यं च प्रस्तौति। ग्रन्थोऽयं सुविख्यातैः राष्ट्रपतिपुरस्कारसम्मानितैः सुधीमूर्धन्यैः **श्रीमदाद्याचरणझा**महाभागैर्महता श्रमेण व्यलेखीति तेभ्यो नामं नामं कृतज्ञताः निवेद्यन्ते।

ग्रन्थमालायाः आयोजनप्रकाशनादिकार्येषु बहुधोपकृतवन्तः अस्माकं सहयोगिनः विशेषतः डॉ॰ सवितापाठक-डॉ॰ रा॰ देवनाथन्-डॉ॰ रमेशकुमारपाण्डेयप्रभृतयः नितरां साधुवादार्हाः। अल्पीयसि च काले ग्रन्थममुं सम्मुद्र्य यथासमयं विमोचनाय च प्रस्तूय अस्माकं सङ्कल्पसिद्धौ विशिष्टसहयोगाय अमरमुद्रणालयस्याधिकारिणः धन्यवादार्हाः।

दिनाङ्कः ११.१०.१९९५
कार्तिककृष्णतृतीया, २०५२

कमलाकान्तमिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
नवदेहली

पुरोवाक्

भारतशासनस्य राष्ट्रिय-संस्कृत-संस्थान-निदेशकस्य २०.४.९५ दिवसीय-४९२ पत्राङ्कानुसारं **वाल्मीकिरामायणं-कम्बरामायणञ्च** (समीक्षात्मकं तुलनात्मकं संक्षिप्तकथावर्णनं) विलिख्य निर्धारितसमयात्पूर्वमेव स्वकीयविस्तृतनिबन्धं समर्पितवान्।

संस्थानस्य रजतजयन्तीवर्ष-यज्ञ-समावर्तनपावनावसरे विद्वन्मूर्धन्यानां विभिन्न-शास्त्रीयविषयात्मकनिबन्धानां संक्षिप्तपुस्तकाकारप्रकाशनशुभसङ्कल्पः वर्तमानसुयोग्यकर्मठनिदेशकस्य डॉ. कमलाकान्तमिश्रमहोदयस्य दूरदृष्टिं गरिमाणं च द्योतयति, नात्र कश्चन संशयः।

कार्यमिदमतिदुष्करं श्रमसाध्यं च। यतो हि चतुर्विंशतिसहस्रात्मक-पद्यमयमादिकाव्य—'वाल्मीकि-रामायण'-सागरे प्रविश्य सारमाहरणं तथैकादशसहस्रपद्यमये तमिल-कम्बरामायणरत्नाकरे च प्रविश्य रत्न-संग्रहकार्यं कीदृशमिति विद्वद्भिरवलोकनीयं स्वयमेव।

साहसिकेऽस्मिन् कार्ये केवलं 'राम-कृपा' बलेन प्रवृत्तोऽहं यथा सम्भवं यथामति च कथासारसंग्रहसमीक्षां च सम्पादितवान्। कथमिदं जातं न तत्र मया किमपि कथनीयमत्र तु रामकथामर्मज्ञानां मूर्धन्यविद्वद्वरेण्यानामेव सूक्ष्मेक्षणं प्रमाणं भवेत्।

"रामः" भारतीयभव्यभावनायाः भारतीयसंस्कृतेश्चोच्चप्रतीकः २८.५.९३ दिनाङ्के भारतगणतन्त्रस्य महामहिमशालिनो वर्तमानराष्ट्रपतेः वाक्यमिदं "भारत राम नाम के साथ जुड़ा हुआ है। भारत-राम दोनों अभिन्न शब्द जैसे हो गये हैं। (भाषणस्य ध्वन्यङ्कनादुद्धृतमिदम्) सूत्ररूपेणास्माभिर्ज्ञेयम्।

एतत्सन्दर्भे ममायं कठिनतमः प्रयासः "रामकथा श्रेयसी प्रेयसी" चेति तु निश्चितं प्रमाणयिष्यति, विश्वासेनानेन भगवन्तं ससीतरामं निकषात्मसमर्पणं करोमि ।

अस्मिन् निबन्धे प्रायः सन्धिदीर्घसमासरहितवाक्यानामेव प्रयोगः सरलतमसंस्कृतशैल्यां कृतः सामान्यसंस्कृतज्ञानवतामपि सैविध्याय ।

विदुषामनुगामी

आद्याचरणझा

विषय-सूची

प्राक्कथनम्		iii
पुरोवाक्		v
१.	पूर्वपीठिका	१
२.	वाल्मीकिरामायणम्—संक्षिप्तपरिचयः	३
३.	ग्रन्थस्य परिचयः	४
४.	वाल्मीकिपरिचयः	६
५.	राम-रामायणशब्दयोः गूढार्थः	९
६.	कम्बरामायणम्—संक्षिप्तपरिचयः	११
७.	वाल्मीकिरामायणे बालकाण्डस्य संक्षिप्तकथा	१४
८.	कम्बरामायणे बालकाण्डस्य संक्षिप्तकथा	३०
९.	वाल्मीकिकम्बरामायणयोः बालकाण्डे कथावर्णनवैशिष्ट्यम्	५०
१०.	वाल्मीकिरामायणे अयोध्याकाण्डम्	५१
११.	कम्बरामायणे अयोध्याकाण्डम्	५७
१२.	वाल्मीकिकम्बरामायणयोः अयोध्याकाण्डे कथावर्णनवैशिष्ट्यम्	६९
१३.	अरण्यकाण्डादुत्तरकाण्डपर्यन्तं वाल्मीकिरामायणस्य कथासंक्षेपः	७२
१४.	अरण्यकाण्डाद्युद्धकाण्डपर्यन्तं कम्बरामायणस्य कथासंक्षेपः	८४

पूर्वपीठिका

संस्कृतवाङ्मयेषु विशाल-"वाल्मीकिरामायणस्य" तथा भारतीयवाङ्मयेषु समृद्धतमिल-भाषायाः "कम्ब रामायणस्य" च संक्षिप्तप्रमुखकथा-वर्णनं कथाशैली-कथा- भेद-सहित-विवरणप्रदानमतिदुष्करम् इति तु घटे "सागर-निःक्षेप" समं विद्यते। यतो हि चतुर्विंशति-सहस्त्रसंख्यात्मकं पद्यमयं वाल्मीकिरामायणम्, एकादशसहस्त्रसंख्यात्मक- तमिल-पद्यमयं कम्बरामायणम्। उभावतिविशिष्टभाव-कला-भक्तिपक्षवर्णनात्मकौ विराजेते।

तथापि रामकथावर्णनप्रसंगे स्वकीयसश्रमाध्ययनक्रमे यथामति यथासम्भवं च उभयोः रामकथामहाकाव्ययोः कथासारं समीक्षात्मकं वर्णनं च संस्कृते सरलशैल्यां प्रदीयते।

अत्र विषयप्रवेशादिसहितं विवरणं प्रतिकाण्डस्य कथावर्णनेन साकं पृथग्रूपेण समाविष्टमस्ति। यथा वाल्मीकिरामायणस्य बालकाण्डकथा, तदनन्तरमेव कम्बरामायणस्य बालकाण्डकथा, तदग्रिमकाण्डानामपि तथैव विद्यते। एतेन द्वयोः रामकाव्ययोः घटनाचक्रादि- वर्णनं सहैव भवेत्, ज्ञातुं च शक्नुयात्।

वाल्मीकिरामायणम्—संक्षिप्तपरिचयः

रामकथाव्यापकता

"रामकथा" भारतीयजीवनपद्धतेः प्रमुखं महत्त्वपूर्णं विवरणम् । न केवलं भारते अपि तु समस्ते संसारे रामकथा सर्वव्यापिनी विद्यते । न कोऽपि भारतीयकविः कथाकारः रचनाकारो वा रामकथा-वर्णनं विना कविः भवितुं शक्नोति ।

यद्यपि ऋग्वेदादिमन्त्रेषु अपि रामकथायाः मूलाधारः प्राप्यते; किन्तु रामायणरूपेण समग्रां रामकथां सर्वप्रथमं "महर्षिः वाल्मीकिः" लिखितवान् । यस्य नाम "वाल्मीकिरामायणम्" वर्तते । इदं रामायणं विस्तृतं सर्वाङ्गपूर्णं विराजते । रामकथायाः व्यापकता अनेनैव रामायणेन प्रतिगृहं व्याप्ता । भारतीयवाङ्मयेषु विश्ववाङ्मयेषु च रामकथायाः मूलं स्रोतः "वाल्मीकिरामायणम्" एवास्ति न तत्र कश्चन मतभेदः ।

रामायणं भारतस्य रत्नाकरः । रामकथा तु समग्रजीवन-दर्शनम् एव । विभिन्नकथा- भागेषु जीवनयात्रायाः प्रशस्त-मार्ग-दर्शनं विद्यते । येन ऐहिकं पारलौकिकं च जीवनं सरलं सुकोमलं स्यात् ।

इदं तु प्रथममेव जानन्तु यद् ईश्वरस्य अवतारः रामः समस्तं मानवीयचरित्रं सामान्य- लौकिक इव करोति स्म येन वयं तं भगवन्तं रामचन्द्रं स्वजनमिव पश्यामः ।

ग्रन्थस्य परिचयः

इदं "वाल्मीकिरामायणं" भारतीयभाषासु विशालतमः ग्रन्थः। अत्र चतुर्विंशति- सहस्रपरिमिताः (२४०००) श्लोकाः सन्ति। तत्र "बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दर-युद्ध-उत्तरकाण्डानां संक्षिप्तसरलकथासारांशः निबन्धेऽस्मिन् वर्तते। यथास्थानं केषांचित् सन्दर्भ-पद्यानामुद्धरणमपि समाविष्टमस्ति; यानि पद्यानि सर्वथा महत्त्वपूर्णानि सन्ति। एभिः पद्यैः कथायाः प्रामाणिकता गुरुता च सिद्ध्यति।

प्रथममेवोक्तं यद् वाल्मीकिरामायणमेव रामकाव्यानां मूलाधारः। वाल्मीकिः प्रोक्तवान् यत् शतकोटि-रामायणानि सन्ति। तत्र शत-कोटि-रामायाणान्तर्गतमिदं रामायणम्। एतेन वयं रामकथायाः विशालतां व्यापकतां च ज्ञातुं शक्नुमः।

अद्यापि संस्कृतभाषासहितविभिन्नभारतीयभाषासु पाश्चात्त्य-भाषासु च कतिपय- सहस्ररामकाव्यानि समस्ते राष्ट्रे समुपलब्धानि सन्ति। एतेषां रामकाव्यानां मूलं तु "वाल्मीकि-रामायण" मेव। महर्षिः वाल्मीकिः साक्षाद् ब्रह्मणः आज्ञया एव लिखितवान्।

यथा—

तमुवाच ततो ब्रह्मा प्रहसन् मुनिपुंगवम्।
मच्छन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती॥
रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम।
धर्मात्मनो भगवतो लोके रामस्य धीमतः॥

बालकाण्डे २/३०,३२

अर्थात् सृष्टिकर्तुः ब्रह्मणः समादेशेन तस्य संकल्पादेव संपूर्णां रामकथां वाल्मीकिः सविस्तरं वर्णितवान्।

योगबलेन महर्षिः सकलां रामकथां साक्षात्कृत्य लिखितवान्।

यथा—

ततः पश्यति धर्मात्मा तत् सर्वं योगमास्थितः।
पुरा यत्तव निर्वृत्तं पाणावामलकं यथा॥

बालकाण्डे ३-४६

एवं स धर्मात्मा ऋषिः वाल्मीकिः रामकथां हस्तामलकवद् विधाय स्वयमपि भगवान् सञ्जातः। अत एव सः "भगवान् वाल्मीकिः" इति शब्देनापि ज्ञायते।

वाल्मीकिपरिचयः

कथं वाल्मीकेरुत्पत्तिः

वाल्मीकिः स्वकीयपरिचयं स्वयमेव उत्तरकाण्डे प्रदत्तवान्। "प्राचेतसोऽहं दशमः पुत्रो राघवनन्दन"। हे रामचन्द्र ! अहं प्रचेतसः = वरुणस्य दशमः पुत्रः अस्मि। प्रचेताः तु वसिष्ठपुलस्त्यादेः भ्राता आसीत्। अयं हि सुदीर्घकालपर्यन्तं तपः कृतवान्। अस्मिन् अवधौ तस्य शरीरोपरि वल्मीकाः (दीमक इति भाषायाम्) अच्छादितवन्तः। ब्रह्मणः आज्ञया वरुणः जलवर्षणेन तान् वल्मीकान् प्रक्षालितवान्। तस्मात् वल्मीकाद् अयं ऋषिः निर्गतः। तेनास्य नाम "वाल्मीकिः" इति सञ्जातः। वलमीकाद् भवः = जातः इति वाल्मीकिः। इत्थमपि कथ्यते यत् स्वयं ब्रह्मा अस्य नामकरणं "वाल्मीकिः" इति कृतवान्।

वाल्मीकेः कथा

वाल्मीकिः नाम व्याधः = शूद्रः आसीत् इत्यपि कथा श्रूयते। तत्र प्रमाणमस्ति यदयं पूर्वजन्मनि व्याधः आसीत्। तस्मिन् जन्मनि सः व्याधजातेः आखेटकादिकं कर्म कुर्वन् आसीत्। तत्र वने 'शंख' नामकस्य ऋषेः संसर्गात् 'राम'-नामजपं चिरकालपर्यन्तं कृतवान्। 'राम' नाम विलोम-रुपेण "मरा-मरा" इति जपन् "राम-राम" इति क्रमशः शुद्धमुच्चारितवान्। तेन संस्कारेण स व्याधः अग्रिमजन्मनि "अग्निशर्मा" अथवा 'रत्नाकरः' इति नाम्ना प्रसिद्धः बभूव। स एव रत्नाकरः उपर्युक्ततपोबलेन "वाल्मीकिः" अभूत्।

अत्र "वाल्मीकि"-निर्मिते एव "आनन्दरामायणे" सुस्पष्टरुपेणास्य पूर्वजन्मनः वर्तमानजन्मनश्च कथा विद्यते।

यथा

पप्रच्छ च वाल्मीकिं सभायां रघुनन्दनः।
रामावतारतः पूर्वं त्वया मच्चरितं कृतम्।
कथं ज्ञातं त्वयापूर्वं केन त्वामुपदेशितम्।

आनन्दरामायणे राज्यकाण्डे पूर्वार्धे श्लोकः ३६

अहं पुरा किरातेषु किरातैः सह वर्द्धितः,
मुनीनां दर्शनादेव शुद्धान्तःकरणोऽभवम्।
मुनयो मामुपादिशुर्मत्कृपापूर्णमानसाः।
इत्युक्त्वा राम ते नाम व्यत्यस्ताक्षरपूर्वकम्।
एकाग्रमनसाऽत्रैव 'मरेति' जप सर्वथा।
जपन्नेकाग्रमनसा बाह्यं विस्मृतवानहम्।
अहं ते रामनाम्नश्च प्रभावादीदृशोऽभवम्।

आनन्दरामायणे राज्यकाण्डे १२१, १४६, १४३, १४९

उपर्युक्तपद्यानुसारं रामचन्द्रः वाल्मीकिं पृष्टवान् यद् रामावतारात् पूर्वमेव कथं भवान् मदीयचरित्रं ज्ञातवान्, कथितवान् च। वाल्मीकिः कथितवान्—तत्र एकदा मुनीनां दर्शनेन मम अन्तःकरणं परिशुद्धं जातम्। मुनयः उपदिष्टवन्तः यत् त्वम् 'राम-' नाम विलोम-रुपेण "मरा-मरा" इति सुदीर्घकालं जप। यतो हिं व्याधसंस्कारेण "राम" इति उच्चारणं नाभवत्। विलोमशब्दः एव "राम-राम" इति रुपेण परिवर्तितः। तेन रामनामप्रसादेन अहं सर्वं ज्ञातवान्।

एतेन प्रमाणेन इदं सिद्ध्यति यत् पुरा व्याधः स एव वाल्मीकिः ब्रह्मतुल्यः महर्षिः त्रिकालज्ञः संजातः। इमां कथामेव आधारीकृत्य गोस्वामी तुलसीदासः अपि लिखितवान्।

यथा

उलटा नाम जपत अज्ञाना, वाल्मीकि भय ब्रह्मसमाना।

वाल्मीकेः अनेन परिचयेन "राम" शब्दस्य गरिमानं महिमानं च कोऽपि ज्ञातुं शक्नोति।

"राम"–"रामायण"–शब्दयोः गूढार्थः

कथाप्रारम्भात्पूर्वं 'राम-' शब्दस्य 'रामायण-' शब्दस्य चार्थज्ञानमावश्य-कम् । येन भगवतः रामस्य तथा महामहिमशालिनः अस्य वाल्मीकिरामायणग्रन्थस्य च महत्तां ज्ञातुं शक्ष्यन्ति ।

(क) रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि
इति 'राम' पदेनासौ परब्रह्माभिधीयते ।

इति उपनिषद्-वाक्येन सच्चिदानन्दस्वरूपः रामः, यत्र सर्वे जनाः प्राणिनः योगिनः रमन्ते स 'रामः' ।

(ख) रामो रमयतां वरः, रामो नाम जनैः श्रुतः

इति वाल्मीकिवाक्येन रमयति गुणैः सर्वान् इति रामः । फलतः रामशब्दः चरमानन्ददायकः ब्रह्ममयः ।

(ग) रामनाम एव तारकमन्त्रः "श्रीरामेति' परं जप्यं तारकं ब्रह्मसंज्ञकम्" । अमुमेव तारकमन्त्रं काश्यां मणिकर्णिकाक्षेत्रे चन्द्रमौलीश्वरो विश्वनाथः प्रददाति, इति **"काशीखण्डे"** ।

रामायणशब्दस्यार्थः

(१) रामः अयते-प्रतिपाद्यते अनेन इति रामायणम् ।

(२) रामस्य अयनं-स्थानं-वर्त्म इति "रामायणम्" ।

(३) रमायाः-लक्ष्मीरूपायाः सीताया इदं चरितं रामं, तस्य अयनं "रामाय-णम्" । यतः

काव्यं रामायणं कृत्स्नं (समग्रम्) सीतायाश्चरितं महत्

बालकाण्डे ४-७

(घ) प्रणवे-ओंकारे उकारः शत्रुघ्नः, मकारः भरतः, अर्धमात्रा मध्यो रामः, तत्र बिन्दुरूपा सीता (शब्दकल्पद्रुमः) । अतिरहस्यमयोऽयमर्थः ।

शब्दस्य च गुरुता अतिसंक्षेपेण प्रतिपादिता । यद्यपि असंख्यशब्दैरपि तेषां महत्ता- वर्णनं नैव शक्यम् ।

कम्बरामायणम्—संक्षिप्तपरिचयः

पूर्वपीठिका

सर्वप्रथमं कम्ब-रामायणविषये पूर्वपीठिकारूपेण किमपि ज्ञानमावश्यकम्। अस्य नाम 'कम्बर', 'कम्बन्' इति रुपद्वयेन प्राप्यते। तत्र 'कम्बन्' शब्द एव विशेषरुपेण प्रचलितो वर्तते। यत्र लखनऊ महानगरीस्थभुवनवाणीन्यासेन प्रकाशिते आचार्येण ति० शेषाद्रिणा हिन्दी-भाषायाम् अनूदितस्य "कम्बरामायणस्य" प्रथमपृष्ठे लिखितं वर्तते 'रचयिता महर्षि कम्बर', तथा महायोगिना स्वामिना चिन्मयानन्देनापि 'कम्बर' इति लिखितं, तत्रैव अन्ये जस्टिस् एस्० महाराजन्, जस्टिस् इस्माईल, कम्बन् अडिप्पोडि सा. गणेशन्-प्रभृतिमहानुभावैः 'कम्बन्' इति शब्देन व्यवहारः कृतः। किन्तु सर्वैः पुस्तकस्य नाम "कम्ब-रामायणम्" इत्येव लिखितम्।

भारतराष्ट्रस्य शतशः विद्वांसः ये च तमिलभाषाविशेषज्ञाः तथा गम्भीरगवेषकाः आसन् सन्ति च ते सर्वे 'कम्बन्' महोदयं 'महर्षि' इति शब्देन सम्बोधितवन्तः। तेषां विश्वासो वर्तते यत् महर्षि-वाल्मीकिवदेव महर्षि-कम्बन् अपि वर्तते। कविचक्रवर्ती च वर्तते।

कवेः स्थानं समयश्च

भारतीयकविपरम्परावत् महाकवेः कम्बनस्यापि समयः जन्मस्थानं कदा कुत्र वर्तते अस्य निश्चयात्मकं न किमपि प्रमाणम् उपलभ्यते। केवलम् अस्य महाकवेः काव्य-समीक्षया विद्वद्भिः निश्चितं यत् नवम-शताब्द्याम् अयं महाकविः आसीत्। तस्मात् कालादेव अस्य रामायणस्य लोकप्रियता व्यापकता च क्रमशः

वर्धमाना जाता । तमिलक्षेत्रे प्रतिगृहमस्य पाठः पूजनं गायनं च जायते । दक्षिणभारतीयभाषासु 'कम्बरामायणं' मूर्धन्यायमानं विराजते ।

विद्वद्भिः वर्ण्यते यद् अयं महाकविः 'तिरुवलुन्दूर' स्थाने जन्म ग्रहीतवान् । जात्या ब्राह्मणः आसीत् । अयं हि भगवत्याः वाग्देव्याः महत्कृपापात्रम् आसीत्, यः सार्वभौमः कविचक्रवर्ती शब्देन सम्बोधितः बभूव । अयं न केवलं कवि-सम्राट् आसीत् अपि तु विद्यासागरोऽपि आसीत् । यः वेद-सागरं प्रविश्य सकलज्ञान-विज्ञान-रत्नं प्राप्तवान् ।

कम्ब-रामायणे काण्डपटलानि

१९८०तमे वर्षे आचार्य-ति. शेषाद्रिद्वारा लिखिता भुवनवाणी-न्यासद्वारा प्रकाशिता मूलपद्यसहितसाधारण-हिन्दी-भाषाटीकायुक्ता पुस्तिका वर्तते । तदनुरूपमेव प्रतिकांण्डस्य संक्षिप्तसरलसंस्कृतगद्यमयं विवरणं दीयते । दशसहस्र-चतुःशताष्टादशप्रामाणिकपद्यानि (१०४१८) अस्मिन् रामायणे सन्ति । तदतिरिक्तान्यपि कियन्ति पद्यानि सन्ति । बालकाण्डे १३८९, अयोध्या काण्डे १२१०, अरण्यकाण्डे ११९६, किष्किन्धा-काण्डे १००४, सुन्दरकाण्डे १०९६, तथा युद्धकाण्डे ४३२३, पद्यानि सन्ति । अस्मिन् रामायणे उत्तरकाण्डं न वर्तते ।

कम्बरामायणस्य विशालता व्यापकता च

एवं रूपेण वाल्मीकिरामायणम् आनन्दरामायणं च विहाय एतस्मिन् कम्बरामायणे एव सर्वाधिकपद्यानि विराजन्ते । अस्मिन् रामायणे प्रत्येककाण्डे कतिपय-पटलानि सन्ति । प्रतिपटलं विषयविभाजनरूपेण पद्यानि वर्तन्ते । कम्बरामायणपठनानन्तरं स्पष्टं प्रतीयते यत् कविरयं यथैव महान् भक्तः आसीत् तथैव सरसवर्णनेऽपि नितान्तः निपुणः । इदं रामायणं मुख्यतया वाल्मीकिरामायणमेवानुसरति । किन्तु अध्यात्मरामायणस्यापि यत्र-तत्र प्रभावः विद्यते । महाकविकालिदासेनापि प्रभावितोऽयं महाकविरिति स्वयमेव 'कम्बनमहाभागेन लिखितम् । अथ च शृङ्गरादिरसवर्णनम् अद्वितीयम् । यथास्थानं विषयवस्तु-वर्णने कियन्ति तत्पद्यानि

दास्यन्ते । विदुषां पाठकानां च सौविध्याय निबन्धस्यान्ते कम्बरामायणस्थातिविशिष्टमभिनववर्णन-सूची अपि विद्यते ।[1]

---

१. द्रष्टव्यम्—वाल्मीकिरामायणस्य बालकाण्डकथासारांशानुपदमेव 'कम्बरामायणस्य' बालकाण्डकथासारांशो वर्तते। एतेन सहैव कथा-घटनावर्णन शैली-भेदाश्च स्पष्टीभवितारः।

वाल्मीकिरामायणे बालकाण्डस्य संक्षिप्तकथा

विषयप्रवेश:

सर्वप्रथमं महर्षिनारदवाल्मीकिसंवाद एव रामकथाया: मूलमुक्तम् । तत्र वाल्मीकि: भगवन्तं नारदं पृष्टवान् यद् अधुना सकलमानवगुणयुक्तश्चरित्रवान् सत्यवादी धर्मज्ञ: जितेन्द्रिय: पराक्रमी च कोऽस्ति । महत्त्वपूर्णायामस्यां जिज्ञासायां त्रिकालज्ञो नारदोऽब्रवीत्—

साम्प्रतं संसारेऽस्मिन् एक एव महामानवो विद्यते यो हि सर्वगुणसम्पन्न: सर्वाङ्ग- सुन्दर:, नीतिज्ञ:, धर्मप्राणा:, सर्वशास्त्रविशारद:, लोकानां मर्यादापालक: भगवत्या: सरयूनद्यास्तीरे अयोध्याधिपते: प्रथितयशस: दशरथस्य पुत्र: श्रीरामचन्द्र: एव इति ।

बालकाण्डे १/१-१८

रामायणनिर्माणकारणम्

नारदवाल्मीकिसंवादानन्तरं प्रात: ब्राह्ममुहूर्ते स्नानाद्यर्थं वाल्मीकि: तमसानदीतट- मार्गं जगाम । तत्र महर्षि: ददर्श यदेको व्याध: क्रौञ्चयुग्मे एकं बाणेन हतवान् । तस्य स्वपत्यु: क्रौञ्चस्य मरणेन क्रौञ्ची क्रन्दमाना जाता । वेदनया क्रन्दमानां तां दृष्ट्वा क्रन्दनं च श्रुत्वा सहसा वाल्मीकिमुखात् पद्यमिदं नि:सृतम् ।

'मा निषाद प्रतिष्ठां त्वमगम: शाश्वती: समा: ।
यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम् ।'

बालकाण्डे २/१५

तत्पश्चाद् वाल्मीकिरचिन्तयत् यदयं शोकार्तस्य मे श्लोकः किमप्यपूर्णं वस्तु वक्ति। तदैव ब्रह्मा स्वयमुपस्थितः।

आजगाम ततो ब्रह्मा लोककर्ता स्वयं प्रभुः।
चतुर्मुखो महातेजा द्रष्टुं तं मुनिपुङ्गवम्।

बालकाण्डे २/२३

ब्रह्मा प्रोवाच—महर्षे ! तव मुखान्निःसृता श्लोकरूपेयं वाणी मम संकल्पाद् एव। अत एव नारदमुखात् श्रुतं सर्वं रामचरितं भवता लिख्यताम्।

बालकाण्डे ३/३०-३३

तदनन्तरं ब्रह्मा अन्तर्दधान। वाल्मीकिस्ततो रामायणं संक्षेपेण प्रथमं कथितवान्।

विशेषः

अत्रेदं ज्ञेयम्—अयमेव "मा निषाद" इति श्लोकः भारतीयसमस्तसंस्कृतसाहित्यस्य प्रथमं पद्यम्। नात्र केषामपि प्राच्यपाश्चात्त्यविदुषां मतभेदः। इदमेवादिकाव्यम्। आनन्दवर्धनाचार्येण प्रोक्तं—

काव्यस्यात्मा स एवार्थस्तथाचादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥

ततश्च चतुर्थसर्गादारभ्य विस्तृतरूपेण रामकथां लिखितवान्। तत्रैव चतुर्थ- सर्गस्यसप्तमपद्ये लिखितं यत् "काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्"।

बालकाण्डे ४/७

कथं समग्रं रामचरितं सीतायाश्चरितमेवेति अग्रे 'राम' शब्दव्युत्पत्तौ स्पष्टं प्रतिपादयिष्यते।

अथ राजा दशरथद्वारा सुरक्षिताया अयोध्यापुर्याः वर्णनमतिमनोहारि काव्यकलात्मकं चास्ति। अयोध्या पावनपुरी तत्रत्यजनाः सत्यवादिनो धर्मात्मनश्च।

तस्याः प्रासादादिकं हृदय-हारि। भगवती सरयू नदी समग्रामयोध्यां साकेतनगरीमवधपुरीं च पवित्रीकरोति । मन्त्रिणश्च नीतिज्ञाः गुणज्ञाश्चासन् ।

यज्ञप्रस्तावः

तदनन्तरं दशरथस्य पुत्रप्राप्यर्थमश्वमेधयज्ञस्य प्रस्तावः जातः । गुरुवसिष्ठसहिताः सर्वे तपोधनाः ऋषयः समाहूताः । सर्वे यज्ञप्रस्तावं सहर्षमनुमोदितवन्तः । ततश्च दशरथस्य प्रधानमन्त्री सुमन्त्रः दशरथं प्रबोधयन् निजगाद— ऋषयस्तु अश्वमेधयज्ञस्य समर्थनं कृतवन्तः । किन्तु पुरा मया महर्षिसनत्कुमारस्य ऋषिभिः साकं भवत्पुत्रप्राप्त्युपायवार्तालापः श्रुतः स भवदन्तिकं विनिवेद्यते ।

दशरथसुमन्त्रयोर्मध्ये रहस्यमयविमर्शः

भगवता सनत्कुमारेण प्रोक्तं—विभाण्डक-ऋषेः पुत्रो महान् तपस्वी ऋष्यशृंगो भविता । तदाऽङ्गदेशस्य राजा रोमपादो भविष्यति । तस्य राज्येऽनावृष्टिर्भविता । तेन चिन्तितो रोमपादः ऋषीनाहूतवान् । ऋषि भिरुक्तं यत् महर्षि-ऋष्यशृङ्गं केनापि प्रकारेण प्रसन्नं कृत्वा गणिकाः संप्रेष्य तमृषिं स्वराज्ये अङ्गदेशे समाहूय स्वकन्या शान्ता तस्मै प्रदेया ।

इत्थं भवत् सखा रोमपादस्य जामाता ऋष्यशृङ्गः तवापि जामाता एव स्यात् । स एव ऋषिः तव प्रजां विधास्यति ।

बालकाण्डे ९/१८-१९

दशरथसुमन्त्रयोर्मध्ये ईदृग्गुप्तवार्तालापेन दशरथस्य पुत्रप्राप्तिमार्गः प्रशस्तो जातः ।

दशरथरोमपादसंवादः

दशरथः स्वयमङ्गदेशं प्रस्थाय तत्र मित्रेण रोमपादेन सह विशदं वार्तालापं चकार । तत्रैव ऋष्यशृङ्गनयनार्थमनेकां वेश्यां मन्त्रयित्वा तस्याश्रमं प्रेषितवान् राजा रोमपादः ।

बालकाण्डे १० सर्गः

ताः वनिताः विभिन्नकलाकौशलेन ऋष्यशृंगाश्रमं प्राप्ताः । ऋषिः प्रथमं ताः श्रद्धापूर्ण- दृष्ट्या ददर्श । यतो हि स महर्षिः पूर्वं नारीं दृष्टवानेव नहि । ततश्च ताः तमृषिं फलादिक- मुपहृत्य राज्ञो रोमपादस्याङ्गदेशं प्रत्यानयने सफला बभूवुः । ऋष्यशृंगस्ताभिः नारीभिः सह रोमपादराजधानीं प्राप्तवान् ।

तत्र राज्ञा रोमपादेन तस्य महर्षेः अतिविशिष्टरूपेण स्वागतं पूजार्घ्यादिकं च कृतम् । महर्षिः सन्तुष्टोऽभूत् । महर्षेरागमनमात्रेणैव राज्ये वृष्टिरभूत् । प्रजानां कष्टं दूरीभूतं जातम् ।

ततश्च रोमपादः स्वान्तःपुरं तमृषिं नीत्वा स्वकीयामद्भुतसुन्दरीं नवयौ-वनां शान्ता- नाम्नीं कन्यां तस्मै ऋषये शास्त्ररीत्या प्रददौ । ऋषिश्च सुप्रसन्नः सन् शान्तया सह तत्र राज- भवने सुखेन चिरं समयं यापयामास ।

यथा

अन्तःपुरं प्रवेश्यास्मै कन्यां दत्त्वा यथाविधि ।
शान्तां शान्तेन मनसा राजा हर्षमवाप सः ॥
एवं स न्यवसत् तत्र सर्वकामैः सुपूजितः ।
ऋष्यशृंगो महातेजाः शान्तया सह भार्यया ॥

बालकाण्डे ३२, ३३

दशरथ-ऋष्यशृङ्गयो वार्ता

तदनन्तरं सुमन्त्रेण प्रेरितो दशरथः गुरुवसिष्ठस्याज्ञां नीत्वा स्वराज्ञीभिः साकं रोमपादस्य राज्यमङ्गदेशं प्राप्तवान् । रोमपादश्च यथेष्टं सत्कारं चकार । तदा दशरथः भगवतः सनत्कुमारस्य कथां रोमपादं श्रावयामास । ततो दशरथः रोमपादेन साकं मुनिं निकषा समागत्य पुत्रप्राप्तये तम् ऋषिं प्रार्थितवान् । ऋषिश्च सहर्षम-योध्यागमनायोद्यतो जातः । रोमपादस्य सुहृत् दशरथस्तमृषिं पत्न्या शान्तया साकं स्वकन्याजामातृवत् सस्नेहं सादरं च अयोध्यां नीतवान् । अयोध्यां प्रविष्टे सत्येव शंखदुन्दुभिनादैः ऋषेः स्वागतं जातम् । पत्न्या सह स राजा ऋष्यशृंगमन्तःपुरमानीय महतीं प्रसन्नतां लेभे ।

यथा

अन्तःपुरं प्रवेश्यैनं पूजां कृत्वा च शास्त्रतः।
कृतकृत्यं तदात्मानं मेने तस्योपवाहनात्॥

अन्तःपुराणि सर्वाणि शान्तां दृष्ट्वा तथागताम्।
सह भर्त्रा विशालाक्षीं प्रीत्यानन्दमुपागमन्॥

बालकाण्डे ११/२०, ३०

यज्ञव्यवस्था यज्ञारम्भश्च

अथ कियद्दिनानन्तरमेव राजा ऋषेः समीपमागत्य यज्ञस्य प्रस्तावं चकार । ऋषिः तदर्थं स्वीकृतिं ददौ तथा राज्ञे दशरथाय तथा मन्त्रिभ्यो यज्ञस्य पूर्वव्यवस्थां कर्तुमादिष्टवान् । ततो वसिष्ठाज्ञया सरयूनद्याः उत्तरे तटे यज्ञशालानिर्माणादिकार्यार्थमाज्ञां प्रदाय गुरुवसिष्ठं प्रति यज्ञव्यवस्थायै दशरथः प्रार्थितवान् । वसिष्ठाज्ञया सेवकाः व्यवस्थायां संलग्नाः जाताः । सुमन्त्रद्वारा विभिन्नदेशस्य नृपान् प्रति सादरमामन्त्रणप्रेषणं तथा समागतेभ्यः नृपेभ्यः यथोचितं सत्कारं व्यदधात् । सपत्नीकः दशरथः वसिष्ठेन यज्ञदीक्षां गृहीतवान् । दशरथश्च साङ्गोपाङ्गं यज्ञस्य पूर्वानुष्ठानं चकार ।

बालकाण्डे १३/१४ सर्गौ

तदनन्तरं महर्षिः ऋष्यशृंगः पुत्रेष्टियज्ञं प्रारब्धवान् ।

यथा

इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात्।
अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः॥

बालकाण्डे १५/२१

एतन्मध्ये देवगणाः रावणाद्युपद्रवशान्त्यर्थं ब्रह्माणं निकषा समागतवन्तः । ब्रह्मा च देवगणैः सार्धं विष्णोः समीपमागतवान् । भगवान् विष्णुः तेभ्यः आश्वासनं प्रायच्छत् ।

यथा

एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान् ।
मानुष्ये चिन्तयामास तदा दशरथं नृपम् ॥

बाल्काण्डे १५/३०

भगवान् विष्णुर्निश्चयं चकार यदहं दशरथस्य पुत्ररूपेणावतारं ग्रहीष्यामि ।

यथा

इत्येतद् वचनं श्रुत्वा सुराणां विष्णुरात्मवान् ।
पितरं रोचयामास तदा दशरथं नृपम् ॥

बालकाण्डे १६/८,

यज्ञे पायसप्राप्तिः

ततश्च महान् पुत्रेष्टियज्ञः समारब्धः । तस्मात् यज्ञहवनकुण्डाद् एको विशालकायः कृष्णवर्णः रक्ताम्बरधारी सिंहसदृशपराक्रमी दिव्यपायसपूर्णपात्रेण सह निर्गतः । सः दशरथं प्रत्यब्रवीत्— प्रजापतेराज्ञयाऽत्रागतोऽहम् । देवनिर्मितमिदं पायसं गृहाण तथा यथायोग्यं स्वपत्नीभ्यो ददातु । एतेनैव त्वं पुत्रान् प्राप्स्यसि ।

यथा

भार्याणामनुरूपाणामश्नीतेति प्रयच्छ वै ।
तासु त्वं लप्स्यसे पुत्रान् यदर्थं यजसे नृप ॥

बालकाण्डे १६/२०

दशरथोऽन्तःपुरं प्रविश्य तिसृभ्यः कौसल्या-सुमित्रा-कैकेयी-पत्नीभ्यः तत् पावनं पायसं वितरितवान् ।

यथा

सोऽन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् ।
पायसं प्रति गृह्णीष्व पुत्रीयं त्विदमात्मनः ॥
कौसल्यायै नरपतिः पायसार्धं ददौ तदा ।
अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥

बालकाण्डे १६/२६,२७

यथा

कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ।
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥
अनुचिन्त्य सुमित्रायै पुनरेव महामतिः ।
एवं तासां ददौ राजा भार्याणां पायसं पृथक् ॥

बालकाण्डे १६/२.८.२.९

विशेषः

अत्र समीक्षकैर्विचार्यते यत् कौशल्यायै पायसमेकवारं, कैकेय्यै चैकवारं, तथा सुमित्रायै वारद्वयं पायसं प्रददौ नृपः । तेनैव कौशल्या कैकेयी चैकैकपुत्रस्य सुमित्रा च पुत्रद्वयस्य जन्म प्रददुः । इत्थं च देवकार्यसिद्धिमार्गः प्रशस्तो जातः ।

ततश्च दशरथः सर्वानतिथीन् यथायोग्यं सत्कृत्य प्रस्थानं कारितवान् । शान्ता सहितम् ऋष्यशृंगं पुत्री-जामातृतुल्यं पूर्णतया सत्कृत्य सादरं प्रेषितवान् ।

रामजन्म

अथ राज्ञः तिस्रः गर्भवत्यः पत्न्यः द्वादशे मासि क्रमशः रामः भरतः लक्ष्मणः शत्रुघ्न इति पुत्रान् जनयामासुः ।

यथा

ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ।
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ॥
कौसल्याजनयद् रामं दिव्यलक्षणसंयुतम् ।

बालकाण्डे १८/८,९,१०

भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ।
साक्षाद् विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥

बालकाण्डे १८/१३

अथ लक्ष्मणशत्रुघ्नौ सुमित्राजनयत् सुतौ ।
वीरौ सर्वास्त्रकुशलौ विष्णोरर्धसमन्वितौ ॥

बालकाण्डे १८/१४,

एभिः बाललीलां कुर्वद्भिः पुत्रैः साकं सपत्नीको दशरथः चरमानन्दं लेभे ।

यतश्च पूर्वमेवोक्तं विष्णुना—

यथा

ततः पद्मपलाशाक्षः कृत्वाऽऽत्मानं चतुर्विधम् ।
पितरं रोचयामास तदा दशरथं नृपम् ॥

बालकाण्डे १५/३१

विश्वामित्रागमनम्

इत्थं मधुमये समये सहसा महर्षिः विश्वामित्रो दशरथं निकषा समागतवान्। दशरथः यथायोग्यं तेषां पूर्णं सत्कारं पूजां च चकार। तदनन्तरमागमनस्य कारणजिज्ञासा कृता राज्ञा। ऋषिणा प्रोक्तं—रामं मह्यं देहि, मया सह गत्वा मम यज्ञे ऋषीणां तपसि ये राक्षसाः याः राक्षस्यश्च विघ्नं कुर्वते तेषां नाशं रामः करिष्यति। दशरथः स्तब्धो जातः। तेनोक्तं-भगवन् महर्षे! रामस्तु बाल एवास्ति, न च तथा शस्त्रविद्याविशारदः। अत एवाहमेव भवता साकं ससैन्यं चलामि, राक्षसान् विध्वंसयिष्यामि।

विश्वामित्रेण साकं रामलक्ष्मणयोर्गमनम्।

सहजकोपो महर्षिः उत्थाय कटुवाक्यं ब्रुवन् प्रचलितः। तदैव गुरुवसिष्ठः समागतः। वसिष्ठः दशरथं कथितवान्- रामं विश्वामित्रेण साकं प्रेषय। अनेनैव सकलकल्याणं भावि। गुरुवचनेन राजा लक्ष्मणसहितं रामं विश्वामित्रेण सह प्रेषितवान्। ऋषिः सहर्षं साशीर्वचनं रामलक्ष्मणाभ्यां साकं ततः प्रस्थितवान्।

बालकाण्डे १८/१९ सर्गौ

विश्वामित्रः रामाय पञ्चाशद् (५०) विशिष्टास्त्राणि ददौ। तेषां संचालनसंवरणादि- शिक्षां च अयच्छत्। एतान्यस्त्राणि सर्वथा दिव्यालौकिकानि सन्ति। सर्वकार्यसाधकानि। इमान्यस्त्राणि स्वकार्यं संसाध्य पुनर्भवत्समीपमागमिष्यन्ति। एतेषां यथेच्छं प्रयोगं कुरुतात्। बला-अतिबला नाम्नीं विद्यां च ददौ।

बालकाण्डे २८ सर्ग

रामद्वारा यज्ञसंरक्षणम्

ततो रामः विश्वामित्रस्य यज्ञे मारीच-सुबाहु-नामानौ राक्षसौ यज्ञध्वंसार्थमागतौ। तयोर्मध्ये मारीचमेकेनैव बाणेन रामः समुद्रतरंगे प्रोज्झितवान्। ततः महाघोरं सुबाहुं स्वबाणेन जघान श्रीरामचन्द्रः। अन्यानपि राक्षसान् त्वरितमेव निहतवान्। ताटका-नाम्नीं भीषणां राक्षसीमपि जघान।

एतेन सर्वे ऋषयः सन्तुष्टाः शान्ताश्च बभूवुः । विश्वामित्रश्च सन्तोषमाप्तवान् । रामलक्ष्मणाभ्यां सर्वे शुभाशीर्वचनं प्रददुः ।

अथ विश्वामित्रो रामलक्ष्मणाभ्यां साकं राज्ञो विदेहजनकस्य राज्ये पावनीं मिथिलापुरीं प्रतस्थे तस्मिन्नेव पथि गौतमर्षेराश्रमं ते प्राप्नुवन्तः । तत्र ते रात्रिविश्रामं चक्रुः । रामेण पृष्टः ऋषिरस्याश्रमस्य विशेषरूपेण महर्षिगौतमस्य परिचयं प्रदत्तवान् । स महर्षिरेकदा कुत्रापि गतवानासीत् । तस्य मुनेः परमसुन्दरी रूपयौवनपूर्णा पत्नी अहल्या आसीत् । तां दृष्ट्वा सहस्राक्षः इन्द्रः गौतममुनेः रूपं धृत्वा तत्राश्रममागत्याब्रवीत्-हे भामिनि ! सुरतमिच्छता पुरुषेण ऋतुकालो न प्रतीक्ष्यते । त्वया सह संगममीहे । सा अहल्या तं देवराजमिन्द्रं ज्ञात्वा तेन सह सहवासं स्वीचकार ।

इन्द्रेण साकं सुरतौ संलग्ना सा अहल्या महती सन्तुष्टा कृतार्था च भूत्वा इन्द्रं ततः प्रस्थानाय संकेतिता ।

ऋतुकालं प्रतीक्षन्ते नार्थिनः सुसमाहिते ।
संगमं त्वहमिच्छामि त्वया सह सुमध्यमे ॥

अथाब्रवीत् सुरश्रेष्ठं कृतार्थेनान्तरात्मना ।
कृतार्थास्मि सुरश्रेष्ठ गच्छ शीघ्रमितः प्रभो ॥

बालकाण्डे ४८/१८, २०

तन्मध्ये एव गौतमस्तत्रोपस्थितः । सर्वां दुर्घटनां वीक्ष्य गौतमः ऋषिः इन्द्रं शशाप यत् तवाण्डकोशौ पतेताम्—अण्डकोशरहितो भव (कामोद्दीपनस्य कारणमण्डकोश एव) । स्वपत्नीमहल्यां च शशाप—त्वं वर्ष-सहस्रं यावद् अदृश्यरूपेणाग्निभस्मनि निराहारा केवलं वायुमेव पीत्वा स्थास्यसि । यदा दाशरथिः रामः वनमिदं सनाथीकरिष्यति तदा त्वं पूता भविष्यति ।

यथा

गौतमेनैवमुक्तस्य सुरोषेण दुर्मते।
पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात्॥

तथा शप्त्वा च वै शक्रं भार्यामपि च शप्तवान्।
इह वर्षसहस्राणि बहूनि निवसिष्यसि॥

वातभक्षा निराहारा तप्यन्ती भस्मशायिनी।
अदृश्या सर्वभूतानामाश्रमेऽस्मिन् वसिष्यसि॥

बालकाण्डे १८/२८, २९, ३०

अहल्योद्धारः

रामचन्द्रः घटनामेतां श्रुत्वा स्तब्धो बभूव। ततो विश्वामित्रस्याज्ञया अहल्यायाः पादौ जग्राह। साऽपि गौतमवचः स्मरन्ती रामस्य चरणौ धृतवती। तेन सा स्वकीयं पूर्वरूपं प्राप्तवती। गौतमोऽपि रामं संपूज्य अहल्यां स्वीकृतवान्।

बालकाण्डे ४९/१७-१८-२१

इन्द्रस्याण्डकोशपतनसमाचारेण देवाः चिन्तिताः सन्तः अग्निदेवस्यादेशेन कस्यचिद् मेषस्य अण्डकौशौ समुत्पाट्य दुराचारिणः इन्द्रस्य मूलाण्डकोशस्थाने संयोजयामासुः।

बालकाण्डे ४९/८

इत्थं चात्राहल्योद्धारं विधाय रामलक्ष्मणौ विश्वामित्रेण सार्धं मिथिलां प्रस्थितवन्तौ।

अहल्योद्धारस्येदृशकथावर्णनं नान्यस्मिन् रामायणे दृश्यते।

मिथिलायामेव निवसद्गौतमपुत्रः शतानन्दः समागतानां रामादीनां सविशेषं स्वागतं चकार। विश्वामित्रमुखेनैव स्वमातुः अहल्यायाः उद्धारस्य वर्णनं विज्ञाय आनन्दं लेभे। शतानन्दो रामस्याभिनन्दनं चकार।

बालकाण्डे ५१/४-१३

ततश्च राजा जनकः रामलक्ष्मणसहितस्य विश्वामित्रर्षे रागमनं ज्ञात्वा प्रातः पूजादिकं विधाय रामलक्ष्मणसहितं विश्वामित्रं यथायोग्यं पूजितवान्।

बालकाण्डे ६६/१-२

जनकप्रतिज्ञा

विश्वामित्रेण रामलक्ष्मणयोः परिचयः प्रदत्तः तथा चोक्तं यदयं रामः तव शिव- धनुर्द्रष्टुकामो वर्तते। जनकः तस्य धनुषः सर्वा कथां श्रावयामास। यो धनुरिदमुत्थापयितुं शक्ष्यति तेनैव साकं सीताया विवाहो भविता। यतो हि महाबलिष्ठाः राजानः समागत्य धनुरिदं संसर्तुमपि नाशक्नुवन्।

बालकाण्डे ६६/५, १८,१९,

यथा

यद्यस्य धनुषो रामः कुर्यादारोपणं मुने।
सुतामयोनिजां सीतां दद्यां दाशरथेरहम्॥

बालकाण्डे ६६/२६

अथ रामः तद्धनुरवलोक्य प्रसन्नचित्तोऽब्रवीत्—अहं दिव्यमिदं धनुरुत्थाप्य बाणसंयोजने प्रयत्नवान् भवामि। यदा रामो धनुरादाय मौर्वीं संयोजयन्नेवासीत् तदैव तद्धनुर्भग्नं जातम्। यस्य भयङ्करशब्देन दिशः व्याप्ताः, भूकम्पश्च जातः।

इदं धनुर्वरं दिव्यं संस्पृशामीह पाणिना।
यत्नवांश्च भविष्यामि तोलने पूरणेऽपि वा॥

आरोपयित्वा मौर्वीं च पूरयामास तद्धनुः ।
तद् बभञ्ज धनुर्मध्यो नरश्रेष्ठो महायशाः ॥

तस्य शब्दो महानासीन्निर्घातसमनिःस्वनः ।
भूमिकम्पश्च सुमहान् पर्वतस्येवदीयतेः ॥

बालकाण्डे ६७,१४,१७,१८

अथ सीताविवाहप्रसंगः

रामेण धनुर्भङ्गानन्तरं मिथिलायामानन्दस्य सागरः समुच्छलितो जातः । सीतायाः विवाहो रामचन्द्रेण साकं भवितेति मोदावहः समाचारः त्वरितमेव व्याप्तोजातः । विश्वामित्रस्य परामर्शानुसारं जनकस्य राजदूताः अयोध्यामागताः । तत्रागत्य ते धनुर्भङ्गस्य सीतया सह विवाहस्य च शुभसूचनां दशरथाय प्रदत्तवन्तः । महाराजो दशरथः मन्त्रिभिः समन्वितः सपरिकरो मिथिलां प्रस्थितवान् ।

मिथिलायां प्रविष्टे सत्येव मिथिलाधिपतिः विदेहो जनकः अतिविशिष्टरूपेण विनयेन च सपरिवारस्य दशरथस्य स्वागतसत्कारं चकार । दशरथस्यानुरोधेन त्रिकालज्ञो वसिष्ठः सूर्यवंशस्य परिचयं वैवस्वतमनोरारभ्य दशरथपर्यन्तं सविस्तरं निजगाम ।

जनकोऽपि स्वयं निमेः पुत्रस्य मिथिनामकस्य नृपस्य परिचयादारभ्य स्वपर्यन्तं निजवंशस्य परिचयं प्रदत्तवान् । ततो राजा जनकः सीतायै श्रीरामस्य ऊर्मिलायै लक्ष्मणस्य तथा कुशध्वजस्य कन्याभ्यां माण्डवी-श्रुतिकीर्तिभ्यां च क्रमशः भरतशत्रुघ्नयोः च साकं विवाहार्थं सादरं ययाचे । वसिष्ठविश्वामित्रयो राज्ञया दशरथस्तं प्रस्तावं स्वीचकार ।

बालकाण्डे ७०/७१

विवाहात्पूर्वं राजा दशरथः शास्त्रानुसारेण गोदानं नान्दीश्राद्धादिक-

ः म्गेत् ।

ततश्च श्रीरामस्य सीतया सह, भरतस्य माण्डव्या साकं, लक्ष्मणस्य ऊर्मिलया सह, शत्रुघ्नस्य च श्रुतिकीर्त्या समं पाणिग्रहणसंस्कारः "मिथिला"—पद्धत्या सुसम्पन्नः। तत्र महानुत्सवः नृत्यगीतवाद्यादिकं च बभूव।

दशरथस्यायोध्याप्रस्थानम्

यथा—

जनकस्य वचः श्रुत्वा पाणीन् पाणिभिरस्पृशन्। ७३/३४
चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिता॥

ततो महर्षिः विश्वामित्रः जनक-दशरथाभ्यामनुमतिमादाय स्वाश्रमं प्रतस्थे। राजा जनकश्च चतसृभ्यः कन्याकाभ्यस्तथा चतुर्भ्यो जामातृभ्योऽशेषं दानं सुवर्णरत्नादींश्च प्रदाय अयोध्याप्रस्थानं सस्नेहं सार्द्रनेत्रं कारितवान्।

यथा—

कम्बलानां च मुख्यानां क्षौमान् कोट्यम्बराणि च।
हस्त्यश्वरथपादातं दिव्यरूपं स्वलंकृतम्॥ ७४/४

ददौ कन्याशतं तासां दासीदासमनुत्तमम्।
हिरण्यस्य सुवर्णस्य मुक्तानां विद्रुमस्य च॥ ७४/५

एवं रूपेण दशरथः स्वपुत्रपुत्रवधूभिः मन्त्रिभिः परिजनैः सह मिथिलातः प्रतस्थे। मार्गे शुभाशुभशकुनानि ददर्श नृपः। पक्षिणो भीषणं शब्दायन्ते इत्यशुभम्। मृगाश्च मम दक्षिणभागं गच्छन्ति इति शुभम्। ततो वसिष्ठं पप्रच्छ—हे महर्षे! किमिदम्? वसिष्ठोऽब्रवीत्। कोऽपि संकटः आगच्छेत्, किन्तु स संकटः शीघ्रमेव दूरी भविष्यति।

परशुरामप्रसङ्गः

एतन्मध्ये सहजकोपः परशुरामः क्रोधेन प्रज्वलन् तत्र समुपस्थितः। सर्वे भयभीताः अजायन्त।

दशरथः ऋषिं निकषा आगत्य तं सम्पूज्योक्तवान् यत् तद्धनुः स्वयमेव रामस्पर्शेनैव भग्नं जातम्। दशरथवंचनमुपेक्ष्य परशुरामोब्रूते—हे राम ! मया शिवधनुर्भेदनं श्रुतम्। ममेदं धनुर्गृहाण, तच्च शरेण संयोज्य दर्शय।

रामोऽब्रवीत्—हे तपोनिधे ! वयं भवतां सम्मानं कुर्मः। भवद्वचनस्योत्तरं नैव दीयते मया। किन्तु क्षात्र धर्मस्येदं कर्तव्यं यत् कस्यचिदाक्षेपस्योत्तरं देयमेव। अत एव धनुर्दीयताम्।

परशुरामस्य तद्धनुः रामो गृहीत्वा धनुषि बाणं सन्धानितवान्।

इदमवलोक्य सर्वे चकिताः बभूवुः। परशुरामोऽवदत्—हे राम ! मया महत्या तपस्ययाऽनुपमो विजयः प्राप्तः, तान् विजयान् बाणेनानेन शीघ्रं नष्टं कुरु। भवान् स्वयं विष्णुरेव। भवत्कल्याणं भूयात्। इत्युक्त्वा परशुरामः स्वस्थानं गतवान्। एतदनन्तरं सर्वे प्रसन्नाः सुस्थिराः जाताः।

बालकाण्डे ७६/५,६,११,२४

पुत्रैः पुत्रवधूभिः साकं दशरथस्यायोध्यागमनम्

दशरथः पुत्रैः पुत्रवधूभिः साकं साकेतपुरीं प्राप्तवान्। समस्तायोध्यायामानन्दोत्सवाः चिरं बभूवुः।

राजा दशरथः भरतं स्वमातुलेन केकयपुत्रेण युधाजिता सह मातामहनगरं शत्रुघ्नेन सह गन्तुमादिष्टवान्।

यथा

अयं केकयराजस्य पुत्रो वसति पुत्रक।
त्वां नेतुमागतो वीरो युधाजिन्मातुलस्तव॥

श्रुत्वा दशरथस्यैतद् भरतः कैकेयीसुतः।
गमनायाभिचक्राम शत्रुघ्नसहितस्तदा॥

बालकाण्डे ७७/१७, २८

तदाऽत्रायोध्यायां रामलक्ष्मणौ मातृपितृसेवायां संलग्नौ आस्ताम्। रामश्च सीतया सह चिरकालं विजहार।

यथा

रामश्च सीतया सार्धं विजहार बहूनृतून्।
मनस्वी तद्गतमनास्तस्या हृदि समर्पितः॥

बालकाण्डे ७७/२५

इति बालकाण्डसंक्षिप्तकथा

कम्बरामायणे बालकाण्डस्य संक्षिप्तकथा

विषयप्रवेशः

तमिल भाषायाम् "पडलम्" इति शब्देन अध्यायः सर्गो वा विद्यते। तस्यानुवादः मया "पटलम्" इति शब्देन कृतः। अनुवादोऽयं विशिष्टतमिल-भाषाविद्भिः अनुमोदितः पत्रद्वारा। अत एवात्र रामायणे "देशपटलम् नदीपटलम्" इति एभिः शब्दैः सर्गस्थाने लिखितमस्ति।

अस्मिन् काण्डे द्वाविंशतिः (२२) पटलानि सन्ति। तेषु प्रथमं पटलत्रयं नदीपटलं देशपटलं नगरपटलं नाम्ना वर्णितम्। एतेन ज्ञायते यत् कम्बन् कविः नदीवनपर्वतक्षेत्रोद्यान- प्रभृतिप्राकृतिकसौन्दर्यस्य दृश्यस्य च महत्वं सर्वप्रथमं प्रददाति। ये चास्य देशस्य विशेषतां प्रकटयन्ति।

सर्वप्रथमं चतुर्दशपद्यैः भगवतो विविधरूपस्य तस्य सर्वशक्तिमत्तायाः सुन्दरतायाश्च मधुरवर्णनैः मङ्गलाचरणं क्रियते। एतेषु मङ्गलाचरणपद्येषु सर्वशक्तिमतो ब्रह्मणः विविधरूपतायामेकरूपतायाः, एकरूपतायां विविधरूपतायाश्च वर्णनं गम्भीराशययुक्तं महाकवेः विशालपाण्डित्यं प्रमाणयति।

(क) मङ्गलाचरणम्

मंगलाचरणरूपस्य प्रथमपद्यस्यानुवादो दीयते—

G 31
BVBSSMV

यथा—

या मूर्तिस्त्रिगुणात्मिका च खलु ये द्वे ज्योतिषी दीपिते,
या सर्वत्र विराजते विभुयुता पञ्चात्मिका व्यापिता।
यो ब्रह्माण्डबहिः सदा विरमते योऽभ्यन्तरे चाण्डके,
यश्चैको नितरां विभाति भुवने तं धार्यते चान्तरे॥

अर्थात् परब्रह्मणः परमेश्वरस्य एव सत्त्वरजस्तमोगुणात्मिका त्रिमूर्तिः, तस्यैव प्रकृति-पुरुषात्मेति द्वे देदीप्ते रूपे, तस्यैव परब्रह्मणः पञ्चतत्वात्मिका व्याप्तेयं सृष्टिः। यश्च परमेश्वरः ब्रह्माण्डाभ्यन्तरबहिश्च प्राणरूपः विराजते। एवंभूतः एव सर्वात्मपरब्रह्मस्वरूपः व्यापकः विष्णुः मया हृदि धार्यते तदग्रे नमनं क्रियते।

पद्यमिदं व्यापकस्य ब्रह्मणः सर्वप्रभुत्वं प्रदर्शयति, तथा महाकविकालिदासस्य अभिज्ञानशाकुन्तलस्य मङ्गलाचरणं "या सृष्टिः स्रष्टुराद्याः" इति पद्यं च स्मारयति।

मंगलाचरणस्य मूलं द्वितीयपद्यमिदम्

यथा

आन् रामम् पलवा युलनादिल नायु रघोरक्।
कतृरायण परमा यरुवायुरु वाहि मेन्मै।
कुन्नाव आनक् काकुन्वाय ककुय मून रून दनकु,
निनरा नियाव नयनी लकल्न् चन्निवैरयाम्।

अस्य संस्कृतानुवादः

यथा

भावोऽभावो रूपवांश्चाप्यरूपः
एकोऽनेकोऽनुत्तमज्ञानगम्यः।

निस्त्रैगुण्यो नित्यत्रैगुण्ययुक्तः,
विष्णोस्तत्पादपद्मं शाश्वतं मूर्ध्नि धार्यम्॥

अर्थात् यः व्यापकः विष्णुः सगुणः निर्गुणः, भावः अभावः, एकः अनेकः त्रिगुणरहितः त्रिगुणयुक्तः तथा ज्ञानैकगम्यः तस्य भगवतः ब्रह्मस्वरूपस्य रामस्य शाश्वतं, नित्यं चरणकमलं सदा शिरसि धारयामो वयम्।

एवं प्रकारेण कविरयं भगवतः शेषशायिनः विष्णोः विविधरूपस्य सौन्दर्यस्य च वर्णनं कुर्वन् पञ्चतत्त्वस्य निर्माणकर्तुः स्वरूपं प्रदर्शितवान्। तथा च यत्र-यत्र रघुनाथकीर्तनं तत्र-तत्र अञ्जलिबद्धः हनुमान् समुपस्थितोऽस्ति इति प्रतिपादितवान्। इत्थं च भगवत्याः सरस्वत्याः वन्दनां करोति। यथा प्राचीनतमसरस्वत्याः ध्यानपद्येषु वर्तते। यथा "शुक्लां ब्रह्मविचारसारपरमाम्" "याकुन्देन्दु" इत्यादि पद्येषु। इदं च मंगलाचरणस्य द्वादशं पद्यं वर्तते। एवं हि भूतभावनस्य भगवतः शिवस्य तथा शिवपुत्रस्य विघ्नविनाशकस्य विनायकस्य च वन्दनां चकार।

अथ च बालकाण्डस्य षोडशे पद्ये एकस्मिन् एव श्लोके समग्ररामायणस्य वर्णनं कृतं कविना।

अत्र ब्रूते यत् यथा मन्दराचलपर्वतेन समुद्रं मन्थयित्वा देवैः अमृतपानं कृतं कारितं च तथैव अयं कविचक्रवर्ती तमिलभाषासागरे निमज्जनं कृत्वा स्वपद्यामृतैः मधुररसपानं जनानां कारयति।

इदं तु चिरप्रसिद्धं तथ्यं यत् शिवपार्वतीसंवाद एव रामकथा विद्यते। इत्थं च भगवता शम्भुना भगवत्याः उमायाः कर्णे यत् नाम कथितं तत् "राम" इति नाम एव। तस्यैव सीतापतेः रामस्य चरणकमलयोः कम्बन् कविः नतमस्तकः प्रणमति। जनाः श्रीरामचरितार्थामृतस्य पानं कुर्वन्तु इति भावनया देवर्षिनारदेन इक्षुरसः निष्पीडितः। महर्षिवाल्मीकिना तस्यैव क्वाथं (चासनी) निर्मितं यस्यैव कालिदासेन गुडरूपेण परिवर्तनं कृतम्। तस्यैव गुड़स्य क्षीरान्भं मधुरपायसं निर्मितं कम्बन्-कविना। तात्पर्यमिदं वर्तते यत् यां रामकथां ब्रह्मणो ज्ञात्वा नारदः कथितवान्; तां च कथां श्रुत्वा भगवता वाल्मीकिना विस्तृतं रामकाव्यं विनिर्मितम्। तस्मिन्नेव

विस्तृते रामकाव्यसागरे प्रविश्य कालिदासेन च यत् रत्नं प्राप्तं तेषामेव प्रकाशे रसमाधुर्येण विशदीकृतं तमिलभाषायां महाकविना कम्बनेन । एतेन अयं महाकविः वाल्मीकिना कालिदासेन च प्रभावितो वर्तते इति स्वयमेव स्पष्टं प्रतिपादयति । एतत् काव्यदर्शनेन च सर्वत्र तथैव प्रतिभाति ।

पायिरम्

यस्यार्थः भवतिः विशेषभूमिका प्रस्तावना, प्राक्कथनं वा । इदं च केवलं लेखकस्य भवति लेखकप्रशंसकस्यापि भवति इति ति. शेषाद्रिमहोदयस्य स्वकीयहिन्दीटीकायाः टिप्पण्यां वर्तते ।

अस्य प्रकरणस्य अन्तिमे भागे स्वकीयविनम्रतां वर्णयति कम्बन् कविः । वर्णनमिदं सर्वथा पूर्वकविभिः महाकविकालिदासप्रभृतिभिः यथा वर्णितं तथैवात्र दृश्यते ।

उत्तालतरंगयुक्तक्षीरसागरस्य निकटं गत्वा यथा काचित् बिड़ाली सर्वं पयः पानं कर्तुमिच्छति तथैव भगवतो रामचन्द्रस्य कथा क्षीरसागरस्य समस्तं क्षीरपानं कर्तुम् उद्यतः अयं अज्ञः कविः कम्बन् । यत्र क्रौञ्चवधं दृष्ट्वा महाकाव्यरचयितुः महर्षिबाल्मीकेः दिव्यवाणी यस्मिन् देशे राष्ट्रे विराजते तत्र स्वल्पशब्दैः मदीया रचनेयं किं जड़ता युक्ता न वर्तते ? संसारः मां भर्त्सयिष्यति यत् कि त्वं कुरुषे ? यत्र शाश्वत-वेदज्ञानी वाल्मीकिः एव दिव्यं रामचरित्रं वर्णितवान् । सत्यामेवं स्थितौ उन्मत्तस्य प्रलपनम् अज्ञस्य कथनं भक्तस्य च भक्तिः किम् आलोच्यम् आलोच्या वा ।

यथा कश्चित् बालः भूमौ भित्तौ च रेखां कुरुते तां रेखां दृष्ट्वा शिल्पी हसति । तथैव मदीयां इमां रामकथां श्रुत्वा पठित्वा च अवश्यमेव जनाः निन्दां करिष्यन्ति । तथापि देवभाषायां वाल्मीकिः वशिष्ठः बोधायनः इति त्रयः महाकवयः सञ्जाताः । तदनुसारिणः कालिदासादयश्च तेषामेव कथनस्यानुसरणक्रमे ममायं प्रयासः । अन्ते च कथयति यत् विशाल-राक्षस-समूहनाशकस्य धनुर्धरस्य श्रीरामचन्द्रस्य स्तुतिकर्तारः ईप्सितं वस्तु प्राप्नुवन्ति ज्ञानं कीर्तिं च लप्स्यन्ते इयं स्तुतिः

मोक्षमार्गप्रदर्शिका वर्तते। तदुपरि भगवती कमला लक्ष्मीः निश्चितं कृपादृष्टिं विधास्यति। एवं रूपेण द्वादशपद्यैः महाकविः स्वकीयविनम्रतां रामकथामहत्तां च विनिर्दिष्टवान्।

"आट्रुप् पडलम्"

(नदीपटलम्)

महाकविरयं सर्वप्रथमम् "आट्रुप् पडलम्" (नदीपटलम्) नामके पटले सरयूनद्याः वर्णनं करोति। अस्यां नद्यां न कस्यापि पुरुषस्य पञ्चेन्द्रियाणि कुमार्गे गच्छन्ति, न च स्त्रीणां कटाक्षविक्षेपो जायते। एवंभूता महिमामयी भगवती सरयूनदी इमं देशम् अलंकरोति। (पद्य- १३)। अस्याः प्रवाहं पश्यन्तु यथा चतुर्वेदज्ञात्रे ब्राह्मणाय दानप्रदानेन दातुः शुभफलं वर्धते; यथा च सर्वशास्त्रविशारदस्य धर्मावलम्बिनः यशः प्रसरति तथैवेयं सरयू विस्तृता वर्धमाना च विद्यते।

"नाट्टुप् पडलम्"

(देशपटलम्)

अधुना महाकविः कम्बन्महानुभावः अस्य कोशलदेशस्य वर्णनं कुरुते। तत्र प्रथमं स्वकीयविनयशीलतायाः शालीनतायाः, शिष्टतायाश्च विशिष्टं परिचयं प्रददाति। कविः ब्रूते महर्षिः ब्रह्मणो मुखात् रामायणकथां श्रुत्वा चतुश्चरणानां श्लोकानां निर्माणं चकार। यद् रामकाव्यं देवानामपि श्रवणीयं समादरणीयं च जातम्। महर्षिद्वारा प्रशंसितस्य कोशलदेशस्य वर्णनं मम कृते दुस्तरः प्रयासः विद्यते। यथा कोऽपि मूकः स्वकीयं भावम् अन्यं श्रावयितुं यतते। किन्तु मया प्रेम-सुरा पीता। तस्याः सुरायाः प्रभावेण विक्षिप्तोऽयं जनः किमपि कर्तुमुद्यतः। अर्थात् ममेदं कोशल-देशवर्णनं प्रेममद्यपूरितं विद्यते। (पद्य—३३)

अत्र स्वल्पं क्षीणं च न किमपि वस्तु। केवलं कामिन्याः कटिः क्षीणा। सुगन्धयुक्तान् स्त्रीणां केशान् दृष्ट्वा जनाः उन्मत्ताः जायन्ते (तमिल भाषायां गन्ध शब्दस्य विक्षिप्तः मद्यपायी इत्युभौ अर्थौ जायेते) तात्पर्यमिदं यत् कोशल देशस्य

जना: न मद्यपायिन: न च विक्षिप्ता: किन्तु केवलं नारीणां सुगन्धयुक्तान् सुदीर्घकेशान् दृष्ट्वा मद्यपायिवत् विक्षिप्ता: उन्मत्ता: च भवन्ति ।

यस्य कोशलदेशस्य सुदीर्घकेशयुक्ता: स्तनेषु आवरणभूषिता: कामिन्य: पुष्पचयनार्थम् उपवनं गच्छन्ति तत्र तासां सुन्दरतां दृष्ट्वा तरुणा: ता: अनुधावन्ति । मयूराश्च सुदीर्घ- केशान् दृष्ट्वा स्वकीयमयूरीपुच्छान् विभाव्य अनुधावन्ति । फलत: कोशलदेशस्य नारीणां केशपाशा: सुदीर्घतमा: भवन्ति इति स्पष्टं ज्ञायते । अत्र कवि: तमिलदेश—(राज्य) वासिनीनां नारीणां सामान्यरूपेण सुदीर्घकेशान् दृष्ट्वैव वर्णनमिदं कृतवान् । एतेन सर्वथा धनधान्यनीति- ज्ञानशीलसौजन्यसहितविशालसौन्दर्ययुक्त: कोशलदेश: विभाति इति कवेराशय: ।

ज्ञायते यत् कविरयं एतस्मात् क्षेत्रात् तथाप्रभावित: येन पुन: पुन: कवे: भव्यभावना अयोध्यां परित: बद्धमूला जायते ।

किमियम् अयोध्या भगवत्या: लक्ष्मीदेव्या:, कमलासनं ? विष्णो: कौस्तुभमणे: स्वर्ण-मञ्जूषा विद्यते ? किं वा प्रलयकाले यथा सर्वे जीवा: भगवतो विष्णो: उदरे समाविशन्ति तथैवेयम् अयोध्या स्वर्गादपि गरीयसी वैकुण्ठलोक इव वर्तते ।

अयोध्याया: प्राचीरस्य च चतुर्दिक्षु चत्वारो गोपुरा: चत्वारि नगरद्वाराणि सन्ति । एते चत्वारो गोपुरा: चत्वारि द्वाराणि चतुर्णां वेदानां तुल्यरूपेण सन्ति । यत्र सन्मार्गस्य कपाटं वर्तते । कवेरत्राशयो वर्तते यत् अयोध्यानगरस्य चत्वारि गोपुरद्वाराणि चतुर्वेदतुल्यपवित्राणि सन्ति । यत्र कपाटानि सन्मार्गप्रदर्शकानि इव विराजन्ते । फलत: इयम् अयोध्यापुरी वेद-समा पवित्रतमा ।

"अरसियल् पडलम्"

(राज्यशासनपटलम्)

महाराज-दशरथस्य राज्यशासनं कादृशम् आसीत् कथं च दशरथ: महान् पराक्रमी आसीत् इत्येतेषां सर्वेषां विवेचनमस्मिन् पटले विधीयते । अस्य अयोध्या महानगरस्य कोशलदेशस्य नृप: दशरथ: सुयोग्य: महामहिमशाली भाग्यवान्

आसीत् । यस्य सप्तद्वीपा वसुमती शासनाधीना विद्यते । यस्यैव पुत्ररूपेण रामचन्द्रो भविता ।

स्वर्णहीरकादिरत्नजटिताभूषणादियुक्तः दशरथः शरीरतुल्यो वर्तते तथा च तस्य राज्यस्य सर्वे चराचरजीवाः प्राणस्वरूपाः वर्तन्ते । तात्पर्यमिदं यत् दशरथस्य प्रजाः एव तस्य प्राणाः विद्यन्ते । अत्रापि दशरथस्य वैशिष्ट्यं चमत्कारजनकशैल्या वर्णितं कविना ।

"तीरु अवदारप्पडलम्"

(श्री-अवतारपटलम्)

अस्मिन् पटले राज्ञः दशरथस्य पुत्राभावे राज्यप्रजानां चिन्तावर्णनं, गुरुवसिष्ठस्य पुरतः तच्चिन्तानिवेदनं, पुत्रेष्टियज्ञ-व्यवस्था, ऋष्यशृंगमहर्षेरानयनं, पुत्रेष्टियज्ञ-वर्णनं, रामावतारस्य च वर्णनं सुस्निग्धकाव्यशैल्यां वर्तते । येषां संक्षिप्त-वर्णनं निम्नाङ्कितमस्ति ।

एकदा नृपः ब्रह्मपुत्रं वसिष्ठं निकषा गत्वा न्यवेदयत् यद्भवान् एव मम रक्षकः सुखदुःखयोर्मध्ये मातृ-पितृवदीश्वरतुल्यो विद्यते ? भवत्कृपयैव मम पूर्वजाः सूर्यवंशिनः सूर्यसदृशेनैव तेजसा राज्यं शासितवन्तः । ममापि शासनकालस्य षष्टिसहस्रं (६० हजार) वर्षाणि व्यतीतानि । (अत्र सर्वत्र रामायणेषु सहस्रवर्षगणना अनुसन्धेया विद्यते । वाल्मीकिरामायणे आनन्दरामायणे चापि एवमेव कतिपयसह-स्राणां सर्वत्र चर्चाऽस्ति वर्तमानसहस्र- समक्षं किमिदं सहस्रमिति अनुसन्धेयम्)

एतन्मध्ये देवलोकवृत्तं वर्ण्यते । विष्णुश्च तत्र मण्डपस्थितसिंहासने समु-पविष्टवान् । देवाश्च तं स्वकीयकष्टजालं विनिवेदितवन्तः । तदा भगवान् विष्णुर-ब्रवीत्—

शृण्वन्तु भवन्तः ।आकाशचारिणो गणाः सर्वे वानराः भूत्वा वने पार्वत्यक्षेत्रे निवसन्तु । अहं तु राज्ञो दशरथस्य पुत्ररूपेण अवतारं ग्रहीष्यामि तथा राक्षसनाशं करिष्यामि । अयं च मम शेषनागः ममानुजरूपेण सेविष्यते । एवमुक्त्वा विष्णुः गरुडमारुह्य गतवान् ।

पुनश्च प्रकृतमनुसरति कविः। वसिष्ठोऽवदत्—"सर्वथा स्तुत्यः कश्यपप्रजापतिपुत्रो विभाम्डकः ऋषिरासीत् तस्य कृपाप्रदत्तपुत्रः ऋष्यशृंगः सर्वविद्यापारंगतः सकलवेदशास्त्रमर्मज्ञः चतुर्मुखब्रह्मा इव विद्यते । तस्यैव ऋषिश्रेष्ठस्य अत्रानयनस्य व्यवस्था विधेया । स एव ऋष्यशृंगोऽत्रागत्य यज्ञविधानं विधास्यति यज्ञं च कारयिष्यति तेनैव पुत्रेष्टिनामकयज्ञेन भवान् पुत्रवान् भविष्यति राजा रोमपादस्तव मित्रं वर्तते" । इत्युक्त्वा रोमपादद्वारा ऋष्यशृंगानयनस्य चोपायो वसिष्ठेनोक्तः । तस्य रोमपादस्य परिषदि काश्चित् परमरूपवत्यः वारवनिताश्चासन् । ताः कथितवत्यः यद्वयं तमृषिमत्रानयिष्यामः । राजा चेदं श्रुत्वा हर्षमाप्तवान् । तासां रूपगुणानां प्रशंसां कृत्वा यथेच्छं सम्मानं विधाय धनादिकं दत्वा ऋषेरानयनार्थमाज्ञां ददौ । ताश्च सुन्दर्यः राजानं नमस्कृत्य ततः प्रस्थितवत्यः ।

एकस्मिन् दिने रोमपादस्यानुपस्थितौ ताः नार्यः ऋष्यशृंगस्याश्रमं गतवत्यः । ताश्च क्रमशः तस्मै मधुरफलानि ददुः । एवं क्रमेण परिचयं वर्धयन्त्यः ताः स्वकीयाश्रममानेतुं प्रार्थितवत्यः । ऋषिश्च ताः तपस्विनीः ज्ञात्वा स्वीचकार । ताश्चं तम् ऋषिं सुदूरमानीतवत्यः ।

तस्यागमनेनैव तत्र रोमपाद राज्ञो राज्ये महती वृष्टिर्जाता । सर्वे जलाशयाः प्रपूरिताः । इदं दृष्ट्वा राजा ज्ञातवान् यत् महर्षिरत्रागतः । इदमपि निश्चितं यत् तं जितेन्द्रियं सुकेशिन्यः कमलाननाः मृगनयन्यः येन केनोपायेनात्रानीतवत्यः रोमपादश्च विप्रैः पार्षदैश्च सह स्वागतार्थमुपस्थितः । महर्षिं च विनयेन पुनः पुनः प्रणतवान् । प्रसन्नो मुनिराशीर्वचनं ददौ ततश्च राजा स्वराजधानीमागत्य तत्रोन्नतसिंहासने राजभवने ऋषिमुपवेशयामास । अर्घ्यपाद्यादिभिश्च प्रसादितवान् ।

ततश्च स्वकीयां परमसुन्दरीं कन्यां वेदमन्त्रोच्चारणैः विधिवत् तस्मै ऋष्यशृंगाय ऋषये प्रददौ ।

तदनन्तरं स ऋषिः अतिसुन्दर्या शान्तया रोमपादेन च सह अयोध्यां प्रस्थितवान् । अयोध्यायां दशरथः विद्याज्ञानरूपाय ऋष्यशृंगाय देव्यै शान्तायै च यथायोग्यमावासादि- व्यवस्थां सेवासत्कारं च कृतवान् । अत्र कविः कथयति यत्

शान्ता दशरथस्यैव पुत्री आसीत्। यां रोमपादः दत्तकपुत्रीरूपेण ग्रहीतवानासीत्। अत एव सा शान्ता स्वपत्युः ऋष्यशृंगस्य स्वागतादिकं दृष्ट्वा परममुदमाप्तवती।

कियत्कालानन्तरं दशरथः स्वकीयेच्छां मुनिं पुरतो निवेदितवान् मुनिश्च सुप्रसन्नो भूत्वा उवाच—चिन्तां माकुरु। नैकमिदं भुवनं किन्तु चतुर्दश भुवनं रक्षयितुं समर्थस्ते पुत्रो भविष्यति। तदर्थं पुत्रेष्टियज्ञं कुरु। दशरथस्तु मनोऽभिलिषितं वरमेवेदं वचनं श्रुत्वा यज्ञोपकरणानि शीघ्रमेव प्रास्तौत्। तदैव ऋष्यशृंगः पुत्रेष्टिपूर्तिकारकमाहुतिम् अग्नौ चिक्षेप।

तदैव तस्मादग्निमुखात् एकः ज्वलद्भास्वरतुल्यो देवः निर्गतः। तस्य हस्ते एकस्मिन् स्वर्णस्थाल्याममृततुल्यमन्नं क्षीरमासीत्।

स च प्रदीप्तपुरुषः तां स्थालीं तत्रैव निक्षिप्य पुनरग्नौ प्रविष्टः। तदा महर्षेराज्ञया दशरथः भागमेकं पत्न्यै कौसल्यायै ददौ, अपरमेकं भागं कैकेयीभार्यायै, अपरञ्चैव भागं भार्यायै सुमित्रायै च ददौ। स्थाल्यां विकीर्णशेषभागं च पुनः सुमित्रायै प्रददौ।

एवं रूपेणायं पुत्रेष्टियज्ञः सुसम्पन्नः सर्वे च ऋषिं प्रणेमुः। आगतेभ्यः ऋषिभ्यो ब्राह्मणेभ्यो यथायोग्यं स्वर्णरत्नभूमिगोदानादिकं दशरथः प्रदत्तवान्।

वसिष्ठाज्ञया च दशरथः ऋष्यशृंगं प्रशस्तिवचनैः सह नमश्चकार। ऋषिश्च प्रसन्नो भूत्वा शान्तया सहितो रथमास्थाय स्वस्थानं ययौ।

अयोध्यायां दशरथस्य तिस्रः पत्न्यः गर्भधारणं कृतवत्यः। पूर्णः समयः समागतः। सर्वे देवा मुदमापुः। शुभे लग्ने नक्षत्रे चैत्रे मासि नवम्यां तिथौ कौसल्या ज्योतिर्मयं पुत्रं जनयामास। यश्च स्वकीयोदरे समस्तं विश्वं लीनीकृत इवासीत्। वेदाश्च यस्यान्तं न पारयामासुः तमेव भगवन्तं विष्णुं दशमासपर्यन्तं कौसल्या गर्भे दधार इति हर्षानन्दचमत्कार- कारिका श्रेयसी प्रेयसी च घटना।

तदनन्तरं पुण्यनक्षत्रे मीनराशौ कैकेयी पुत्रमेकं जनयामास। सुमित्रा च सिंहराशौ मघानक्षत्रे पुत्रं जनितवती, आश्लेषा नक्षत्रे कर्कटराशौ चापरं पुत्रं जनितवती। क्रमश रामः भरतः लक्ष्मणः शत्रुघ्नश्चेति नामानि व्यदधात् दशरथः।

रामस्य जन्म मेषराशौ नवभ्यां तिथौ पुनर्वसु नक्षत्रे कर्कटलग्ने जातम् । चत्वारो ग्रहाः उच्चस्थाने आसन् । तमिलभाषायां मेषवृषादिलग्नमेव क्रमशः चैत्र-वैशाखमासस्थाने कथ्यते । अत एव २४४तमे पद्ये मेषराशेर्नामोल्लिखितम् इयान् विशेषः ।

एवं क्रमेणायोध्यायां कियन्मासपर्यन्तं पुत्रजन्मोत्सवः महता समारोहेण मंगलादि- विधानेन जायमान एवासीत् । इत्थं च देवादिदेवः परब्रह्मरूपः रामः सुखेन अयोध्यायां बाल्यावस्थां यापयन्नासीत् । तत्र हर्षस्य परागः प्रवाहितो जातः ।

"कैयडैप् पडलम्"

(हस्तधारणपटलम्)

अस्मिन् पटले दशरथसमीपं विश्वामित्रस्यागमनं, यज्ञरक्षार्थं रामस्य वनगमनार्थं याचना, विश्वामित्रेण सह रामस्य वनगमनकथा मुख्यरूपेण विद्यते । इयं च कथा वाल्मीकिरामायणवदेव प्रायः वर्तते ।

विश्वमित्रस्यागमनं श्रुत्वा राजा दशरथः यथोचितं सत्कारमकरोत् । ततः विश्वामित्रेणोक्तं यत् सिद्धवने यज्ञमेकं कर्तुमहम् इच्छामि । तत्र राक्षसाः समागत्य तपस्यायां विघ्नान् करिष्यन्ति । अत एव स्वपुत्रं रामचन्द्रं मया साकं गन्तुमाज्ञां देहि । स यज्ञरक्षां विधास्यति । मुनेर्वचनं श्रुत्वा दशरथः स्तब्धो बभूव । अनुभूतं यद् ऋषिः मम प्राणानेव याचते ।

मर्मस्थले प्रविष्टाम् ऋषिवाणीं श्रुत्वा राजाऽवदत्-रामस्तु वयसा बलेन च अल्पीयान् वर्तते । अस्त्रशस्त्राभ्यासोऽपि स्वल्प एव । अत एव स्वयमहं तत्र गत्वा यज्ञरक्षां करिष्यामि । सर्वान् राक्षसान् विमर्द्य निर्विघ्नं यज्ञसम्पादनं कारयिष्यामि । इदं श्रुत्वा विश्वामित्रः क्रुद्धो बभूव ।

क्रुद्धमेवं विश्वामित्रमवलोक्य महर्षिः वसिष्ठोऽब्रवीत्-महर्षे ! किंचित् प्रतीक्ष्यताम् इत्युक्त्वा दशरथमुक्तवान्-विश्वामित्राय पुत्रं देहि तस्य पुत्रस्य दुष्प्राप्यशुभप्राप्तिसमयः समागतः, चिन्तां त्यज । हर्षेण पुत्रं प्रेषय ।

तद्वचनं श्रुत्वा राजा राममानेतुमाज्ञां ददौ। श्रीरामश्च लक्ष्मणेन सहोपस्थितः। महाराजः लक्ष्मणेन साकं रामचन्द्रं विश्वामित्राय समर्पितवान् उक्तवांश्च यत् भवन्त एव एतयोः पितरौ, यथोचितं विधास्यन्ति।

विश्वामित्रः शान्तो जातः। दशरथायाशीर्वचनं दत्वा रामलक्ष्मणाभ्यां सहितः यज्ञार्थं प्रस्थितः। भगवान् रामश्चैकमाश्रमं दृष्टवान् यत्र यज्ञधूमाः व्याप्ताः आसन्। विश्वामित्रं पृष्टवान् किमिदं स्थानम्? विश्वामित्रः उत्तरमुवाच।

तदनन्तरमन्यस्मिन् दिने एकस्मिन्नतिग्रीष्ममये बालुकातप्तप्रदेशे समागतवन्तः। यत्र ऋतवो न जायन्ते, अग्निदेवोऽपि विभेति, सर्वाणि वस्तूनि तत्र दग्धानि भवन्ति। तत्रत्यं तापमनुभूय गजाः पलायन्ते जीवजन्तवश्च ज्वलन्ति।

तत्रोद्विग्नं रामं दृष्ट्वा विश्वामित्रः ताभ्यां 'बला-अतिबला' नाम्नीं विद्यामुपादिशत्। तां विद्यां रामलक्ष्मणौ मनसा चिन्तितवन्तौ। तस्याः प्रसादात् तत् तप्तस्थानं शीतलमभूत्।

ताडकावधः

रामो मनसि स्त्रीहत्या कर्तव्या न वा कर्तव्येति संशये कियत् कालपर्यन्तं प्रतीक्षमाणः तस्थौ। तदा विश्वामित्रेणोक्तं यदेवंभूता पापिनी किं त्वया स्त्री मन्यसे? स्त्री सुलभा शीलसंकोचयुक्तैव "स्त्री"-शब्देन सम्बोध्यते। एवं श्रुत्वा रामस्तां हन्तुमुद्यतः। ताडका च रामोपरि भीषणं त्रिशूलं प्रक्षिप्तवती, रामेण शरैः खण्डितं त्रिशूलं, ततश्च रामः तीक्ष्णं शरमेकं तामुद्दिश्य प्रक्षिप्तवान्। शरेणाहता सा भूमौ निपतिता। रक्तधारा प्रवाहिता। इदं दृष्ट्वा सर्वे देवाः ऋषयश्च रामं ववन्दिरे, तथा सन्तुष्टाः सन्तः स्वयज्ञादिकार्ये संलग्नाः बभूवुः।

"वेलविप्पडलम्"

(यज्ञपटलम्)

अस्मिन् पटले विश्वामित्रस्य यज्ञवर्णनं तत्र राक्षसानामुपद्रववर्णनं तथा श्रीरामचन्द्र- द्वारा राक्षसवधवर्णनं मुख्यमस्ति।

ताड़का-वधानन्तरं तद्वनं देवानां पुष्पवर्षया शीतलं जातम्। देवाः स्वस्वस्थानं प्रत्यागतवन्तः। तत्र महता तपोबलेन श्रेष्ठो विश्वामित्रः रामायानेकानि अमो-

घास्त्राणि प्रददौ। यान्यस्त्राणि कविकम्बनस्याभिभावकस्य "शडैयप्पन-" महाभागस्यामोघशब्दतुल्यानि आसन्। (कम्बन्कवेरभिभावको रक्षकः एकः "शडैयप्पन" महाभागः आसीत्, तं प्रति कृतज्ञताप्रदर्शनार्थं रामायणेऽस्मिन् अनेकस्थाने तेषां नामोल्लेखपूर्वकं तस्य महिमानं प्रदर्शितवानयं कवि-चक्रवर्ती)। (पद्यसं. ४१२)।

ततश्च श्रीरामचन्द्रः बाणेनैकेन मारीचं समुद्रे निक्षिप्तवान्। सुबाहुं च यमलोकातिथिं कारयामास। एवं हि विश्वामित्रस्य यज्ञः निर्विघ्नः सुसम्पन्नः। पुनश्च महर्षिं निवेदितवान् यत् अथ किं कर्तुमाज्ञाऽस्ति। विश्वामित्रोणोक्तम्-भवान् सर्वं कर्तुं समर्थः। अधुना चानेके लोकोपकारिणः कार्यसमूहाः वर्तन्ते। तत्पश्चात् भविष्यति। अधुना शस्यश्यामलक्षेत्रपरि- वृतामुद्यानपरिवेष्टितां पावनमिथिलाभूमिं प्रति प्रस्थानं विधेयम्। यत्र मिथिलेशः यज्ञं कुरुते। प्रथमं तं वयं पश्येम। इति विचार्य ते तत्र प्रस्थिताः। (पद्य ४७०)

"अहलिहैप्प्डलम्"

(अहल्यापटलम्)

अस्मिन् पटले अहल्योद्धारस्य वर्णनं मुख्यं वर्तते। तत्र प्रथमं गंगानद्याः तीरं समागताः। ततः विश्वामित्रेण सह रामः गंगापारं गतवान्। ततश्च विदेहजनकस्य मिथिलादेशं समागतवन्तः। तत्र क्षेत्रस्य तड़ागस्य नद्याश्च विचित्रा शोभा वर्तते यत्र तड़ागे सुकोमलाङ्गीनां नारीणां स्नानस्य दृश्यं च अद्भुतं मनोहारि दृश्यते।

सहसा तत्र एकस्मिन् प्रस्तरखण्डे रामस्य चरणधूलिः कथंचित् संस्पृष्टः। सहसा तत् प्रस्तरखण्डं नारीरूपेण परिवर्तितं, या च अहल्या जाता। ज्ञायते यत् **तस्याः तत्स्वरूपप्राप्तिः अविद्याजन्यं मिथ्यारूपं परित्यज्य विद्यारूपं शरीरं भगवच्चरणारविन्दतः प्राप्तिरिवासीत्।** स्तुत्येयं कविकल्पना।

इदं सर्वम् अवलोक्य रामेण पृष्टः विश्वामित्रः उवाच यत् हे रामचन्द्र! भवत्समीपं स्थिता इयं गौतमर्षेः पत्नी अहल्या वर्तते। एतत् क्रमे विश्वामित्रः अहल्या-इन्द्रयोः सम्भोगकथां गौतमशापकथां तथा च पुनः क्रोधशमनोपरान्तं

गौतमद्वारा कथितं शापविमोचनोपायं च वर्णितवान्। अस्मिन् एव क्रमे शापविमुक्तिघटना वर्णिता। यत्र गौतमेन कथितमासीत् यदा श्रीरामचन्द्रस्य चरणधूलिः, तव प्रस्तरदेहे पतिष्यति तदा त्वम् पुनः पूर्वस्वरूपं प्राप्स्यसि। एवमेव जातम्।

तदा विश्वामित्रेणोक्तम्-महर्षे ! गौतम ! इयं सर्वथा पवित्रतमा अहल्या वर्तते। इमां कृपया स्वीकुर्वन्तु इति। विश्वामित्रस्य वचनं श्रुत्वा गौतमेन तथैव कृतम्। श्रीरामचन्द्रोऽपि तस्य आश्रमस्य परिक्रमां कृत्वा तपोधनेन विश्वामित्रेण सह महामहिमामयीं मिथिलानगरीं प्रति प्रस्थितवान्। (पद्य-५५५)।

"मितिलैक् काद्चिप् पडलम्"

(मिथिलादृश्यवर्णनपटलम्)

अस्मिन् पटले मिथिलादेशे रामचन्द्रस्य प्रवेशानन्तरं तत्रत्यायाः शोभायाः विस्तृतं वर्णनं विश्वामित्रस्य तपसः वर्णनं सीतारामयोः परस्परानुरागवर्णनं विस्तृतरूपेण वर्तते। इदमपि वर्णनं प्रायः वाल्मीकिरामायणवदेव दृश्यते। इदमपि स्पष्टं वर्तते यत् तमिलक्षेत्र- वासिनः महाकविकम्बनस्य मिथिलां प्रति महती श्रद्धा, महान् आदरः च विद्यते। यद्यपि मिथिलां मैथिलीं च विना रामकथा कथमपि परिपूर्णा भवितुं नार्हति। तथापि यथा अयं कविचक्रवर्ती विशेषरूपेण मिथिलां प्रति अनुरागं स्वकीयविशाले महाकाव्ये प्रदर्शितवान् सोऽनुरागः महत्त्वपूर्णः तथ्यात्मकश्च।

अत्राप्रतिमानिन्द्यसुन्दरी सीता विद्यते यस्याः सौन्दर्यस्य निर्माणं स्वयं कामदेवोऽपि अमृतमिश्रितरंगैः तूलिकया चित्रीकर्तुं न समर्थः। एवंभूता सीता यत्र तिष्ठति सा मिथिला सद्यः भगवत्या लक्ष्म्याः पीठस्थानमिव विराजते शोभते च।

ततश्च शतानन्देन विश्वामित्रस्य महत्तपसो विस्तरेण वर्णनं श्रीरामाय श्रावितम्। यत्र महर्षिः वसिष्ठस्य कामधेनुः सुरभेः (गोः) प्रतापस्य वर्णनं त्रिशंकोः स्वर्गगमनागमनादि वर्णनमतिविपुलतया विद्यते। राज्ञोऽम्बरीषस्य यज्ञवर्णनं तत्र शुनःशेपब्राह्मणपुत्रस्य यज्ञे बलि-वर्णनं विश्वामित्रद्वारा मन्त्रप्रदानेन शुनःशेपस्य

प्राण-रक्षणादिकथा च प्राय: वाल्मीकिरामायण- वदेवात्रापि विद्यते। (येषां वर्णनमत्र विस्तारभयेन त्यज्यते।)

ततश्च रामचन्द्रो विश्वामित्रेण साकं मिथिलाराजधान्यां जनकपुर्यां रात्रिविश्रामं चकार।

"कुलमुरैकिलत्तुप्पडलम्"

(वंशक्रमपरिचयपटलम्)

अस्मिन् पटले राज्ञो दशरथस्य राज्ञ: जनकस्य च परस्परं वंशानुक्रमवर्णनं सविस्तरमस्ति। इयं च प्राचीना परम्परा यत्र विवाहात्पूर्वमुभयोर्वंशस्य परिचयो जायते। विशेषतो मिथिलायामियं प्रक्रियाऽनिवार्या विद्यते। महर्षिवाल्मीकिना स्वकीयरामायणे सुविशदमस्य वंशानुक्रमपरिचयस्य विवरणं प्रदत्तम्।

इत्थं हि विश्वविख्याते मूर्धन्ये सूर्यवंशे सञ्जातोऽयं रामचन्द्र: भगवतो विष्णोरेव अवतार: इत्यपि संकेतितं जनकं प्रति विश्वामित्रेण। अस्मिन् रामायणे वंशपरिचय: धनुर्भंगात् पूर्वमेव वर्तते। किन्तु वाल्मीकिरामायणे धनुर्भङ्गानन्तरं वर्णितोऽस्ति। अत्र च जनकस्य वंशवर्णनं न दृश्यते। एतावान् भेद: कथायां विद्यते।

"कर्मुहप् पडलम्"

(कार्मुकपटलम्)

तत्र सभायां राजाज्ञया मन्त्रिगण: उद्घोषयामास यत् य: परमेश्वरस्य शिवस्य इदं धनु: उत्थापयिष्यति तेनैव सह सीताया: विवाहो भविता। तत्र महाबलशालिन: षष्टि–(६०) सहस्रं वीरा: मिलित्वा येन केनापि प्रकारेण तद्धनु: आनीय सभायां समुपस्थापितवन्त:। (अत्र वाल्मीकि: पञ्चसहस्रं वीराणामेव उल्लेखं कृतवान्)।

राजा जनक: एकत्र धनु: विलोकयति अपरत्र च सीताम् अवलोकयति अर्थात् चिन्तामग्न: आसीत्। तद्दृष्ट्वा शतानन्द: अवादीत् यत् शम्भो: इदं धनु:। जनकस्य पूर्वजाय प्रददौ। यज्ञार्थं स्वर्णमणिमयमण्डितहलेन भूमिं कतिवारं कर्ष-

यामास तत्रैव हलस्य सीतेन (फाल'-इति भाषायाम्) इयं कन्या प्रकटिता या महती कान्तिमयी साक्षात् पृथ्वीस्वरूपा आसीत्। यस्याः नाम सीता जाता (यतो हि सीतेन-हलस्य अग्रभागेन-जाता या सा सीता इति विग्रहः ।)

रामचन्द्रः सहसा अनायासेन शिवधनुः उत्थाप्य भग्नं कृतवान् । आकाशात् पुष्पवृष्टिर्जाता । सर्वे आनन्दनिमग्नाः बभूवुः । मध्ये च तत्र प्रासादे स्थिताः नारीणां समूहाः सुचिन्तिताः आसन् । यदि रामः यः धनुरुत्थापने अन्तिमः वीरः अस्ति, असफलो भवेत् तर्हि कस्तूरी-कुङ्कुमयुक्ता सुगन्धितसुदीर्घकेशपाशवती सीता अग्नौ प्रविष्टा भविष्यति इति चिन्तायाः विषयः । किन्तु तदैव रामेण धमुर्भंगः कृतः । सर्वे आनन्दसागरे निमग्नाः जाताः । सर्वाः सुन्दर्यः नार्यः स्वकीयपतिम् उत्साहेन प्रसन्नतया च आलिङ्गनं चक्रुः । स्वर्गात् देवाङ्गनाः च धनुर्यज्ञं द्रष्टुकामाः मिथिलायां समागतवत्यः आसन् । ताश्च रामस्य प्रशंसां कृत्वा निवर्तयामासुः ।

एवंरूपेण धनुर्भङ्गः जातः । जनकेनोक्तम्-हे महर्षे ! तव पुत्रस्य (शिष्यस्य) विवाहः अद्यैव भवेत् इति मे इच्छा । तत्र किं करणीयमित्यादिशन्तु । विश्वामित्रेणोक्तम्-दूतान् प्रेषयतु अयोध्यानगरीं प्रति । शीघ्रमेव दशरथः आमन्त्र्यताम् । इदमेव सर्वप्रथमं करणीयम् । जनकेन तथैव कृतम् । दूतांश्च अयोध्यां प्रेषितवान् ।

"एलुचिप् पडलम्"

(प्रस्थानपटलम्)

राज्ञः जनकस्य दूताः वायुवेगेन रथमास्थाय अयोध्याम् आगतवन्तः । तत्र मृदङ्ग- वाद्यादिनादाः प्रतिध्वनिताः आसन् । राजद्वारे च दशरथदर्शनार्थं समागतानां नृपाणां महती पङ्क्तिः आसीत्। अन्तःपुरं गत्वा तत्रत्यद्वारपालाः जनकपुरीतः समागतानां दूतानां सूचनां राज्ञे दशरथाय प्रदत्तवन्तः त्वरितमेव तेषाम् अन्तःपुरप्रवेशार्थम् आदेशो जातः । ते दूताः तत्रागत्य विधिवत् दशरथं प्रणेमुः संस्तुतिं च चक्रुः । ततः रामचन्द्र-सम्बन्धिनं सर्ववृत्तान्तं विश्वामित्रेण सह अयोध्यातः प्रस्थानादरभ्य मिथिलागमनधनुर्भङ्गवृत्तान्तपर्यन्तं निवेदयामासुः । जनक-द्वारा प्रेषितं निमन्त्रणपत्रं च समर्पितवन्तः । तत् पत्रं तत्रोपस्थिताः सर्वे सभासदः क्रमशः पठितवन्तः । पठित्वा दशरथसहिताः सर्वे राजानः आनन्दातिरेके निमग्नाः सञ्जाताः ।

विशेषः

अस्मिन् रामायणे विशेषरूपेण कौशल्या-कैकेयी-सुमित्राः तिस्रो मातरः सहस्रशः युवतयः नार्यः सुन्दर्यः किशोरिण्यश्च मिथिलां प्रति प्रस्थिताः इति नवीन-यात्रावृत्तान्तं विद्यते। यद्वर्णनं वाल्मीकि-रामायणादिप्रसिद्धसंस्कृतरामायणेषु न दृश्यते। (इयं च नवीना कथा शैली)।

अत्रायं विशेषः वाल्मीकिरामायणप्रभृतिषु संस्कृत-रामकाव्येषु चान्द्रशैलस्य पृथक् अस्तित्वं कुत्राऽपि न दृश्यते। इदं तु कम्बन् कवेः स्वकीया मधुमयी कल्पना काव्यप्रतिभा च विद्यते। इतः परं अग्रे क्रमशः चतुर्षु पटलेषु शैलदर्शनपटले च केवलं पुष्पचयनपटले जलक्रीड़ापटले पानक्रीड़ापटले च केवलं सौन्दर्यशोभायाः शृङ्गारस्य प्रगाढं वर्णनं विद्यते।

एतेन निश्चीयते यत् अयं कविचूड़ामणिः कथं सौन्दर्यप्रियः शृङ्गारवर्णने निपुणश्चासीत्। अत एव एतेषां चतुर्णां पटलानाम् अत्र एकत्रैव संक्षिप्तवर्णनं विधाय स्वागतपटलं वर्णयामि यतः आरभ्य जनकद्वारा दशरथस्य स्वागतादि वर्णनं विद्यते।

"उलावियर् पडलम्"

(वीथीभ्रमणपटलम्)

अस्मिन् संसारे ये च प्रसिद्धाः धर्मपन्थानो विद्यन्ते तेषु स्वस्वमतानुसारमेव परमेश्वरस्य च कल्पनां कुर्वन्ति उपासनां विदधति सिद्धिं च लभन्ते। अत्रत्यनारीणां मध्ये काऽपि रामस्य हस्तमेव दृष्टवती, काऽपि पदमेव, काऽपि चरणमेव एवं रूपेण या यमेवाङ्गं दृष्टवती तथैव तत्रैव लीना जाता। सम्पूर्णरूपं न कयाऽपि दृष्टम्। (तात्पर्यमिदं यत् रामस्य प्रत्यङ्गं सुन्दरं ब्रह्मरूपमेवासीत् तत्र तत्र सा लीना जाता। तस्यैव तुलना पद्येऽस्मिन् विद्यते। पद्ये-११५८) काऽपि एकाकिनी एव गच्छति, काचित् सखीभिः सह काचित् पतिभिः सह। एताः सर्वाः सर्वथाऽतितमां शोभामादधानाः वीथ्यां स्थिताश्चलिताश्चासन्।

"कोलङ्गणुंपडलम्"

(शृंगारसज्जापटलम्)

अस्मिन् पटले विवाहार्थं सीतायाः शृङ्गारसज्जायाः मुख्यतमं सुमधुरं मनोहारि वर्णनमस्ति । शृङ्गारेऽस्मिन् मिथिलापरम्परासहितं विशेषतः तमिल-परम्परया शृङ्गारवर्णनं दृश्यते ।

सर्वप्रथमं केशविन्यासस्य वर्णनमेवं विद्यते । पञ्चप्रकारेण केशविन्यासो विधीयते । मस्तकपृष्ठभागे जूटिका (जूड़ा) कुण्डलिनी (जूटीबंध) वेणी (एक-जूटीबंधीकृतावेणी), कुञ्चिता (घुंघराला-जूड़ा) तथा विकीर्ण-केशपाशा (खुले बाल) तथा च मस्तकाग्रभागे पट्टिका (पाटी) पत्रिका (पत्तीदारकेश) मध्यसीमन्तः (बीच मे सीथ) वामसीमन्तः (बायें सीथ) दक्षिणसीमन्तः (दायें सीथ) इति च सीतायाश्च विशालाः केशपाशाः सन्ति । तेषु सर्वप्रकारकं केशविन्यासं भवितुमर्हति । तत्र यथायोग्यं समयानुकूलं सर्वविधं केशविन्यासं कृतवती स चेटी-सखी (पद्य-१२०५) ।

तदा चक्रवर्ती सम्राट् दशरथः विश्वामित्रं पप्रच्छ । विवाहस्य शुभलग्नः समयश्च कः ? विश्वामित्रेणोक्तम्-विवाहस्य शुभदिनं श्वः विद्यते । तच्छ्रुत्वा सर्वेऽद्य स्वस्व वासस्थानं ययुः ।

"कडिमणप् पडलम्"

(शुभविवाहपटलम्)

मिथिलावासिनः सर्वत्र मार्गे वीथ्यां चन्दनागुरुसुगन्धीनि प्रक्षिपन्ति पुष्पाणि च विकिरन्ति जलानि सिञ्चन्ति । प्रासादाग्रभागे विभिन्नरत्नजटितमालाः विलम्बिताः सन्ति । तात्पर्यमिदं यत् तत्र नरनार्यः विभिन्नकार्येषु संलग्नाः तिष्ठन्ति । सर्वे चारणादयः विविधगीतवाद्यादिकं कुर्वते ।

विवाहवेद्यां वेदोक्तं गंगाजलं पवित्रनदीनां जलं, शंखपुष्पादिकं चानीतम् । वेदज्ञाः महान्तो मनीषिणः समुपस्थिताः बभूवुः । रामेण च वैवाहिकं पवित्रं मुकुटं धारयामास । स्वकीयवंशपरम्परानुसारं परमज्योतिरूपं श्रीरङ्गनाथदेवं पूजितवान् (पूर्वमेव प्रतिपादितमस्ति यदयं श्रीरङ्गनाथदेवः तमिलक्षेत्रस्य पूजितो

विष्णुतुल्यः) रामश्च 'किंपुरी' नामकमाभरणं धृतवान् । अस्याभरणस्य विवाहकाले परिधानपरम्परा "तमिलक्षेत्रे" विद्यते । सीता च तत्रानीता ।

गुरुः वसिष्ठः बालुकानिर्मितस्थण्डिले कुशदर्भान् विकीर्य पुष्पांश्च प्रसार्य विधिवत् अग्निस्थापनं चकार । (इयं परम्परा मिथिलायामद्याप्यनिवार्यरूपेण विद्यते) वेदमन्त्रद्वारा हवनं चकार ।

तदा राजा जनकः रामचन्द्रसमीपमागत्य रामस्य हस्तकमले जलं दत्वा विधिवत् सीतां ददौ । सर्वत्र मंगलवाद्यानि गीतानि गायन्ति सुवासिन्यः । सधवानार्यश्च 'जीव' नामकगीतं गायन्ति स्म । इयमपि परम्परा मिथिलायां वर्तते । संकोचशीला सीता रामेण सहाग्निपरिक्रमां कृतवती । अनुभूयतेऽत्र लोकैः यत् **"सीतारामयोः विवाहः जीवात्मनोः संयोगरूप एव" । मधुमयी कल्पनेयम् ।**

अन्ये च विवाहविधयस्तत्र सुसम्पन्नाः जाताः । सीतया सह रामः स्वगृहे (विवाहोपरान्तं सुसज्जितभवने—कोबरगृहे) समागतवान् । तदा प्रथमं कौशल्यां कैकेयीं सुमित्रां च प्रणामं कृतवान् । सीता च तथैव कृतवती । मातरश्चा भूतपूर्वालौकिकानन्दहर्षपूर्णाः समभूवन् । अशेषाशीर्वचनं च प्रददुः । चतुर्दिनपर्यन्तं विवाहविधयः संजायन्ते स्म । यतो हि मिथिलायां चतुर्थीकर्मपर्यन्तं (विवाहस्य चतुर्थदिनपर्यन्तं) विवाहशृङ्खला वर्तते एव (अत्रापि कविः मिथिलारीतिमेव वर्णितवान् ।)

ततश्च जनकस्यैकाऽपरा दुहिता ऊर्मिला आसीत् तया सह लक्ष्मणस्य, स्वकीयानुजस्य द्वे कन्ये-माण्डवी, श्रुतिकीर्तिश्च विद्येते । तयोः साकं क्रमशः भरतस्य शत्रुघ्नस्य च विवाहः विधिवत् दशरथस्य गुरोः वसिष्ठस्य पूर्वाज्ञया सुसम्पन्नो जातः । इत्थं हि चत्वारो भ्रातरः राम-भरत-लक्ष्मण-शत्रुघ्नाः क्रमशः सीता-माण्डवी-ऊर्मिला-श्रुतिकीर्तिभिः साकमत्रैव विवाहिताः बभूवुः इति सर्वं चमत्कारपूर्णम् । राजा दशरथः सविशेषं दानं ददौ ।

अत्र विशेषः

विवाहोपरान्तं वरः कियन्ति दिनानि श्वसुरालये तिष्ठति । इयं व्यवस्था परम्पराप्रथाऽद्यापि मिथिलायां प्रतिगृहमस्ति । वरस्य पिता च द्वि-त्रिदिनपर्यन्तं तिष्ठति (इमां परम्परामाश्रित्य एव तमिलक्षेत्रीयः कम्बन् कविरत्र मिथिलाप्रकरणे प्रारम्भत एव सर्वक्रियाकलापवर्णनं मिथिलानुसारं व्यदधात्। इति अतिशयेन महत्त्वपूर्णं कविकर्म विधाय कम्बन् कविः निष्पक्षतथ्यपूर्णघटनां वर्णयन् कविमूर्धन्यो बभूव ।

"परशुरामप् पडलम्"

(परशुरामपटलम्)

ततश्च दशरथोऽपि प्रस्थानस्याज्ञां प्रदाय रथमारुरोह । प्रस्थानवार्तां श्रुत्वा मिथिलावासिन्यः नरनार्यः विदीर्णाः संजाताः । जनकस्तु विदीर्णः विकलश्चासीदेव । यथायोग्यमभूतपूर्वं सत्कारं विधाय प्रस्थानं कारितवान् ।

मार्गे महान् प्रचण्डतेजस्वी क्रोधमूर्तिः परशुरामः सहसा समुपस्थितः । तं दृष्ट्वा दशरथः कम्पयामास । किं करिष्यति किं कथयिष्यत्ययं सहजकोपोऽयं परशुधारी इति चिन्तामग्नः दशरथः परशुरामसमीपमागत्य संस्तुतिं चकार । किन्तु तस्य क्रोधो न शान्तो जातः ।

परशुरामः रामं प्रति उक्तवान्—यदि सामर्थ्यं शक्तिश्च विद्यते तर्हि गृहाणेदं धनुः तथा प्रत्यंञ्चासन्धानं कुरु । यदि त्वमेवं करिष्यसि तर्हि युद्धस्य चर्चामहं त्यक्ष्यामि । (पद्य सं १३७०) रामश्च मन्दं मन्दं हसन् धनुषि प्रत्यञ्चामाधाय शरं विनियोजयामास ।

परशुरामोऽवदत्-नीतिस्वरूप ! राम ! मह्यं न क्रुध्यतु, मया ज्ञातं यत् भवान् सर्वलोकेश्वरः परब्रह्मरूपः वेदाधारः । शिवधनुर्भङ्गस्तु उचित एवासीत् । इदं शरसन्धानंव्यर्थं न स्यात् अत एव मम तपोबलं नीत्वा परावर्तयतु बाणम् । रामस्तथैव विधाय परावर्तितवान् स्वबाणम् । परशुरामश्च स्तुतिं चकार । सर्वस्वं निजतपः

परित्यज्य गते परशुरामे रामः पितरं निकषा समागतवान्। (अत्रत्या कथा वाल्मीकिरामायणवदेव । ततश्च सर्वेऽयोध्यासमीपमागतवन्तः) ।

॥ इति बालकाण्डसंक्षिप्तकथा ॥

वाल्मीकिकम्बरामायणयोः बालकाण्डे कथावर्णनवैशिष्ट्यम्

वाल्मीकि-रामायणे स्कन्दपुराणान्तर्गतनारदसनत्कुमारसंवादवर्णन-स्वरूपं कथावर्णनं कथाश्रवणमाहात्म्यं च विद्यते। वाल्मीकिः महर्षिनारदमुखात् रामस्यातिविशिष्टनीतिशास्त्रशस्त्रसदाचारशिष्टतावर्णनं श्रुत्वा साक्षाद् ब्रह्मणः समा-देशेन रामायणं लिखितवान्। यत्र सर्वं वर्णनं मर्यादापुरुषरूपस्य रामस्य वर्तते। रामस्य भगवत्ता प्रदर्शनं तु अहल्योद्धारवर्णने प्रकारान्तरेण दृश्यते। काव्यसुषमा तु सर्वथा गरीयसी।

विशालं तमिल-कम्बरामायणं तु वाल्मीकिरामायणमधिकृत्यैव निर्मितं कविचक्र- वर्तिना भक्तशिरोमणिना कम्बन्-कविना। प्राकृतिकदृश्यवर्णने नदीपटल-देशपटल-राज्यशासनपटलादिवर्णनं विद्यते। स्वकीयलघुतां प्रदर्शयन् कविः कालिदासमप्यतिशेते। भक्तिशृंगारयोः सामञ्जस्यं तु भारतीय-वाङ्मयकाव्येषु नेदृशं कुत्रापि दृश्यते। पदे पदे श्रीरामचन्द्रस्य नारायणत्वं प्रतिपाद्यते। विभिन्नरस-वर्णननैपुण्यं त्वनिर्वचनीयमेव। मूलवाल्मीकिकथावस्तुना यत्र तत्र भिन्नाऽस्ति या मनोहारिणी विद्यते। सर्वत्र मिथिला- परम्परायाः तमिलक्षेत्र-विशेषतायाश्च सहैव वर्णनं तु स्वर्णे-सुगन्धिरिव प्रतिभाति।

वाल्मीकिरामायणे अयोध्याकाण्डम्

अयोध्याकाण्डमेव वाल्मीकिरामायणस्य सर्वस्वं, रामायणानाञ्च हृद-यमस्तीति मम विचारोऽन्येषां समीक्षकाणामपि मतम्। यतो हि काण्डेऽस्मिन् समग्रसत्यनिष्ठामर्यादाश्रद्धाभक्तीनां समावेशः। सहैव समस्तसमाजवादस्य साम्राज्यवादतिरस्कारस्य च कथाऽभूतपूर्वा श्रेयसी च विद्योतमाना विद्यते। महतोऽगाधस्यास्य काण्डस्यातिसंक्षिप्तविवरणमत्र प्रस्तूयते।

अत्रेदं ज्ञेयम्-रामचन्द्रः सद्यः सनातनविष्णुस्वरूप एवास्ति यतो हि—

यथा

स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः।
अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः॥

अयोध्याकाण्डे २/७

रामराज्याभिषेकस्य सर्वे पार्षदा जनपदाश्च समर्थितवन्तो दशरथस्य प्रस्तावम्। एवं हि दशरथो रामस्य राज्याभिषेकार्थं निश्चयं चकार च। केवलं शीघ्रतायां जनकः केकयनरेशं भरतशत्रुघ्नौ च न सूचितवान्।

यथा

न तु केकयराजानं जनकं वा नराधिपः।
त्वरया चानयामास पश्चात्तौ श्रोष्यतः प्रियम्॥

अयोध्याकाण्डे १/४८

अत्रेदमेकं रहस्यम्

देवादयः दशरथं मातुलगृहात् भरत-शत्रुघ्नयोरानयानार्थं केकयनरेशं, तथा मिथिला धिपतिं जनकं च सूचयितुं नादिष्टवन्तः। यतो हि यदि भरतः समागमिष्यति तदा रामवनगमनं न सम्भवम्, ततश्च देवकार्यं कथं स्यात्। उपर्युक्तपद्ये यद्यपि शीघ्रता एव कारणत्वेनोक्तं किन्तु रहस्यमिदमेव। तथा च देवाः सर्वे विचार्य सरस्वतीमेव मन्थराहृदि प्रवेशयामासुस्तत्र मन्थरामुखेन सरस्वती वदति।

मन्थरा रामराज्याभिषेकः कैकेय्याः कृतेऽनिष्टकारकः भरतस्य तिरस्कारकः इत्यादिरूपेण कुटिलषड्यन्त्रेण कैकेयीं कोपभवने प्रेषितवती।

दशरथश्चेदं श्रुत्वा विस्मितः सन् त्वरितमेव कोपभवनमागत्य कैकेयीं प्रतिबोधितवान् किन्तु कैकेयी हठधर्मितामाश्रित्योक्तवती यत् पुरा देवासुरसङ्ग्रामे मह्यं वरद्वयं प्रदत्तं भवता, तत् वरद्वयमधुना प्रयच्छ। दशरथः प्रसन्नो भूंत्वा स्वीकृतवान्।

कैकेयी रामाय चतुर्दशवर्षं यावत् वनवासं भरताय राज्यदानं च ययाचे। एवं श्रुत्वैव दशरथः स्तब्धः विमूढः संजातः। विविधमधुरवचनैः विनयेनानुनयेन कैकेयीं प्रतिबोधयितुं प्रयत्नशीलो राजा विफलो जातः।

इदं श्रुत्वैव रामस्त्वरितमेव सहर्षं वनगमनं स्वीकृत्य मातुः कौशल्यायाः आज्ञां ग्रहीतुं ययौ। समाचारमिमं ज्ञात्वा कौशल्या-सुमित्रादयस्तत्रोपस्थिताश्च सर्वाः मूर्च्छिताः संजाताः। रामश्व ताः प्रबोधितवान्। पुनश्च सर्वाः विलपन्त्यः विक्षिप्ततुल्याः बभूवुः।

अथ कौशल्या रामवनगमनार्थं मंगलकामनापूर्वकं स्वस्तिवाचनं कृतवती। रामस्तां प्रणम्य सीतां निकषा समागतवान्। सीता च तां घटनां श्रुत्वा विचलिता जाता। तां प्रतिबोधयन् रामस्तामयोध्यायामेव स्थातुमुपदिदेश। किन्तु सीतया उपदेशोः न स्वीकृतः। रामेणैव तस्याग्रहः स्वीकृतः।

ततश्च लक्ष्मणः सीतारामाभ्यां सहितो विचित्रवेदनापूर्णपरिस्थितौ सर्वेभ्यः आशीर्वचनं गृहीत्वा वनं प्रतस्थे । प्रस्थानसमये पुरवासिनं प्रति निवेदितवान् यत् महाराजस्य भरतस्य च सर्वथा सुरक्षा विधेया, प्रेमभावश्च रक्षणीयः ।

रामश्चायोध्यां पश्चिमप्रणामं कृत्वा वनं जगाम । ततश्च शृंगवेरपुरं प्राप्य रात्रौ तत्र विश्रामं चकार । तत्र निषादराजेन गुहेन सह साक्षात्कारः परिचयश्च जातः । निषादेन महान् सत्कारः कृतः । सर्वैः परिजनैः सह सेवायां सुरक्षायां च तत्परो जातः ।

प्रातरुत्थाय रामो नित्यक्रियां विधाय गंगापारगमनार्थमुद्यतोऽभूत् । निषादश्च कर्णधारसहितां मनोहरामेकां तरणिमानयनार्थमादिष्टवान् । तस्य सचिवेन तथैव कृतम् नौका च तत्रोपस्थिता । रामचन्द्रेण च सुमन्त्रः विविधसम्मानपूर्णवचनैः साकेतपुरीं प्रत्यावर्तितः, बहुशः सन्देशाश्च कथिताः ।

अत्र सुमन्त्रं रामचन्द्रः कारुणिक-व्यावहारिकसर्वोच्चचारित्रिकभावनापूर्णसन्देशं मातरं पितरं भ्रातरं पौरजनान् प्रति कथितवान् । सा चोक्तिः सा च भव्यभावना महती स्पृहणीया श्रेयसी प्रेयसी च ।

तदनन्तरं नावमारुह्य रामः सीतालक्ष्मणसहितः गंगामध्यगतः भगवतीं भागीरथीं प्रार्थयामास यत् चतुर्दशवर्षाणि वने व्यतीत्य परावर्तनसमये भवत्याः पूजनं विधाय ब्राह्मणेभ्यो दीनेभ्यश्च सहस्रगवादिदानं च करिष्ये ।

अत्र रामद्वारा प्रेषितसन्देशवाक्यै र्ज्ञायते यत् मातरं, मातृभूमिं, पितरं, प्रजाजनान् प्रति कीदृशी कोमलभावना भगवतो रामचन्द्रस्य । भावनेयं मायामयी ।

विशेषः

अथ च राम केवटवार्ताप्रसंगोऽपि नास्मिन् रामायणे वर्तते । आनन्द-अद्भुत-बाल-रामायणानीव नास्य चर्चा ।

अथ रामः सीतालक्ष्मणाभ्यां सहितः पावने प्रयागे गंगा-यमुना-सरस्वतीसङ्गमे त्रिवेणीमवतीर्य पारं कृत्वा भरद्वाजर्षेराश्रमं प्राप्तवान् । तत्र भरद्वाजद्वारा कृतातिथ्यं सादरं सबहुमानं स्वीचकार । भरद्वाजेन शोभने चित्रकूटे निवासार्थं

निर्दिष्टः। तत्र विचित्रकूट-चित्रकूटाचलस्थप्रवहमानाया मन्दाकिन्या वर्णनं च प्रेयस्करम्। भरद्वाजेन स्वस्तिवाचनपूर्वकं चित्रकूटमार्गश्च दर्शितः। ससीतलक्ष्मणो रामश्चित्रकूटवनशोभां पश्यन् तत्रागतः।

यथा

सुरम्यमासाद्य तु चित्रकूटं
नदीं च तां माल्यवतीं सुतीर्थाम्।

ननन्द हृष्टो मृगपक्षिजुष्टां,
जहौ च दुःखं पुरविप्रवासात्॥

अयोध्याकाण्डे ५६/३५

(एकदा पुनराकलयन्तु भवन्तः अयोध्यास्थितिं मनीषिणो भक्तश्रद्धावन्तश्च।) सुमन्त्रोऽयोध्यां प्रत्यागत्य श्रीरामचन्द्रसन्देशं पित्रे दशरथाय, मातृभ्यः पुरवासिभ्यश्च व्याजहार। श्रुत्वा च दशरथो मूर्च्छामवाप। कौसल्यादिमातरश्चार्तनादं कुर्वन्त्यः करुणासागरं प्रवाहितवत्यः।

अत्र केकैय्या साकं विस्तृते वार्ताक्रमेऽन्तिमक्षणे दशरथः प्रोवाच—त्वामहं भार्यां बान्धवीं न मन्ये। तथा तवोदराज्जन्मग्रहणं कृतवन्तं भरतमपि पुत्रं न मन्ये। एवमुक्त्वा दशरथः प्राणान् तत्याज। मातुलग्रहादागमनानन्तरं भरत एवान्तिमदाहसंस्कारं श्राद्धादिकं कृतवान्। तदारभ्य दश दिनपर्यन्तं भूमौ एव शयानः भरतः सर्वं श्राद्धकृत्यं सम्पादितवान्।

(अयोध्याकाण्डे-४२/६-७२; ७६/२३)

भरतशत्रुघ्नौ साकेतं प्रति प्रस्थितौ। अयोध्यां प्रविश्य त्वरितमेव कैकेयिभवनं प्रविष्टो भरतो मात्रा पितुः परलोकगगनस्य दुःखदं समाचारं ज्ञात्वा विललाप।

तदनन्दरं वसिष्ठाज्ञया भरतो दशरथस्यान्तिमसंस्कारादिकं विधिवद् विधाय श्राद्धे च ब्राह्मणेभ्यो बहुधनानि प्रदत्तवान् । मध्ये च क्रुद्धः शत्रुघ्नश्च कुब्जां मन्थरां ताडितवान् भरतेन निवारितश्च ।

अथ श्राद्धोपरान्तं वसिष्ठो भरताय राज्याभिषेकार्थं मन्त्रिणमादिष्टवान् । भरतेन तन्न स्वीकृतम् । रामस्य वनात् प्रत्यावर्तनार्थं सर्वैः परिजनैः गुरुवसिष्ठेन च साकं वनगमनार्थमुद्यतो बभूव ।

एवं विचार्य भरतः परिजनैः सह वनं प्रस्थाय रात्रौ शृंगवेरपुरे स्थितः । तत्र निषादराजः स्वसैन्यान् तटरक्षार्थं सावधानं कृत्वा स्वयं भरतसमीपमाययौ । स्वकीयातिथ्यं स्वीकर्तुं निवेदितवान् । भरतेन स्वीकृतः । एवं च निषादराजेन सह भरतस्य सुविशद्ो वार्तालापो जातः । भरतश्च शोकमग्नो जातः । निषादेन रामचन्द्रस्यावासादिविषये सूचितः ।

ततश्च भरतः सपरिजनो भरद्वाजस्याज्ञां प्राप्य चित्रकूटं प्रतस्थे । तत्र चित्रकूटे रामः सीतायै चित्रकूटस्य शोभां दर्शयन् मन्दाकिन्या महात्म्यं च वर्णयन् आसीत् ।

अथ भरतः शत्रुघ्नेन समस्तपरिजनेन सहितः श्रीरामचन्द्रं निकषा समागत्य तत्रत्य- पर्णशालामवलोक्य रुदन् विलपन् रामचन्द्रचरणारविन्दे पपात । रामश्च तमुत्थाप्यालिङ्गनं चक्रे ।

रामचन्द्रो वनागमनकारणं पृष्टवान् ।

भरतेनोक्तं यत् भवन्तः कृपयाऽयोध्यां प्रत्यावर्त्य स्वराज्यं स्वीकुर्वन्तु । रामेण तन्न स्वीकृतम् । तदा भरतमुखेन पितुर्मरणसमाचारं ज्ञात्वा रामो विललाप । सर्वे तं प्रबोधयामासुः । ततो रामः पित्रे जलाञ्जलिं दत्वा यथाविहितं पिण्डदानादिकं कृतवान् ।

पुनश्च भरतः स्वयं वसिष्ठादिद्वारा च भूयोभूयः प्रत्यावर्तयितुं प्रयासं चकार; किन्तु रामेण न स्वीकृतम् । अपि तु भरतमेव सर्वथा प्रबोध्य स्वपादुकां भरताय प्रदाय अयोध्यां परावर्तितवान् ।

यथा

सोऽधिरुह्य नरव्याघ्रः पादुके व्यवमुच्य च।
प्रायच्छत् सुमहातेजा भरताय महात्मने ॥

अयोध्याकाण्डे ११२/२२

अथ भरतश्चरणपादुकामादाय स्वजनैः सैन्यैश्च साकमयोध्यां प्रस्थितः। अयोध्यामागत्यान्तःपुरदुर्दशां दृष्ट्वाऽतिशोकाकुलो जातः।

ततश्च भरतो नन्दिग्रामं गत्वा रामचन्द्रस्य चरणपादुकामेव राज्यसिंहासने संस्थाप्य तां प्रतीकं मत्वा दैनन्दिनराज्यशासनं प्रारेभे।

अत्र चित्रकूटे स्थितो रामः अत्रिमुनेराश्ररममागतवान्। अत्रिः स्वागतं विदधे। अनसूया च सीतायै उपदेशम् आशीर्वचनं च दत्तवती। एवं च तत्रैवात्रेराश्रमे विश्रामं कृत्वा प्रातः प्रस्थानार्थमाज्ञां नतमस्तकेनादाय प्रतस्थे।

अस्मिन् चित्रकूटप्रकरणे निषादराजेन संपर्कस्तथा रामभरतमिलनप्रसंगस्तु वस्तुतोऽस्य काण्डस्य रामायणस्य च प्राणमयः पावनोऽलौकिको गभीरतमः परिदृश्यः।

॥ इति अयोध्याकाण्डम् ॥

कम्बरामायणे अयोध्याकाण्डम्

अस्मिन् काण्डे प्रार्थनापद्यातिरिक्ततया त्रयोदश- (१३) पटलानि सन्ति। प्रतिपटलं बालकाण्डवद् विभिन्नघटनावर्णनपूर्णं विद्यते। घटनाचक्रस्तु वाल्मीकिरामायणवदेव प्रायः सर्वत्र दृश्यते। यत्र तत्र च महत्परिवर्तनमपि अवलोक्यते। तेषामुल्लेखस्तत्र तत्र कथा-प्रसंगे वर्तते।

रामभरतलक्ष्मणशत्रुघ्नानां विवाहोपरान्तं मिथिलातः पुत्रवधूभिः साकं परावर्तितो दशरथः सानन्दं राज्यशासनं कुर्वन्नासीत्। बालकाण्डस्यान्तिमपद्येषु दशरथेन भरतः स्वमातुलेन सह मातुर्जन्मभूमि-(ननिहाल) गमनार्थमादिष्टः। भरतस्तत एव केकेयदेशं प्रति प्रस्थितः। (अत्रेयं नूतना कथा। वाल्मीकिरामायणे भरतः अयोध्यामागत्य कियद्दिनानन्तरं पितुराज्ञया मातुलेन सह मातामहनिकेतनं गतवान् एवं रूपेण कथाऽस्ति।)

एकदा राजा दशरथः स्वकर्णमूले द्वौ श्वेतकेशौ दृष्टवान्। तेन चिन्तितं यद् वार्धक्यं समागतं पुत्राय राज्यं प्रदाय वनं गत्वा तपः कर्त्तुं समयः समुपस्थितः। अत्रेयं कल्पना क्रियते यद् रावणस्य पापमेव श्वेतकेशरूपेण दशरथ-कर्णसमीपे समुद्गतं येनाग्रिमघटना भविता।

दशरथो मन्त्रणागृहमागतः। सो हि अमात्यादीनामागमनार्थमादिष्टवान्। सर्वप्रथमं वसिष्ठः समागतः ततश्चान्ये पार्षदाश्च समुपस्थितवन्तः।

षष्टि-(६०) सहस्रवर्षपर्यन्तं मया राज्यं शासितम्। इदानीं वार्धक्यमागतम्। अहं तु चिरकालपर्यन्तमपुत्रत्वेन चिन्तित आसम्। सा चिन्ता रामेण स्वजन्मना दूरीकृता।

श्रीरामस्तु पुरुषोत्तमावतार एव। सीता च सद्यः लक्ष्मीरूपा तया सह तु विवाहो जातः, तेन रामः लक्ष्मीपतिरप्यभूत्। अधुना चाहं तं भूदेवीपतिरूपेणापि द्रष्टुकामोऽस्मि। भगवतो विष्णोः पत्नीद्वयमस्ति श्रीदेवी भूदेवी च। तथैव श्रीदेवी तु समागता भूदेवी च स्वानुरूपं पतिरूपं रामचन्द्रं प्राप्नोतु इयं मे बलवती कामना। (मनोहारिणी कल्पनाऽत्र)।

इदं श्रुत्वा मन्त्रिणः सुप्रसन्नाः जाताः। तदा वसिष्ठ उवाच-भवतोऽयं श्रेंयान् प्रेयांश्च विचारः सर्वथा लोक-कल्याणकारी वर्तते। अयं हि रामः परात्परः परमेश्वरोऽस्ति। ब्रह्मविष्णु- महेश्वराः मिलित्वा यत्कर्तुं शक्नुवन्ति तदेकाकी रामः स्वयं कर्तुं शक्ष्यति। इत्थं हि श्रीदेवी-भूदेवी उभे देव्यौ रामं पतिमेव मन्येते। अत एव सर्वथा श्लाघ्यः शीघ्रकरणीयोऽयं विचारः।

एवं हि रामचन्द्रः पितरं निकषा समुपस्थाय प्रथमं गुरुं वसिष्ठं ततश्च पितरं ननाम। रामचन्द्रं दृष्ट्वा अशेषवात्सल्येन दशरथो ब्रूते-मया च आजीवनं शुभकर्माणि कृतानि। कठिनतया यज्ञाः कृताः तेषामेव परिणामेन त्वत्सदृशं पुत्रं प्राप्तवानहम्। अत एव जीवनयात्रायाः चरमचरणे मदीया बलवती कामना विद्यते, यत् राज्यशासनस्य दुर्वहभारं त्वयि निक्षिप्य मोक्षपथे अग्रेसरः भवेयम्। प्रायः त्वया ज्ञातमस्ति यत् मम कुलश्रेष्ठः राजा भगीरथः कठिनतमां तपस्यां विधाय स्वकुलदेवस्य श्रीरंगनाथस्य चरणाभ्यां निःसृतां गंगां पृथिव्यामानीतवान्। यथा गंगया सगरपुत्रास्तारिताः वैकुण्ठं च प्रापिताः यतः पुनरावृत्तिः न जाता।

इति श्रुत्वा रामोऽवदत्-पितुराज्ञास्वीकरणं पुत्रस्य प्रधानं कर्तव्यं तु वर्तते एव। सहैव चक्रवर्तिनः सम्राजः आज्ञापि शिरोधार्यैव। एवमुक्त्वा पितुराज्ञां गृहीत्वा च निवासस्थानं प्रत्याययौ।

समस्तनगरमानन्दसागरैः समुद्वेलितम्। जनाश्च हर्षेण आत्मविस्मृताः जाताः सर्वत्र तोरणद्वारादिकं ध्वजादयश्च संरचिताः एवं रूपेणायोध्या विविधालङ्कारैः सुसज्जिता विद्यते।

कैकेयी शोभनशय्यासीना विराजते स्म ।

तत्रागत्य सा कुब्जा विषबाणसदृशवाक्यैः कैकेयीं सम्बोध्योक्तवती-जानासि राज्ञि ! कौशल्यायाः षड्यन्त्रपूर्णा कामना फलिता । श्वः तस्य पुत्रस्य रामचन्द्रस्य राज्याभिषेको भविता । त्वं दासी भविष्यसि तव पुत्रो भरतः दासवद् रामसिंहासनसमीपमुत्थित एव स्थास्यति ।

मन्थरावचनं श्रुत्वा कैकेयी तां भर्त्सितवती । उक्तवती च यद् रामस्तु मम प्राणप्रियोऽस्ति । अयं तु शुभसमाचारः । कैकेयी च प्रथमं मन्थरायै स्वर्णोपहारं प्रदत्तवती ।

तं प्रक्षिप्य मन्थरा क्रोधोन्मत्ता सती चीत्कारं च कुर्वती अवादीत्-त्वं मूर्खाऽसि कैकेयि ! उन्मत्तासि । तव सपत्न्याः कौशल्यायाः पुत्रः राजा भविष्यति । त्वं दासी भविताऽसि, तव पुत्रः दासः स्यात् ।

इत्थं च श्रुत्वा कैकेयी प्रोक्तवती-तद्वदेव केकयनरेशकुलेऽपि ज्येष्ठ एव राजा भवति इयमेव परम्परा विद्यते । परन्तु पुनः विधिप्रेरिता मन्थरा तथा विषवमनं कुरुते येन कैकेय्याः मनःपरिवर्तितम् विचारश्च परिवर्तितः ।

तदा सा सर्पिणीतुल्या मन्थराऽवोचत्-वरद्वयेषु प्रथमं वरं भरताय राज्यप्रदानं याचस्व, वरान्तरेण चतुर्दशवर्षाणि यावत् सीतया सह जटावल्कलधारी भूत्वा रामस्य वनगमनं याचस्व । कैकेयी तथैव करिष्यामीति स्वीकृत्य कोपभवनं गतवती । मन्थरा च प्रफुल्लिता सती स्वस्थानं प्रति निवर्तिता ।

कैकेयी नारीसुलभमायां प्रदर्शयन्ती अश्रुपूरिनेत्रयुताऽवदत्-यदि कृपाऽस्ति तर्हि पूर्व-प्रदत्तं वरद्वयं मह्यं ददातु । राजा विहसन्तोऽब्रवीद्-यथा ते रोचते तथैव करिष्यामि, रामस्य शपथं करोमि । उत्तिष्ठ, प्रसन्नाभव । कैकेयी कठोर-रूपेण वक्ति-वरद्वयमधुनैव देयम् । राज्ञोक्तं-कथमियती उत्कण्ठा च । अधुनैव दीयते । किमिच्छसि कथय ।

कैकेयी अब्रवीत्-मम पुत्राय भरताय राज्यं ददातु तथा रामाय चतुर्दशवर्षपर्यन्तं वनवासं च प्रददातु ।

इति निश्चलभावेन कम्पनरहितेन शब्देन व्याजहार। कैकेय्या सर्पिणीतुल्याया वचन-विषेण दष्टो दशरथः भूमौ पपात। तस्य सर्वाणीन्द्रियाणि निष्क्रियाणि जातानि जिह्वा च शुष्का श्लथा जाता। पुनश्च साहसं कृत्वा ब्रूते दशरथः-मम शपथो वर्तते सुस्पष्टं कारणं ब्रूहि।

निर्भया कठोररूपा कैकेयी अवादीत्-पूर्वप्रतिज्ञातं वरद्वयं देहि। अन्यथा भवन्तमयशसः सागरे पातयित्वाऽहं स्वप्राणत्यागं करिष्ये।

रामस्तु तत्रागत्य मर्मभेदिनं दृश्यं दृष्ट्वा स्तब्धो जातः। राजा तु मूर्च्छित आसीत्। कैकेयी दृढ़तया राज्ञः वरदानद्वयस्य वर्णनं कृतवती। रामः सुप्रसन्नो भूत्वाऽवदत्। यदि पितुः चक्रवर्तिनश्चाज्ञा नापि स्यात् तदापि किं भवत्याः आदेशमहं कदापि त्यक्तुं समर्थः? भ्रातुर्विभवं राज्यं तु ममैव विद्यते। ततः वनं प्रस्थातुं भवत्याः आज्ञामाशीर्वादं च याचे। इत्युक्त्वा रामस्ततः प्रतस्थे। अयोध्यायां हाहाकारो जातः। तत्रत्यशोकाश्चर्ययुक्तदशाऽत्र वर्णनीया नैव विद्यते केवलं कल्पनाभावनां कुर्वन्तु तत्रभवन्तो ज्ञानिनः पाठकाः सुधियः।

तच्छ्रुत्वा वसिष्ठ उवाच-किं न पश्यसि त्वं यद् यदि तव पतिः दशरथो म्रियेत तर्हि संसारः तं न सोढुं शक्ष्यति। किं काऽपि पत्नी विधवा भवितुमिच्छति? किं त्वं मानवी मायापिशाचिनी वेति? वचनमिदं श्रुत्वाऽपि कैकेयी न द्रविताऽभूत्।

एतन्मध्ये एव स्वल्पां चेतनां प्राप्य राज्ञा दशरथेनोक्तम्-महर्षे! इयं न मम धर्मपत्नी मया त्यक्तेयम्। एतस्याः पुत्रं भरतमपि पुत्रं नाहं मन्ये। अत एव मम दाहादिक्रियाकरणाधिकारेण स (भरतः) वञ्चितो जातः।

तदनन्तरं लक्ष्मणोऽपि रामेण सह वनं गन्तुं समुद्यतोऽभूत्। सीता च दारुणं वर्णनमिदं श्रुत्वा विक्षिप्ता सती तत्र समागतवती रामचन्द्रः तां शतशः शान्तिदायकवचनैः वनवासकष्ट- विवरणैश्च प्रबोधितवान्। किन्तु स्वकीयाऽकाट्यतर्कद्वारा सीता सर्वं विखण्डितवती। अन्ते च रामः तामपि वनं गन्तुं समादिष्टवान्।

इत्थं च वल्कलधारणं कृत्वा सीता लक्ष्मणाभ्यां सहितः रामचन्द्रः तत्रोपस्थितं कुलगुरुं वसिष्ठं प्रणम्य मातरं च प्रणम्य विलपन्तं नगरनिवासिनं यथायोग्यं सन्तोष्य सुमन्त्रद्वारा समानीते रथे समुपविश्य वनं प्रतस्थे ।

पितुराज्ञया रामेण साकं सीता गतवती लक्ष्मणश्च चलितः एव । तत्र केवलं दशरथस्य पत्न्यः तं परित्यज्य न गतवत्यः तथा च अयोध्यानगरस्य निर्जीवचित्राणि न गतानि ।

सुमन्त्रश्च परावर्त्य विशालदुर्गयुताम् अयोध्यानगरीं प्राप्तवान् । "रामचन्द्रः पुनः सुमन्त्रेण सह आगतवान्" इति भावनया समुत्सुकाः अयोध्यानगरवासिनः पश्यन्ति स्म सुमन्त्रं च पृष्टवन्तः ।

सुमन्त्रोऽवदत्-मया तु बहुशः निवेदितं किन्तु रामेण न स्वीकृतम् । स तु मर्यादा- रक्षकः, सत्यधर्मपालकः । अत एव निराशो भूत्वा अहं परावर्तितवान् । इति श्रुत्वा वसिष्ठः सुमन्त्रेण साकं दशरथभवनमागतः । उभौ दृष्ट्वा "रामः पुनरागतः" इति भावयन् दशरथः प्रसन्नो भूत्वा समुत्थितः । पृष्टश्च यद् रामः कुत्र वर्तते ?

'रामो नागतवान्' इति कठोरवचनं कथितुं यद्यपि ते समर्थाः न बभूवुः किन्तु तेषां मुखाकृतिं विलोक्य एव दशरथः ज्ञातवान् यद् रामो नागतः एवं च पुनः मूर्च्छितो जातः ।

कौसल्यायै सुमित्रायै स्वस्य भवने गमनस्याज्ञां प्रददौ वसिष्ठः । इत्थं च दशरथस्य मृतं शरीमेकत्र तैलपात्रे सुरक्षितं कृत्वा सर्वे पार्षदाः सेवकाश्च तत्समीपमेव तस्थुः । नार्यश्च वसिष्ठादेशानुसारं यथास्थानं गतवत्यः वसिष्ठेन भरतः प्रत्यायनार्थं दूताः संप्रेषिताः कौसल्यां सुमित्रां च आदिष्टवान् यत् युवां स्व-स्व गृहे तिष्ठताम् । दूताः केकयनगरं प्राप्य भरतं वसिष्ठस्य आज्ञां श्रावितवन्तः यत् त्वरितमेव अयोध्यां चलतु । किं कार्यं वर्तते इति भरतेन पृष्टम् । किन्तु तैरुक्तं यद् वयं न किमपि जानीमहे । भरतः शीघ्रमेव अयोध्यां प्राप्तवान् ।

रामस्तु कोशलदेशस्य दक्षिणभागे गच्छन्नासीत्। तत्रत्यं सौन्दर्यम् अतिमनोहरं वर्तते । अर्द्धचन्द्रसमललाटयुक्ता सुवासपूर्णपरागमिश्रितकेशयुक्ता सीता प्रवालाधरसमा रामेण सहिता मेघमालायां विद्युच्छटारूपा परिदृश्यते ।

मार्गे विभिन्नक्षेत्रम् यत्र कृषकाः स्वक्षेत्राणि विविधप्रकारेण अन्नोत्पाद-नार्थं कर्षन्ति स्म । एवं क्रमेण क्षेत्रम् उद्यानपार्वत्यप्रदेशं पश्यन् गंगातटे ते समाग-तवन्तः यत्र वेदपाठनिरताः तपस्विनः निवसन्ति स्म ।

सीतायाः हस्तं धृत्वा श्रीरामः गंगायां प्रविष्टः । गंगा तत्र इदं वाक्यं व्याजहार यत् मम धारायां स्नानं कृत्वा जनाः निष्पापाः भवन्ति; किन्तु अद्य मम जनकः भवान् (भगवतो विष्णोश्चरणात् गंगा समुद्भूता इति वैदिकी कथा वर्तते । रामस्तु साक्षाद् विष्णुस्वरूपः अत एव गंगाया जनकः ।) स्वयं मम पापं दूरीकर्तुं मम उद्धारार्थं च समागतवान् ।

गङ्गायमुनयोरुपमेयरूपेण सीतां तस्याः केशपाशांश्च संवर्ण्य गङ्गायमुनयोः सङ्गममित्यद्भुतं वर्णयति-कवेरियमपूर्वा कल्पना ।

एतस्मिन्नेव काले तत्रत्यवन्यकोलभिल्लकिरातानां राजा निषाद-राजाः गुहः समुपस्थितः ।

स च निषादपतिः गंगासमीपे शृंगवेरपुरे स्थितस्य सीतालक्ष्मणसहितस्य रामस्य दर्शनार्थं गंगायाः मत्स्यं, सुवासितपुष्पाणां मधूनि च समुपहारार्थं नीत्वा समुपस्थितः । लक्ष्मणेन पृष्टः सोऽब्रवीत्-भगवन् ! भवतां सेवकः निषादपतिः यश्च एतत् क्षेत्रस्य नौकायाः अधिष्ठाता वन्यजन्तूनां जनानां च एकाधिपतिः अस्मि । अयं च सामान्यो जनः भवद्- दर्शनार्थमुपस्थितः । लक्ष्मणस्य निदेशेन निषादराजः गुहः रामसमीपमागत्य रामेण इंगितः सन् तत्रोपविष्टः उक्तश्च भवदर्थम् एतान् मत्स्यान् इमानि मधूनि च आनीतवान् कृपया स्वीकुर्वन्तु ।

रामश्य तत्रोपस्थिततपस्विनां मुखं पश्यन् अब्रवीत्-इमे पदार्थाः सर्वथा पवित्र- विचारेण भक्त्या चानीताः सन्ति अत एव स्वीकरोमि । श्वः प्रातः नौकामेकां नीत्वा आगच्छ, अस्माभिः गंगापारं गन्तव्यम् । निषादेनोक्तम्-न हि भगवन् ! त्वया

अत्रैव स्थातव्यम् इदमपि वनमेव । वयं सर्वे भवत्सेवकः । न वयम् परावर्तयिष्यामहे । रामेणोक्तम्-एवमस्तु रात्रौ अत्रैव स्थीयते । इदं श्रुत्वा त्वरितमेव गुहः चतुर्दिक्षु रक्षाव्यवस्थां कृतवान् । रामश्च सन्ध्यावन्दनादिकं कृत्वा वन्यं फलं च भुक्त्वा सीतया सह भूमौ एव दर्भशय्यायां सुप्तवान् । लक्ष्मणश्च धनुर्बाणं धृत्वा उत्थितः एव रक्षायां संलग्नः जातः । निषादराजोऽपि तथैव कृतवान् । प्रातरुत्थाय रामः सन्ध्यापूजादिकं विधाय अग्रे गमनार्थमृषिभ्यः आज्ञामादाय भक्तं निषादं नौकानयनार्थम् आदिष्टवान् । पुनश्च निषादेन अत्रैव निवासार्थम् प्रार्थितम् । रामेणोक्तम् तव भक्त्या स्नेहेन च तवाधीनोऽस्मि । किन्तु स्वकार्यं समाप्य पुनः तव समीपमागमिष्यामि । (अस्मिन्नपि रामायणे पुनरागमनाय प्रतिज्ञा इति वाल्मीकिरामायणादिवदेव वर्तते) ।

निषादराजः गुहः रामस्य भावनां विज्ञाय सुन्दरं तरणिमानीतवान् । रामश्च सीतालक्ष्मणाभ्यां सहितस्तस्यां नौकायाम् उपविश्य नदीसौन्दर्यं पश्यन् आसीत् । यत्र सीता च मत्स्ययुक्तं गंगाजलं स्वहस्तैः उच्छालयन्ती आसीत् गंगापारं गत्वा रामेण पृष्टः यत् चित्रकूटगमनमार्गं दर्शय । पुनश्च तत्र निषादेन प्रार्थितं यदहमपि भवद्भिः सहैव स्थास्यामि सेवां विधास्यामि इति श्रुत्वा रामः प्रोवाच-त्वम् **मम प्राणोपमः प्रियः अयं च लक्ष्मणः तव "कनिष्ठः भ्राता" इयं च सीता तव "भ्रातृजाया" इयं च "समुद्रवलयिता पृथ्वी" तव वर्तते । त्वं च अद्य प्रभृति मम पञ्चमः भ्राता विद्यते । इतःपूर्वं वयञ्चत्वारः भ्रातरः एव आस्म । अधुना वयम् पञ्च जाताः ।**

इयं गरीयसी-महीयसी च कथा अस्मिन् रामायणे राव वर्तते यत्र रामेण निषादः गुहः पञ्चमभ्रातृरूपेण स्वीकृतः । नान्यस्मिन् रामायणे इयं कथा दृश्यते ।

किंकर्त्तव्यविमूढो भूत्वा निषादः रामाज्ञां शिरसि निधाय रामः पुनरागमिष्यति इत्याशाविश्वासेन ततः प्रस्थितः ।

(अस्मिन् रामायणेऽपि केवट-पादप्रक्षालनकथा वाल्मीकिरामायणादिवदेव विद्यते ।)

तदनन्तरं रामो भरद्वाजाश्रमं गतवान् । ततो भरद्वाजः प्रोवाच-इतः दशयोजनदूरं चित्रकूटनामकं सुरम्यं देवैरपि दुर्लभं पावनं स्थानम् । यत्र भवान् स्वेच्छानुसारं स्थातुमर्हति । एवं रूपेण मुनेराज्ञया रामस्ततः प्रतस्थे ।

विशेषः

महाकवि-कम्बन्-महाभागः चित्रकूटवर्णनक्रमे पूर्णमेकं पटलं लिखितवान् । यत्रान्यस्मिन् रामायणे चित्रकूटप्रसंगस्य कतिपयपद्यैरेव वर्णनं विलोक्यते । चित्रकूटं प्रति कवेः भक्तिः श्रद्धा चाऽद्भुता दृश्यते । पञ्चपञ्चाशत्(५५) पद्येषु चित्रकूट शोभावर्णनं महात्म्यवर्णनं च विद्यतेऽत्र ।

एवं रूपेण रामः सीतालक्ष्माणाभ्यां सहितस्तत्र पावने चित्रकूटे चिरं तस्थौ विचचार च । यत्रत्यमन्दाकिनीधारा सीतायाः स्नानेन पूता जाता । इत्थमिदं चित्रकूटं सर्वथा श्रेयस्करं प्रेयस्करं तपःपूतं च विराजते । कथ्यते यदत्र रामचन्द्रः सार्धैकादशवर्षाणि (११३) यावत् निवासं चक्रे । शेषं च द्विवर्षं षमासानि च पञ्चवट्यां समुद्रतटे च निनाय । यतो हि चतुर्दशवर्षपूर्तिदिने एव अयोध्यामागतवान् । इयमपि कथा नवीना ।

भरतस्यायोध्यागमनम्

गुरुवसिष्ठस्याज्ञया दक्षाः चतुराश्च दूताः भरतानयनार्थं त्वरितमेव केकयदेशं प्राप्ताः । निवेदितवन्तः यत् पितुः सन्देशं नीत्वा अयोध्यातः वयं समागताः ।

अथ च कोशले नृत्यगीतादिकं च भवति सर्वत्र सर्वे मौनावलम्बिनः, अयोध्यानगरे प्रासादेषु राष्ट्रध्वजाः नोल्लसन्ति ।

इत्थं दर्शं दर्शं शत्रुघ्नसहितः भरतः अयोध्याराजभवनं समागतवान् । तत्र सर्वत्रोदासीनतां दृष्ट्वा सर्वप्रथमं स्वमातरं निकषा गत्वा प्रणामं कृत्वा पृष्टवान् यत् किं पूज्यः पिता स्वस्थो वर्तते । कैकेयी कथितवती-पिता तुभ्यं राज्यं दत्वा रामाय चतुर्दशवर्षं यावत् वनवासस्याज्ञां प्रदाय स्वर्गं गतवान् । अकस्मादेवं श्रुत्वा भरतः स्तब्धसंज्ञो जातः । कथमिदं जातम्, किमियं वार्ता, केयं दुर्घटना ? इति भरतवचनं

श्रुत्वा कैकेयी अवदत्-चक्रवर्तिना पुरा मह्यं वरद्वयं प्रदत्तम्। अहमेव तयोरेकेन तुभ्यं राज्यं द्वितीयेन च चतुर्दशवर्षं यावत् रामवनवासं याचितवती। राजा प्रतिज्ञानुसारं तथैव कृतवान्। किन्तु रामवनगमनशोकं सोढुमशक्तः राजा प्राणान् तत्याज।

इत्थमिदं श्रुत्वा भरतस्य हस्तौ कर्णयोः समागतौ, नेत्रे आरक्ते संजाते, दीर्घनिःश्वासैः स कम्पयामास। क्रोधावेशेन यदा भूमौ भरतेन पादौ पातितौ तदा भूकम्पवद् धरणी कम्पिता जाता।

तदनन्तरं दाहपूर्वविधिविधानानुसारं चितां विरच्य तदुपरि दशरथस्य शरीरं स्थापयामास। भरतः दाहसंस्कारार्थमुद्यतः। तदा गुरुवसुष्ठेनोक्तम्-भरत! तव पिता अन्तिमक्षणेऽति दुःखितः सन् तव मातुः कुकर्मणा त्वां दाहाद्यन्तिमकार्येण वर्जितवान्। ततश्च देहं तत्याज। एवं कथयन् वसिष्ठः महान् दुःखितो जातः। किन्तु शत्रुघ्नं निर्दिष्टवान् संस्कारादि कर्म कर्तुम्। तथैव जातः।

तत्र दशरथस्य षष्टि-(६०) सहस्रं पत्न्यः चितामधिरुह्य पुण्यलोकं गतवत्यः। ततः सर्वं संस्कारादि कर्म यथाविधि शास्त्रानुसारं दशदिनपर्यन्तं विहितम्। भरतेन पितुः अन्तिमकर्मणि दीनेभ्यो ब्राह्मणेभ्यो बहुशो धनानि गवादिकं च दानरूपेण प्रदत्तानि। एवं च दशरथस्यान्तिमसंस्कारादि कर्म सम्पन्नम्।

अत्र षष्टि-(६०) सहस्रपत्नीकथा तु न कुत्रापि वर्तते। वाल्मीकिरामायणादत्र कथा भिन्ना यदत्र वसिष्ठाज्ञया शत्रुघ्नः एव श्रद्धादिकं कर्म कृतवान् न भरतः इति नूतनम्।

ततो वसिष्ठः भरतस्य राज्यभिषेकार्थमादिष्टवान्। वसिष्ठवचनं श्रुत्वैव भरतः शिथिलो विचलितो जातः। नेत्राभ्यामश्रुधारा प्रवाहिता। स मूर्च्छितो बभूव। कियत्कालानन्तरं चेतनां प्राप्य अवादीत्-यदि सर्वगुणोपेतं रामं विहाय मया राज्यमुकुटं धार्यते तर्हि मम मातुः कुकृत्ये को दोषः। यदि भवन्तः एवं स्वीकुर्वन्ति किं तर्हि त्रेता-द्वापरयुगमतिक्रम्य पापिष्ठः कलियुगः समागतः! इत्युक्त्वा पुनः स्वकीयसङ्कल्पं घोषयन्नवोचत्—

अहं भवद्भि: साकं वनं गत्वा पूज्याग्रजं रामं संप्रार्थ्य समर्पयामि च तस्मै राज्यकिरीटम् अन्यथा अहमपि वने निवसन् कठोरतप: करिष्यामि प्राणान् वा त्यक्ष्यामि ।

इति श्रुत्वा सर्वे सभासद: भरताय भूयोभूय: शुभाशीर्वचनं प्रदत्तवन्त: । भरतस्य वनगमनसूचनां नगरवासिभ्यो देहि इति शत्रुघ्नमादिदेश ।

घोषणामिमां ज्ञात्वा अयोध्यानगरनिवासिन: समस्तबालवृद्धवनिताश्च भरतेन साकं रामानयनार्थं वनं प्रस्थातुमुद्यता: बभूवु: ।

पथि कोऽपि न किमपि ब्रूते सर्वेषां ध्यानं रामोपर्येव केन्द्रीभूतमस्ति । रात्रौ शत्रुघ्न- सहितो भरतस्तत्रैव स्थित: यत्र सर्वप्रथमरात्रौ सीता-लक्ष्मणाभ्यां सहित: राम: स्थित आसीत् । कन्दमूलफलाहारं विधाय रात्रौ भरत: न सुष्वाप । केवलं तत्र धूलधूसरितभूमावेव विश्रामं चकार । एवं रूपेण भरत: कावेरीपरिपूतक्षेत्राद् गंगातटं सम्प्राप्त: ।

भरतस्य सेनायामगणिता: अश्वा: गजाश्च आसन् । इमां सेनां दृष्ट्वा तत्रत्य: निषादराज: गुह: क्रोधाविष्टो जात: । निषाद- राजेनानुभूतं यत् सेनासहित: भरत: रामं विजेतुं समागत: । एवं चिन्तयन् निषाद: भरतसमीपमागत्य सादरं नमस्कारं कृतवान् । भरतश्च तं हृदयेन आलिङ्ग्य अश्रुधारया निषादमस्तकं सिक्त-वान् । निषादेनागमनकारणं पृष्ट: सन् भरतोऽब्रवीत् यद् अहं रामं प्रत्यावर्तयितुं सकलपुरजनपरिजनभ्रातृभि: मातृभि: सहित: प्रचलितोस्मि । अत्र मम साहाय्यं करोतु ।

अन्यस्यां नौकायां च वसिष्ठेन मातृभि: सुमन्त्रेण शत्रुघ्नेन च साकं भरत: समुपविष्ट- वान् यत्र स्वयं निषादराजो गुह: अपि आसीत् । तत्रैव निषादराज: सर्वेषां च परिचयं प्राप्तवान् ।

एवं च गंगापारं गतवान् । यत्र यजनयाजने अध्ययनाध्यापने निरता: ब्राह्मणा: आसन् यै: साकं महान् तपस्वी भारद्वाज: ऋषि: आसीत् । येषां पावनाश्रमं

भरतः प्राप्तवान्। भरतस्य सर्वे सहगामिनः अपि समुपस्थिताः भरद्वाजाश्रमं संप्राप्तास्तत्र स्थिताश्च।

अथ भरद्वाजाश्रमे श्रद्धया विनयेन साकं तपस्विनं प्रति भरतः भक्तिभावं प्रदर्शितवान्। चन्द्रमौलीश्वरशिवसदृशः मुनिरपि तस्मै अनन्तमङ्गलदायकम् आशीर्वादं प्रददौ। मुनिना पृष्टं यत् पित्रा प्रदत्तमपि राज्यं परित्यज्य कथं त्वं जटाजूढं निर्माय मुनिवेशे समागतोऽसि? इति श्रुत्वा भरतः क्रोधेन दुःखेन च कथितवान् यत् परम्पराक्रमम् उल्लङ्घ्य मह्यम् राज्य-प्रदानं सर्वथा विपरीतमवज्ञाय तद् राज्यं श्रीरामचन्द्रं निकषा गत्वा तस्मै समर्पयिष्ये। यदि स न स्वीकरिष्यति तर्हि अहमपि चतुर्दशवर्षपर्यन्तं वनवासमेव करिष्यामि।

आश्रमे स्वागतसत्कारे अन्ये निमग्ना जाताः तत्रैव भरतः केवलं कन्दमूलादिकं भुक्त्वा रजोयुक्तभूमौ एव सुप्त्वा रात्रिं व्यतीतवान्। महर्षिभरद्वाजेन सहैव चित्रकूटं गतवान्। प्रातः उत्थाय नित्यकर्मादिकं विधाय मुनेराज्ञामाशीर्वादं च नतमस्तकेनादाय चित्रकूटं प्रति प्रस्थितः।

तत्र रामो वार्तां कुर्वन्नासीत्। एवं वार्तालापक्रमे एव भरतः समुपस्थितः। शोकाकुलं भरतं हृदयेनालिङ्ग्य रामः विविधप्रश्नान् पृष्टवान्।

वज्राघातसमं पितुर्मरणं विज्ञाय रामचन्द्रः मूर्च्छितो जातः। कियत् कालानन्तरं चेतनां प्राप्तवान्। ततश्च समस्तराज्यपरिजनैः मातृभिः सहितः ब्रह्मात्मजः वसिष्ठः रामं परितः समुपविश्य कथितवान्-शोकं परित्यज्य अधुना स्वर्गतस्य पितुः शास्त्ररीत्या उदक- संस्कारादिकं करोतु। अत्रापि वसिष्ठेन मृत्युकाले दशरथेनोक्तं वचनं श्रावितं यद् भरतः श्राद्धकर्म न कुर्यात्। तत्र रामचन्द्रः वसिष्ठेन साकं मन्दाकिनीतटमागत्य प्रोक्तवान्-अधुना मया सहैव ममानुजः भरतोऽपि सर्वमन्तिमकृत्यं करिष्यति। ततः यथाविधि कर्म कृतवान्। तदनन्तरं सर्वे चित्रकूटसमीपस्थपर्णशालामागतवन्तः।

भरतस्य प्रार्थनां श्रुत्वा रामचन्द्रः प्रत्युक्तवान्-अहं तु चतुर्दश-वर्ष पर्यन्तं वनवासे एव स्थास्यामि। त्वम् ममाज्ञया तावत् पर्यन्तं राज्यशासनं करोतु। रामस्य

इत्थं प्रतिज्ञां श्रुत्वा वसिष्ठादय: अपि सम्मतिं प्रदत्तवन्तः । अन्ते च भरतः कातरभावेन नम्रतापूर्वकं निवेदितवान् यद् यदि एवमेव वर्तते तर्हि मह्यं स्वकीयपादुकां ददातु । इमां पादुक्रामेव प्रतीकरूपेण राज्यसिंहासने संस्थाप्य मुनिवेषेनैव अहं चतुर्दशवर्षपर्यन्तं राज्यशासनं संचालयिष्यामि। किन्तु उक्तरीत्या यदि भवान् नागमिष्यति, तर्हि यस्मिन् दिने एव चतुर्दशवर्षाणि पूर्णतां प्राप्स्यन्ति तस्मिन् दिने सूर्यास्तसमये एव अहम् अग्नौ प्रविश्य प्राणान् त्यक्ष्यामि इति निश्चतरूपेण भवत् सौगन्धं कृत्वा ब्रवीमि । सर्वैः इदं श्रुतम् । रामचन्द्रेण पादुका प्रदत्ता । तां शिरसि निधाय भरतो ब्रूते-इदमेव मम किरीटम् । साष्टाङ्गं भरतः रामचन्द्रं प्रणम्य प्रस्थितवान् । तथा सर्वाः मातरः अपि प्रस्थितवत्यः । आकाशाद् देवगणाः पूष्पवृष्टिं चक्रुः । रामस्याज्ञया निषादराजोऽपि परावर्तितः । सनातनः ऋषिः भरद्वाजः अपि परावर्तितः ।

भरतः पादुकां शिरसि निधाय गंगापारं गत्वा अयोध्यामागत्य रात्रौ जागरणं च कृत्वा प्रातः नन्दिग्रामे पादुकां संस्थाप्य अश्रुपूरितनेत्राभ्यां मुनिव्रतयुक्तः राज्यशासनं चकार । अनन्तरं रामेण चिन्तितं यद् अयोध्यावासिनः ज्ञातवन्तः यद् वयमत्र चित्रकूटे तिष्ठामः ।

अतः चित्रकूटात्प्रस्थातव्यमिति विचिन्त्य मुनिभिरनुज्ञातः ततः प्रास्थितवान् ।

विशेषः—

(क) अस्मिन् रामायणे भरद्वाजस्याऽपि चित्रकूटागमनवर्णनं वर्तते । यद् अन्यस्मिन् रामायणे न विद्यते ।

(ख) भरतस्य अयोध्याप्रस्थानानन्तरं त्वरितमेव रामचन्द्रस्य चित्रकूटपरित्यागवर्णनमपि नूतनम् ।

।। इति अयोध्याकाण्डम् ।।

वाल्मीकिकम्बरामायणयोः अयोध्याकाण्डे कथावर्णनवैशिष्ट्यम्

वाल्मीकिरामायणस्याऽयोध्यकाण्डे कथावर्णनवैशिष्ट्यम्

(१) अयोध्याकाण्डं रामायणस्यात्मा विद्यते नास्ति कश्चन मतभेदः। रामराज्याभिषेकविचारप्रसंगे दशरथेन रामगुणगरिमावर्णनं गभीररहस्यपूर्णम्। रामश्च साक्षात् सनातन ब्रह्मरूपोऽस्ति इत्यपि प्रतिपादितमादिकविनाऽस्मिन् काण्डे।

(२) देवानां परस्परविचारेण भगवती सरस्वती मन्थराहृदयं प्रविश्य रामराज्याभिषेकस्थगनं रामस्य वनगमनं च कैकेयीमुखेन कारितवती अनेनैव देवानां कार्यसिद्धिः सम्भवा।

(३) सीतालक्ष्मणाभ्यां सहितो रामस्य वनगमनसमये कारुणिकवर्णनं तु हृदयविदारकम्। शृंगवेरपुरे रात्रौ लक्ष्मणेन सह रामस्य वार्तालापः सर्वथा मानवीयदुर्बलतापूर्णः इत्यपि महर्षिणा कथितम्।

(४) पावनप्रयागं, भरद्वाजाश्रमगमनं, निषादराजेन गुहेन सह मैत्री, नौकाद्वारा गंगापारगमनं, चित्रकूटे निवासवर्णनं तु सर्वथा भाव-पक्षकलापक्षयोरुत्कृष्टमुदाहरणम्। निषाद- राजस्य चरित्रमत्र मूर्धायमानतां प्राप।

(५) चित्रकूटे सपरिकरं सपरिवारं च अयोध्यातः भरतस्यागमनं तत्र रामभरतवार्ता तु विश्वसाहित्येऽभूतपूर्वा गरिमामयी वर्तते।

(६) मम विचारे रामकथाकाव्येषु चित्रकूटप्रसंगस्तु त्याग-तपस्या-भक्ति-प्रेम-श्रद्धा- परिपूर्णः अद्भुतोऽलौकिकश्च।

(७) तत्रैव मन्दाकिनी-स्फटिकशिलागोदावरी-अत्रि-अनसूयाश्रमकथावस्तूनि सर्वथा श्लाध्यानि सन्ति।

कम्बरामायणस्यायोध्याकाण्डे कथावर्णनवैशिष्ट्यम्

अयोध्याकाण्डमेव रामायणस्यात्मा नात्र कश्चन मतभेदः । महति अयोध्याकाण्डे महर्षिवाल्मीकिनाऽति विस्तृतरूपेण कथा वर्णिता । किन्तु तत्रैव कम्बरामायणेऽतिविशिष्ट- रूपेण समुत्कृष्टशैल्यां मनोमुग्धकारिण्यः कतिचन नूतनाः कथाः सन्ति । तत्र प्रमुखतया निम्नाङ्किताः कथाः विराजन्ते ।

(१.) अस्मिन् रामायणे 'शान्ता' दशरथस्यैव पुत्री आसीत् । दशरथेन स्वसुहृदे रोमपादाय प्रदत्ता । तस्याः एव विवाहः ऋष्यशृंगेणसह जातः, येन पुत्रेष्टियज्ञः कृतः ।

(२.) मिथिलातः एव भरतशत्रुघ्नौ मातामहगृहं केकयदेशं गतवन्तौ, न अयोध्यातः ।

(३.) षष्टि-(६०) सहस्त्रं वर्षपर्यन्तं दशरथेन राज्यं कृतम् इति कम्बेनैवोक्तम् ।

(४) अस्मिन् रामायणे सीता-लक्ष्मीस्वरूपा रामश्च परात्परपरब्रह्मरूपोऽस्ति । अत्र रामस्य राज्याभिषेके सति भगवती सीता श्रीदेवी भूदेवी च भविष्यति इति चमत्कारमयी मधुमयी-भक्तिमयी च कल्पना ।

(५) बाल्यावस्थायां रामः मृत्तिकागुटिकया क्रीड़न् मन्थरायाः उपरि तां गुटिकां प्राक्षिपत् । तेन क्रोधोन्मत्ता मन्थरा तत्कालादेवास्ति । अस्यैव परिणामरूपेण वनवासार्थं परामर्शं कैकेय्यै दत्तवती । (सर्वथा नूतनेयं कथा)

(६) रामवनगमनानन्तरं दशरथः प्राण-वियोग काले गुरुवसिष्ठं प्रत्युक्तवान्- अहं कैकेय्याः पत्नीत्वं भरतस्य च पुत्रत्वं पारावर्तये । भरतः मम दाहादिसंस्कारं न करिष्यति । दाहसंस्कारसमये तथैव जातम् । शत्रुघ्नेन संस्कारः कृतः । सर्वथा नूतनेयं कथा केवलं कम्बेनैव कथिता नान्येन केनापि-रामकाव्यलेखकेन ।

(७) दशरथस्य षष्टि-(६०) सहस्त्रसंख्याकाः पत्न्यः आसन् । याः पत्युः दशरथस्य दाह- संस्कारसमये चितायां प्रविश्य भस्मीभूताः । सर्वथा नूतनेयं कथा ।

(८) वनयात्रायां सीतालक्ष्मणसहितः रामः गंगातटं प्राप्तवान्। विष्णुरूपस्य रामस्य चरणान्निस्सृतायां गङ्गायामद्य सशरीरं रामः स्नात्वा गङ्गां पवित्रीकृतवान्, इति स्वयं भगवती गङ्गा ब्रूते तत्रैव रामः गङ्गातः अन्तः स्तलात् अमृतं निःसार्य समुपस्थितेभ्यः ऋषिभ्यः प्रदत्तवान्। सर्वथा मनोहारिणी नवीनेयं कथा रामदर्शनस्य सद्यः फलप्राप्तिरूपा।

(९) गङ्गातटे निषाद-राजेन गुहेन सह मैत्री जाता। गङ्गापारगमनाय नौकादिव्यवस्था तेन कृता। रामः निषादं स्वकीयनिजभ्रातृरूपेण स्वीकृत्योक्तवान्। त्वमद्यारभ्य ममानुजः भरतात् कनिष्ठः लक्ष्मणात् ज्येष्ठः मध्यमभ्राता संजातः। सीता तव भ्रातृजाया जाता। अद्यारभ्याहं पञ्चभ्रातृरूपेण परिवर्तितः।इयं कथा तु चमत्कारिणी आनन्दाश्रुप्रवाहिणी रोमाञ्चकारिणी विद्यते।

(१०) भरतेन साकं महर्षिः भरद्वाजोऽपि चित्रकूटं गतवानिति नूतनकथा विद्यते।

(११) भरतादिमुखेन पितुर्मरणसमाचारं ज्ञात्वा रामो व्याकुलो बभूव। तत्र मन्दाकिन्यां जलांजलिप्रदानसमयेऽपि वसिष्ठः सूचयति यत् तव पिता मरणसमये भरतस्य पुत्रत्वं परावर्तितवान्। किंचिद्विचार्य रामेणोक्तम्—अत्र मया सह भरतोऽपि सर्वं जलाञ्जलिदानादि कार्यं करोतु इत्यपि महत्त्वपूर्णा नूतनकथा।

(१२) चित्रकूट-वर्णनं प्रायः सर्वे रामकाव्यकर्तारः कृतवन्तः। किन्तु सुरभारत्याः रामकाव्येषु भारतीयवाङ्मयस्यान्यान्यासंख्यरामकाव्येषु च कविचक्रवर्तिना कम्बेन यथाऽतिविस्तृतं वर्णनं चित्रकूटस्य कृतम्, न तथा केनापि कृतम्। तत्सर्वं श्रेयप्रेयसोः प्रदायकम्।

(१३) भरतस्यायोध्यापरावर्तनानन्तरं त्वरितमेव रामचन्द्रस्य चित्रकूटपरित्यागवर्णनमपि नूतनम्।

(१४) षष्टि (६०-) सहस्त्रं संख्यकसैन्यैः तथा पुरजन-परिजन-मातृजनैः गुरुजन महर्षि भरद्वाजेन च साकं भरतस्य चित्रकूटगमनवर्णनमपि श्लाघ्यम्।

अरण्यकाण्डादुत्तरकाण्डपर्यन्तं वाल्मीकिरामायणस्य कथासंक्षेपः

वाल्मीकिरामायणं कम्बरामायणं चोभावपि विस्तृतौ विद्येते। आरम्भतोऽयोध्या- काण्डपर्यन्तमुभयोः संक्षिप्तकथानकं सर्ग -पटलानुसारं प्रदत्तमस्ति। निबन्धविस्तारभयात् अस्मिन्नध्याये अरण्यकाण्डादारभ्योत्तरकाण्डपर्यन्तं वाल्मीकि-रामायणस्य, तथाऽग्रिमाध्यायेषु अरण्यकाण्डादारभ्य युद्धकाण्डपर्यन्तं कम्बरामायणस्य (कम्बरामायणे उत्तरकाण्डं न वर्तते) समीक्षात्मकं-तुलनात्मकं च मुख्यकथाघटनावर्णनमेव प्रदीयते इतःपरम्। अनेनैव निबन्धस्य-लक्ष्यं पूर्णतां प्राप्स्यति।

वाल्मीकि रामायणम्

अरण्यकाण्डम्

काण्डेऽस्मिन् चित्रकूटतो रामस्य प्रस्थानवर्णनेन तापसाश्रमप्रवेशवर्णनेन कथा प्रारब्धा। अत्र विभिन्नराक्षसवधकथा, शूर्पणखानासिकाच्छेदनकथा, रामस्य मायामयस्वर्णमृगानुगमनकथा, सीताहरणकथा, जटायुवधकथा तथा पम्पासरोवरतटागमनकथा च सुविशदा विद्यते।

ततश्च रामः शरभङ्गर्षेराश्रमं प्राप्तवान्। शरभङ्गदर्शनं तत्र देवानामागमनं च जातम्। तेभ्यः देवेभ्यः पूजां विधाय शरभंगं ससम्मानं स्वर्लोकं प्रेषयामास, यदर्थं स प्रतीक्षते स्म।

तस्मादाश्रमात् प्रस्थाय रामो महर्षेः सुतीक्ष्णस्याश्रममागत्य तेन सह वार्तालापं कुर्वन् रात्रौ तस्थौ। प्रातरगस्त्यस्य ऋषेराश्रमं समागतवान्।

ततश्च अगस्त्येन विनिर्दिष्टो रामः पञ्चवटीक्षेत्रं प्रस्थितः। पञ्चवटीक्षेत्रमासाद्य लक्ष्मणेन पर्णशाला विनिर्मिता तस्यां ससीतालक्ष्मणो रामः सानन्दं निवासं चकार।

लक्ष्मणेन प्रतिषिद्धा सा शूर्पणखा सीतामुपरि प्रत्याक्रमणं कृतवती। इदमवलोक्य लक्ष्मणस्तस्य नासिकाकर्णच्छेदनं चकार।

अथ शूर्पणखा लंकां गत्वा रावणं प्रति सर्वं, वृत्तान्तं श्रावितवती। रावणोऽपि परम्परया तस्याः भ्रातैवासीत्। सर्वगुणसम्पन्नामपूर्वसुन्दरीं सीतां निजपत्नीरूपेण प्राप्नोतु, इति रावणं प्रेरितवती शूर्पणखा। रावणो मायारूपधारिणं मारींचनामानं राक्षसं सीतापहरणे साहाय्यार्थं कथितवान्। मारीचेन रामगुणोत्कर्षं वर्णयित्वा प्रतिषिद्धो रावणः। अहंकारी रावणस्तमुपदेशं सत्यकथनं चोपेक्ष्य मारीचायादेशं ददौ। मारीचश्च मायामयस्वर्णरूपं धृत्वा रामाश्रमसमीपमाययौ।

रामेण स मायारूपधारी मारीचो हतः।

विशेषः—

(क) लोके प्रसिद्धा "लक्ष्मणरेखा-" कथाऽस्मिन् आदिकाव्ये न दृश्यते। केवलं "रक्षन्तु त्वां विशालाक्षि समग्रा वनदेवताः" इत्येव कथितं सौमित्रिणा।

(ख) केवलमानन्दरामायणे सारकाण्डस्य सप्तमसर्गे (श्लोक-९८-९९) "लक्ष्मणरेखायाः" चर्चा विद्यते। प्रायः गोस्वामिना तुलसीदासेनान्येन भाषाकविना तत एव "लक्ष्मणरेखा-" कथा समुपस्थापिता।

रावणः सीतामादायाकाशमार्गेण चलितः। ततो रावणजटायुमध्ये आकाश एव घोरतरयुद्धोऽभूत्। रावणेन जटायुर्निहतः। पुनश्च मैथिलीमादाय निर्ययौ। सीता आकाशमार्गात् स्वकीयाभूषणादिकं पृथिव्यां पातयामास, यच्च वानरादिमध्ये पतितम्।

रावणः सीतामादाय लंकामागत्य तामशोकवाटिकायां स्थापयामास।

सीतावियोगेन विलपन्तमग्रजं लक्ष्मणः सान्त्वयामास। सीतान्वेषणक्रमे मार्गे मृतप्रायो जटायुर्मिलितः। जटायुर्गृध्रमालिङ्ग्य तेन सीताहरणसमाचारं सविस्तरं ज्ञातवान्। ततश्च जटायोरन्तिमः श्वासो निर्गतः। रामेण तस्य दाहादिकं तर्पणादिकं च कृतम्।

तदनन्तरं मार्गे कबन्धराक्षसं युद्धे निपातितवान्। कबन्धोऽपि चितायां प्रविशन्नेव दिव्यरूपधारी संजातः। सुग्रीवेण सह मित्रतायै निवेद्य ऋष्यमूकपर्वतमार्गं, मातङ्गर्षेराश्रमं, पम्पासरोवरपन्थानं च निर्दिष्टवान् स लक्ष्मणो रामचन्द्रः पम्पासरस्तटमार्गेण शबर्याः आश्रमं प्राप्तः। तत्रैव उभौ स्थितौ।

किष्किन्धाकाण्डम्

अस्मिन् काण्डे रामलक्ष्मणयोः पम्पासरोवरतः ऋष्यमूकपर्वतं प्रति प्रस्थानवर्णनम्, एतयोरागमनमवलोक्य सुग्रीवादिवानराणामुद्विग्नतावर्णनं, रामसुग्रीवयोर्मैत्री-वर्णनं, वालीसुग्रीवविरोधवर्णनिन, सह युद्धवर्णनं रामेण सप्ततालभञ्जनवर्णनं, रामेण वालिवधवर्णनं, राम-वालिसम्वादवर्णनं रामद्वारा ताराङ्गदादिसाञ्त्वनावर्णनं, सुग्रीवं प्रति रामस्य कृतज्ञतावर्णनं, सुग्रीवसेनायाश्चतुर्दिक्षु प्रस्थानवर्णनं, सम्पातेः प्रीतिवर्धनवर्णनं, जाम्बवता हनूमतः उत्पत्तिपराक्रमकथावर्णनं तथा हनूमतः वेगेन समुद्रलङ्घनार्थं महेन्द्रपर्वतारोहणवर्णनं च विराजन्ते।

अथ पम्पासरोवरशोभां पश्यन् रामस्य मनोव्यथामनुभूय लक्ष्मणः पुनः रामं सान्त्वयामास। ततश्च ऋष्यमूकपर्वतं प्रति उभौ भ्रातरौ प्रस्थितौ।

तत्र हनूमता रामसुग्रीवयोर्मैत्री सम्पादिता। सुग्रीवेण च गगनमार्गात् सीतया प्रक्षिप्तमाभूषणादिकं प्रदर्शितम्। तदवलोक्य रामः शोके निमग्नो जातः।

अनन्तरं सुग्रीवोऽपि निजव्यथाकथां श्रावितवान्। रामेण उभयोर्मध्ये वैरभावकारणं पृष्टं, सुग्रीवेण च सर्वं विनिवेदितम्। सुग्रीवेण वालिनः महत्पराक्रमोऽपि वर्णितः।

रामाज्ञया च वालिना सह युद्धार्थं सुग्रीवः गतवान्। तत्र वालिना आहतः सन् मतङ्गवनमागतः। पुनश्च रामः उभयोः भ्रात्रोर्मध्ये समानरूपतया भेदज्ञानार्थमेकां गजपुष्पी-लतामालां सुग्रीवग्रीवायां प्रदाय पुनर्युद्धार्थं प्रेषितवान्।

यथा

गजपुष्पीमिमां फुल्लामुत्पाद्यशुभलक्षणाम्।

कुरु लक्ष्मण कण्ठेऽस्य सुग्रीवस्य महात्मनः॥ कि० १२-३९

पुनः सुग्रीवो युद्धाय प्रतस्थे। वालिसुग्रीवयोर्मध्ये घोरतरो युद्धः समभूत्। तस्मिन्नेव काले रामबाणेन वाली भूमौ पपात। ततो वाली रामचन्द्राय उपालम्भं प्राददत् पृष्टवान् यत् कथमहं निरपराधस्त्वया निपातितः।

रामचन्द्रः तस्यापराधान् विविच्य अनुजपत्नीहरणजन्यं महान्तं पापं दोषं च कथितवान्। वाली तमपराधं पापं च स्वीकृत्य क्षमायाचनापूर्वकं पुत्रस्य अंगदस्य रक्षार्थं निवेदितवान्।

रामेणाश्वासितम्। अन्ते च महाबली वाली सुग्रीवाय अंगदाय च गम्भी-रमन्तिममुदेशं प्रदाय प्राणान् तत्याज।

ततो रामचन्द्रस्याज्ञया अङ्गदः, स्वपितुर्दाहसंस्कारादिकं विधाय जलाञ्ज-लिं दत्तवान्। अथ रामः सुग्रीवस्याभिषेककरणाय लक्ष्मणाय हनुमते च अनुमतिं ददौ। तदनुसारं सुग्रीवस्य राज्याभिषेकम् अंगदस्य च यौवराज्याभिषेकं कारितवान् हनूमान्। सुग्रीवश्च राज्यशासने निमग्नोऽभवत्।

रामचन्द्राज्ञया चतुर्दिक्षु सीतान्वेषणाय वानरसैन्यान् प्रेषयामास। रामेण स्वकीयाङ्गुलीयकं परिचयार्थं प्रदाय समुद्रलंघनाय पराक्रमी हनूमान् समादिष्टः।

ततोऽङ्गदसहिता वानरसेना सागरतटं प्रतस्थे। मार्गे जटायुभ्रात्रा सम्पा-तिना सह साक्षात्कारो जातः। अंगदमुखात् जटायुवधं ज्ञात्वा सम्पातिः शोकाभिभूतो

जातः । ततश्च तेनैव वालिवध-समाचारेण सुग्रीवेण सह राममैत्रीसमाचारेणं चावगतः सम्पातिः ।

सम्पातिना स्वपुत्रसुपार्श्वमुखेन रावणेनापहृतसीतायाः साक्षात्कारघटना च श्राविता इत्थं च समग्रवानराः हनूमत्सहिताः समुद्रतटं प्राप्तवन्तः । तत्र वृद्धेन ज्ञानिना जाम्बवता हनूमान् स्वोत्पत्तिकथां स्वकीयविशालबलकथां च ज्ञातवान् ।

तेनोत्स्साहितो हनूमान् समुद्रलङ्घनार्थं वेगेन 'महेन्द्र' नामकं पर्वतमारूढः ।

इत्थं हि सीतान्तेषणार्थं हनुमतःसमुद्रलङ्घनार्थं प्रस्थानकथा प्रपूर्णा ।

सुन्दरकाण्डम्

अस्मिन् वाल्मीकिरामायणे सुन्दरकाण्डमिदं मणिमालायां सुमेरुवद्वर्तते । काण्डेऽस्मिन् हनूमतः समुद्रलङ्घनवर्णनं समुद्रलङ्घनक्रमे मैनाकपर्वतमिलनवर्णनं,सुरसा घटनावर्णनं, लङ्कापुरीशोभावर्णनं, अशोकवाटिकायां सीतादर्शनवार्तालापवर्णनं, तत्राशोकवाटिकायां सीतादर्शनवार्तालापवर्णनं, तत्राशोकवाटिकाविध्वंसवर्णनं, रावणपुत्राक्षयकुमारवधवर्णनं, मेघनादद्वारा ब्रह्मास्त्रेण हनूमतो बन्धनवर्णनं, रावणराजसभायां हनूमतः संवादवर्णनं, हनूमतो लाङ्गूलेऽग्निदाहवर्णनं, लङ्कापुरीदहनवर्णनं, पुनःसीतया सह वार्तालापवर्णनं, लङ्कातो हनूमतः परावर्तनवर्णनं, जाम्बवानङ्गदप्रभृतिभिः सह तस्य वार्तालापवर्णनं, मधुवने मधुभक्षण-वर्णनं, ससुग्रीवं रामसमीपमागमनवर्णनं, सीता- सन्देशकथनवर्णनादि सुन्दरतमकथायुक्तमिदं काण्डं यथार्थतोऽन्वर्थसंज्ञात्मकं 'सुन्दरकाण्डम्' ।

श्रूयते परम्परातो दृढधारणात्मकोऽयं विश्वाशः यदस्य सुन्दरकाण्डस्य पाठेन सर्वार्थसिद्धिर्जायते ।

तस्य प्रतिदिनं विधिवत् सम्पूर्णकाण्डस्यैकाहपाठेन, सप्ताहपाठेन, नवाहपाठेन, त्रिसप्ताहपाठेन, एकाध्यायपाठेन च विविध-सिद्धयो जायन्ते नात्र कश्चन सन्देहलवः । (एतस्याःपंक्तेर्लेखकस्यापि नियमितसुन्दरकाण्डपाठानुभवेनाप्येषोऽनुभूतोऽनुभवः ।)

कथामाला

प्रारम्भे एव हनूमता समुद्रलङ्ध्नं प्रारब्धम् । तत्र हनूमान् स्वकीयविशालरूपं क्रमशः प्रदर्श्य महद्गर्जनं चकार । मार्गें समुद्रस्थितेन स्वपितुःमित्रेण मैनाकपर्वतेन सह वार्तालापं कृत्वा तेन प्रदत्त सत्कारमादायाग्रे प्रचलितवान् ।

ततश्चैका समुद्रमध्ये स्थिता सुरसा नाम्नी राक्षसी मिलिता, या च स्वमुखं व्यादाय हनूमन्तमुदरस्थं कर्त्तुमुद्यता । तत्र यथा यथा सुरसा मुखं व्यादितवती तथा एव हनुमांश्च स्वशरीरं संवर्धयन् विशालः सञ्जातः । सहसा स्वशरीरं संक्षिप्य तस्याःमुखं प्रविश्य तां नमस्कृत्य सुरसाज्ञामादायाग्रे गन्तुमुद्यतो जातः । (सु.का.१ ।१५९-१७१) ।

लङ्कां प्रविश्य तत्रत्यविस्मयविमुग्धकारिणीं शोभां दर्शं दर्शं हनूमांश्चकितो जातः । तैनैव रूपेण हनूमानन्तःपुरं प्रविश्य तस्याद्भुतां शोभां, तत्रापि नारीणांकामकेलिक्रीडायुक्तं दृश्यं चापश्यत् ।

ततो हनुमान् अशोकवाटिकां प्राविवेश । तत्रत्यशोभां पश्यन् कस्मिंश्चिद्वृक्षे स्थितः सीतानुसन्धाने दत्तचित्तः सन् चैत्यप्रसादमेक-(मन्दिर) मारूह्य दयनीयदशायुक्तां सीतां ददर्श । तथा विधां च दृष्ट्वा शोकमग्नश्च जातः ।

सीता च तत्र विलपन्ती आसीत्। ततश्च 'त्रिजटा-' नाम्नी एका सीताशुभचिन्तिका राक्षसी स्वप्ने राक्षसविनाशं राघवेन्द्रविजयं च दृष्टवती । सीताऽपि शुभशकुनं ददर्श । त्रिजटा च तां शुभसूचनां सूचितवती ।

प्रासादादवतीर्य ततश्च हनुमान् सीतां रामकथां श्रावितवान्। सीता तर्क-वितर्कं कृतवती । हनुमांश्च रामचन्द्रस्यङ्गप्रत्यङ्गवर्णनेन सह गुणसमूहानां वर्णनं च कृतवान् । इत्थं वर्णयन् मारूतिः सीतायै रामनामाङ्कितं रामस्याङ्गुलीयकं प्रददौ । तथा च विश्वासार्थं सीताऽपि चित्रकूटपर्वते काकस्य दुर्व्यवहारवर्णनं श्रावितवती परिचयार्थं स्वकीयचूडामणिं च ददौ ।

तदनन्तरं हनूमान् अशोकवाटिकां विध्वंसितवान्। तच्छ्रुत्वा रावणः किंकरादि-राक्षसान् प्रेषितवान्। हनूमता च ते निहताः । प्रहस्तपुत्रं जम्बुमालिनं,

मन्त्रिणः सप्तपुत्रान्, रावणस्य पञ्च सेनापतीन्, पुत्रमक्षयकुमारं च हनूमान् यमलोकातिथिं कारितवान् ।

एतच्छ्रुत्वा रावणश्चिन्तितः क्रुद्धः सन् स्वज्येष्ठपुत्रमिन्द्रजितं (मेघनादं) सर्वं द्रष्टुं प्रेषितवान् । तत्र मेघनादेन सह लोमहर्षके युद्धे मेघनादस्य ब्रह्मास्त्र-प्रहारेण च हनूमानाबद्धो जातः । यतो हि हनूमान् ब्रह्मास्त्रस्यावहेलनायामुद्यतो नाभूत्, सत्यामपि शक्तौ ।

मेघनादेन आबद्धो हनूमान् रावणसभायामानीतो । रावणस्य प्रभावशालिनं रूपं दृष्ट्वा हनूमांश्चिन्तितोऽभूत् । रावणपार्षदेन पृष्टो हनूमान् लङ्कागमनकारणं राम-दूतत्वेन स्वकीयपरिचयञ्च प्रदत्तवान् ।

तत्रैव रावणसभायां रामप्रभाववर्णनमपि कृतमञ्जनापुत्रेण । ततश्च रावणः हनुमतो वधार्थमादेशं दत्तवान् । तच्छ्रुवा विभीषणोऽवादीद् यत् दूतवधो निषद्धः शास्त्रेण । अत एव वैरूप्यादिकं कोऽप्यन्यदण्डः देयः ।

नीतिवचनमिदं श्रुत्वा हनुमतो लाङ्गूलेऽग्निदाहो विधेयोऽनेनाङ्गभङ्गः सन् दूतोऽयं रामसमीपं गच्छतु । एवमेव कृतं सर्वैः राक्षसैर्मिलित्वा । ततश्च हनुमन्तं लङ्कानगरे भ्रामयामा सुश्च ते ।

सहसैव हनूमान् पर्वताकारः सञ्जातः तस्य लाङ्गूलं च वर्द्धितम् । ततश्च प्रासादात् प्रासादमुत्प्लुत्य महतीं स्वर्णमयीं लङ्कां भस्मसात्कृतवान् ।

ततश्च सीतार्थं हनुमांश्चिन्तयामास । त्वरितमेव चिन्तानिवारितो जातो यद् यस्याः सीतायाः पातिव्रत्यप्रभावेण, रामप्रभावेण च समस्ता लंका प्रदग्धा नाहमल्पीयानपि दग्धः सीता कथं दग्धा भवितुमर्हति ।

एवं हि पुनः हनुमान् अशोकवाटिकामागत्य सीतादर्शनं कृत्वा समुद्रमुल्लङ्घ्य पारे समुद्रं जाम्बवानङ्गदादिसमीपमुपस्थाय सर्वैर्मिलितवान् ।

ततो जाम्बवता पृष्टो हनुमान् सविस्तरं समुद्रलङ्घनवर्णनं लंकाप्रवेशतो लंकादहन- वृत्तान्तं यावद् वर्णितवान् । एतत्क्रमेण महापराक्रमी वायुपुत्रोऽब्रवीत् ।

यथा

सा प्रकृत्यैव तन्वङ्गी तद्वियोगान्वकर्शिता।
प्रतिपत्पाठशीलस्य विद्येव तनुतां गता॥
एवमास्ते महाभागा सीता शोकपरायणा।
यदत्र प्रतिकर्त्तव्यं तत् सर्वमुपकल्प्यताम्॥

सुन्दरकाण्डे २९ ।३१, ३२

ततश्चाङ्गदप्रमुखाः सर्वे वानरादयः सुग्रीवादिसहितं रामं निकषा समाजग्मुः । तान् दृष्ट्वा रामः सुप्रन्नो भूत्वा सीतावृत्तान्तं पृष्टवान् ।

हनुमांश्च सर्वप्रथमं सीताप्रदत्तचूडामणिं रामस्य करकमले समर्प्य सीता-वृत्तान्तं तयोक्तां चित्रकूटे दुष्टकाकस्य जयन्तस्य कथामपि कथितवान् ।

सर्वं श्रुत्वा ज्ञात्वा च रामः शोकसागरे निमग्नो जातः । कियत्कालानन्तरं स्थिरचित्तः रामः लंकाविजययात्रार्थं ससैन्यं सुग्रीवमादिष्टवान् ।

युद्धकाण्डम्

सारांशः—अस्मिन् वाल्मीकिरामायणे सप्तकाण्डेषु युद्धकाण्डमेव दीर्घतरं विद्यते। काण्डेऽस्मिन् रामरावणयोर्भयङ्करयुद्धवर्णनक्रमे उभयपक्षयोः युद्धव्यवस्थावर्णनेन रणनीति- सेनापति-नियुक्तिप्रभृतिविस्तृतवर्णनेन च परिपूरितमिदं काण्डम्। फलतः प्रमुखघटनावर्णनं सुस्पष्टरीत्या संक्षिप्तविवरणमत्रोल्लिखितम्।

कथामाला—तस्यां परिषदि रावणानुजो धर्म-नीतिशास्त्रवेत्ता विभीषणः रामस्यापराजेयतां प्रदर्श्य सीतापरावर्तनार्थं प्रार्थितवान्। विभीषणो रावणस्यान्तःपुरमपि प्रविश्य भावि- दुर्घटनायाः शङ्कामाशङ्कितवान्। रावणेन न श्रुता विभीषणप्रार्थना।

ततश्च विभीषणः राम एव शरणमित्यवगतवान् । रामश्च शरणागतरक्षाव्रती विभीषणाय शरणं ददौ । विभीषणश्च रामचरणयोः शपथमादाय रावणविनाशाय स्वकीयसेवा प्रदानस्य प्रतिज्ञां कृतवान् । रामोऽपि तत्रैव विभीषणस्य लंकाधिपतिरूपेण राज्याभिषेकं कृतवान् । तस्य परामर्शेन च समुद्रतटे उपावसत् ।

अत्र समुद्रतटे कुशासने उपविश्य दिनत्रयपर्यन्तं निराहारो रामः समुद्रप्रार्थनां कृतवान्, किन्तु समुद्रो नागतः । ततः कुपितो रामः समुद्रशोषणार्थमाज्ञां प्रदत्तवान् । स्वयमपि धनुर्बाणं गृहीतवान् । ततश्च समुद्रः समागतः ।

समुद्रराजेनोक्तरीत्या वानरसैन्यमध्ये स्थितनलनीलद्वारा शतयोजनविस्तीर्णे सागरे सेतुनिर्माणं सुसम्पन्नम् । तेन पथा सर्वे वानरसेनादयः सेनापत्यादयश्च लंकासमीपमाजग्मुस्तत्र शिबिरं च विनिर्मितवन्तः ।

तदनन्तरं वानरसैन्यसमूहाः लङ्कायाः चतुर्दुर्गेषु समागत्य तानभेद्यदुर्गान् परिवेष्टितवन्तः ।

तत्र लङ्कां, समाक्रम्य राक्षसैः सह महान् युद्धः प्रारभ्धः सैन्येन । एतस्मिन् द्वन्दयुद्धे वानरसैन्येन बहवो राक्षसा निहताः ।

ततश्चेन्द्रजिन्मेघानादेन सह घोरतरयुद्धो बभूव । इन्द्रजितो ब्रह्मास्त्रप्रयोगेन लक्ष्मणो मूर्च्छितो बभूव । ततश्च जाम्बवता समादिष्टो हनुमान् हिमालयात् सञ्जीवन-औषधीनानीतवान् । लङ्कातः सुषेणनामा वैद्योऽपि समानीतः । तेनौषधिघ्राणेन लक्ष्मणो मूर्च्छा-रहितो जातः । अतः पुनः वानरसैन्येन सह युद्धे शोणिताक्ष-यूपाक्ष-मकाराक्षप्रभृतिराक्षसा यमलोकं गताः ।

मध्ये चागस्त्यः ऋषिरागत्य रावणविजयार्थमादित्यहृदयस्तोत्रस्य पाठार्थमादिदेश ।

अनन्तरं रामरावणयोः महद्युद्धे रामेण रावणः हतः ।

सुग्रीवादिसहितः सीतालक्ष्मणयुतो रामचन्द्रोऽयोध्यां प्रस्थितवान् । भरद्वाजाश्रममागत्य वरं संप्राप्य हनुमांश्च निषादराजं गुहं सूचितवान् हनुमांश्च-

काशमार्गेण नन्दिग्राममागत्य रामागमनसूचनां भरताय ददौ। रामागमनसमाचारं श्रुत्वा सर्वाः मातरः पौरवासिनश्च नन्दिग्राममागत्य सुस्वागतं चक्रुः।

सर्वे आनन्दाब्धौ निमग्नाः। सर्वे पुनरयोध्यामागतवन्तस्तत्र भरतः रामाय राज्यं प्रत्यर्पितवान्। रामश्च नगरभ्रमणं कृत्वा वानरान् प्रत्यावर्तितवान् केवलं हनुमान्प्रभृति केचन एवायोध्यायां स्थिताः।

उत्तरकाण्डम्

सारांशः—अन्तिमे उत्तरकाण्डे रामसभायां ऋषिगणानामागमनं तैः साकं राज्ञो रामचन्द्रस्य वार्तालापवर्णनं विद्यते।

अस्याः कथायाः सारांशः विस्तारभयेन नात्रोद्धृतः यतो हि पूर्वस्यां कथा-यामेव यथा- कथञ्चिदेतेषां वर्णनं समाविष्टमेव। फलतः सप्तत्रिंशत् सर्गतोऽन्तिमसर्गपर्यन्तं सभायां विविधजनानामेषां ऋषीणां गमनागमनवर्णनमारम्भ रामस्य महायात्रावर्णनपर्यन्तं संक्षिप्तरूपेण कथासारांशोऽत्र विनिवेशितः।

कथामाला—ततश्च राज्याभिषेकसमये समागतानां राजाजनकप्रभृतीनां नरेशानां ससम्मानं प्रस्थानं जातम्। तैः भूपतिभिः प्रदत्तोपहारादिकं वानरसैन्यैभ्यो रामेण वितरितम्।

सीता च गर्भिणी जाता। तया सहोपवने रामस्य विहारकाले सीता च तपोवन- दर्शनार्थमिच्छां प्रकटितवती। रामेणाज्ञा प्रदत्ता।

मध्ये चैकेन भद्रनाम्ना गुप्तचरेण सीताप्रसंगे पुरवासिनामालोचना सूचिता तथा च लक्ष्मणमादिष्टवान् यत् सीतां तत्र तपोवने त्यक्त्वाऽऽगच्छ। लक्ष्मणश्च राजाज्ञया सीतामादाय रथममारुह्य नौकया गङ्गापारं गत्वा तपोवने सीतां त्यजन् व्यथितो भूत्वा रामास्याज्ञां श्रावितवान्।

तत्र तपोवने शिष्येण सीतावनवाससमाचारं श्रुत्वा महर्षिः वाल्मीकिः समागत्य सीतां स्वाश्रमं नीतवान्। तत्रैव सीता पुत्रद्वयं प्रसूतवती। महर्षिणा तयोः लालन-पालनादिकं कृत्वा शास्त्रीयविधिना नामकरण-मुण्डनयज्ञोपवीतादिसंस्कारं

च विधाय रामकथा चोपदिष्टा। कुशलवनामानौ तौ बालकौ महान्तौ प्रतिभाशालिनौ जातौ।

अत्रायोध्यायां रामचन्द्राज्ञयाश्वमेधयज्ञसमायोजनं जातम्। तस्मिन्नेव यज्ञभूमौ महार्षिः वाल्मीकिः कुशलवाभ्यां साकमुपस्थितः। कुशलवौ च रामकथांश्रावितवन्तौ। रामेण तच्छ्रुतम्। महर्षिणा सीतायाः शुद्धता प्रमाणिता। तथा च सीता तत्रागत्य शपथं कृत्वा सर्वेषां समक्षमेवं पृथिव्यां प्रविष्टा। रामश्च शोकसागरे निमग्नः।

वाल्मीकिः कथयति—

इयं दाशरथे सीता सुव्रता धर्मचारिणी।
अपवादपरित्यक्ता ममाश्रमसमीपतः॥

उत्तरकाण्डे ९६।१६

बहुवर्षसहस्राणि तपश्चर्या मया कृता।
नोपाश्नीयाः फलं तस्याः दुष्टेयं यदि मैथिली॥

उत्तरकाण्डे ९६।२०

रामः कथयति—

सेयं लोकभयाद् ब्रह्मन्नपापेत्यभिजानता।
परित्यक्ता मया सीता तद् भवान्क्षन्तुमर्हति।

उत्तरकाण्डे ९७।१

रामयोर्वार्तालमपसमये महर्षिः दुर्वाससः समायातः, तस्यर्षेः क्रोधशाप-भयात् लक्ष्मणः रामं निकषा गत्वा महर्षेरागमनसमाचारं निवेदितवान्। रामचन्द्रश्च दुर्वासर्षये अतिथिसत्कारं कारितवान् सर्वे ततो निवर्तिताः। किन्तु लक्ष्मणः रामाज्ञामुपेक्ष्य वार्तालापकाले रामसमीपं गतवान्। अनेनापराधेन लक्ष्मणं परित्यक्तवान् रामः। लक्ष्मणश्च रामेण त्यागानन्तरं सशरीरं स्वर्गं ययौ।

समस्तपुरवासिभिः, भरतशत्रुघ्नाभ्यां च साकं रामः विष्णुरूपेण प्रवेशं कृतवान्। सर्वे पुरवासिनश्च ब्रह्मलोकसमीपस्थसन्तानकलोकं प्राप्तवन्तः।

पितामहवचः श्रुत्वा विनिश्चित्य महामतेः।
विवेश वैष्णवं तेजः सशरीरः सहानुजः॥

उ०का० ११० ।१२

॥ इति संक्षिप्तवाल्मीकिरामायणम्॥

अरण्यकाण्डाद्युद्धकाण्डपर्यन्तं कम्बरामायाणस्य कथासंक्षेपः

अरण्यकाण्डम्

अस्मिन् काण्डे द्वादशपटलानि सन्ति। तत्र सर्वप्रथमं चित्रकूटात् प्रस्थानकाले महर्षेः अत्रेराश्रमं गत्वा तत्र रात्रिमेकं व्यतीत्य अग्रे गमनमार्गज्ञानं प्राप्तवान् । तथा अत्रि-पात्न्यानसूयाद्वारा सीतायै विविधोपदेशप्रदानं तथा सिन्दूराद्याभरणप्रदानं वर्णितम् अस्ति ।

अस्य पटलस्य प्रथमपटलं भगवतो रामचन्द्रस्य महिमावर्णनयुक्तं मंगलाचरणं विद्यते । मूल तमिल-पद्यस्य संस्कृतपद्यानुवादः ।

यो नित्यः शाश्वतोऽयं सकलगुणयुतो निर्गुणो भेदहीनः,

यं वेदाः ज्ञानगम्यं निखिभुवनमयं नेति नेति ब्रुवन्ति ।

साक्षाद् ब्रह्मात्मक यं दशरथतनयंनविदुस्तत्स्वरूपम् ।

सोऽयं मे हीनबुद्धौ प्रविशतुकृपया सर्वदा रामचन्द्रः ॥

अत्रेः आश्रमे रात्रौ विस्रम्य अत्रि-अनसूयाभ्याम् आशीर्वचनं गृहीत्वा द्वितीयदिने प्रातःकाले दण्डकारण्यनामकं वनं प्रविवेश । सहसा तत्र विकसाल राक्षसः विराधः समक्षम् आयातः । यस्य विराधस्य क्रूररूपस्य वर्णनं कविना चतुर्दशपद्येषु विस्तृतरूपेण कृतम् । तेषाम् अयं सारांशः विराधस्य हस्ते एकः भीषणः त्रिशूलः आसीत् । यः त्रिशूलः विचित्राकारकः अद्‌भुतः आसीत् । तस्मिन् त्रिशूले षोडश मत्तगजाः द्वात्रिंशत् सिंहाः तथा षोडश शरभनामकं विशालाकाराः जन्तवः संश्लिष्टाः पिनद्धाः आकारतः आसन् । शस्त्रे षडजिह्वायुक्तः अष्टापद सहितः शरभः भयंकरः

जन्तुः भवति इतिं वर्णनं दृश्यते । स च कम्बन्-कविनाकठोरदन्त-तीक्ष्ण- नख-विशालशुण्ड-पक्षद्वययुक्तः अयं जन्तुः जायते इति वर्णितः । केनापि रूपेण शरभः भयङ्करः विद्यते इति तु निश्चितम् । त्रिशूलस्य वर्णनं वाल्मीकिना नान्येन कविना वा कृतम् ।

अत्र कविः कथयति यद् यः रामः प्रणवस्य ओंकारस्यार्थः ज्ञानिनां ज्ञानम् सर्वाभीष्टदायकः, धर्मस्थापनार्थाय क्षीरसागरस्य शेषशय्यां परित्यज्य भूमौ अवतरितवान् तं विष्णुस्वरूपं रामं मूर्खो विराधः एकेन वृक्षेण मारयितुमुद्यतः । इदमपि न तेन ज्ञातं यद् एकैनैव शरेण यस्य अद्भुतः त्रिशूलः खण्डितो जातः स राम कथं वृक्षेण हन्यते । (अत्र कविना परब्रह्मस्व- रूपस्य रामस्य पुनः पुनः वर्णनं कृत्वा स्मारयति यद् 'रामः' परमात्मा ।)

सीता लक्ष्मणाभ्यां सहितः श्रीरामः शरभंगस्य ऋषेराश्रमं सायंकाले प्राप्तवान् । सीता च 'कुरा' नामकपुष्पेण 'कोङ्गुनामक' पुष्पकोरकेण च अलङ्कृता आसीत् । शरभङ्गास्रमे 'अराम' नामकः वृक्षः विशेषरूपेण आसीत् । तस्माद् वृक्षात् मधुरः सुवासः प्रस्फुटितो जायते ।(अरामनामकदक्षिणभारतीयपुष्पवृक्षः कुंकुम-वृक्ष इत्यपि कथ्यते । अर्थात् कुंकुमः अरामा-वृक्षात् एवोत्पद्यते ।)

एतस्मिन् समये एव अत्र शरभङ्गः ऋषिः अग्नि प्रज्वाल्य तत्र प्रवेष्टुकामः आसीत् । तदैव रामेण पृष्टम् यद् इदं तु किं कर्तुमुद्यतो भवान् ? शरगङ्गेनोक्तम्—मम उभे पापपुण्य- कर्मणी विनष्टे जाते । अत एव अग्नौ प्रविशामि । कृपया आज्ञां देहि ।

पुनरुक्तं—यदा अहमत्र आगतवान् तदैव भवान् कथमग्नौ प्रवेष्टुमिच्छति । महर्षिणा प्रोक्तम्—सहस्त्रवर्षपर्यन्तं मया तपस्तप्तं तेन तपोबलप्रभावेण मया ज्ञायते यद् यदा पापपुण्ये उभे समाने भवतः तदैव भगवद्दर्शनं (परमात्मनः प्रत्यक्षं) जायते । स समयः समुपस्थितः ।

भगवतो रामचन्द्राज्ञया शरभङ्गः पत्न्या साकं अग्नौ प्रविश्य "अक्षरब्रह्मपदं" मोक्षपदं प्राप्तवान् । यत् पदं यां गतिं च सर्वे ऋषयः साधकाः तपस्विनः इच्छन्ति । कविः कथयति यत् जन्मजन्मान्तरतपस्ययापि यत् पदं लब्धुं न शक्यते

तत् यदा कदा कोऽपि महान् तपस्वी एव प्राप्तुं शक्नोति । तत् पदं शरभंगेण साक्षात् परब्रह्म-स्वरूपस्य सकलकल्याणकारकस्य वेदवर्णितभगवतो रामचन्द्रस्य समक्षमेव प्राप्तम् । (वाल्मीकिरामायणे पत्न्या सहाग्निप्रवेशस्य कथा न विद्यते) ।

श्रीरामः मुनिं नमस्कृत्य स्तुतिं च कृत्वा अपृच्छत्—भवताम् आज्ञां श्रोतुं समुत्सुकोऽहम् । तैरुक्तम्—अहर्निशं वयं राक्षसैः सम्पीड्यमानाः बलहीनाः धैर्यरहिताश्च सञ्जाताः । अस्मान् समुद्धरन्तु भवन्तः । सूर्यकुलभूषणो रामोऽब्रवीत्—यदि ते राक्षसाः मम शरणे नागच्छेयुः तर्हि दण्डकारण्यस्य का कथा समस्ते ब्रह्माण्डे कोऽपि तान् रक्षितुं न समर्थः । एवं दशवर्षाणि यावत् तस्मिन्नेव दण्डकारण्ये वसतिं चक्रे । राक्षसानाम् उपद्रवाः विलुप्ताः जाताः । (दण्डकारण्ये दशवर्षाणि यावद् रामो निवासं चकार इयं नूतनकथा अस्मिन् एव रामायणे विद्यते ।

स अद्य सुसम्पन्नः । रामेणोक्तम्—हे लक्ष्मण ! अगस्त्यर्षेः दर्शनस्य प्रबलोत्कण्ठा विद्यते । सुतीक्ष्णः अब्रवीत्—अवश्यमेव तत्र गच्छन्तु भवन्तः सर्वं मङ्गलं भविष्यति । सोऽपि अगस्त्यः भवतां प्रतीक्षायां समुत्कण्ठायां च वर्तते । एवमुक्त्वा स ऋषिः अगस्त्याश्रमगमनमार्गम् अदर्शयत् । पुष्कलं आशीर्वादं च प्रदत्तवान् । सीता लक्ष्मणाभ्यां सहितः भगवान् रामचन्द्रः अगस्त्याश्रममागतवान् ।

परमेश्वरः शिवः यथा पाणिनये संस्कृतव्याकरणस्य शिक्षां ददौ, तथैव अगस्त्याय तमिल् भाषायाः व्याकरणस्य शिक्षां ददौ इति पुराणे वर्तते एवं कम्बन् कविः प्रतिपादयति । अगस्त्यश्च स्वमेधाशक्त्या तमिल्भाषां व्याकरणबद्धां श्रेष्ठभाषारुपेण प्रतिष्ठापितवान् इत्यपि कम्बन् कविः कथयति । अगस्त्यश्च महान् हृष्टो भूत्वा मनसि चिन्तितवान् यत् वेदपुराणशास्त्रादीनामध्ययनेन अन्वेषणेन च यस्य परमात्मनः ज्ञानं कठिनं वर्तते स एव परमात्मा रामचन्द्रः मम समक्षमुपस्थितो वर्तते इति चरमतपस्यायाः फलम् । शिष्टाचारानन्तरं रामचन्द्रेणोक्तम् । वयम् कुत्र तिष्ठेम इति निर्दिशन्तु कृपया ।

तदा अगस्त्येण "पञ्चवटी" नामकस्थानस्य मार्गः दर्शितः । तस्य स्थानस्य सौन्दर्यं महत्त्वं च वर्णितवान् । रामश्च मुनेराज्ञां गृहीत्वा पञ्चवटीं प्रति प्रस्थितः ।

विशेषः

अगस्त्येन तमिलभाषायां व्याकरणस्य रचना कृता। पाणिनिश्च संस्कृतभाषायां व्याकरणरचनां कृतवान्। भगवता शिवेन पाणिनिः संस्कृते, अगस्त्यश्च तमिले व्याकरण- निर्माणार्थमादिष्टौ इति तमिलभाषायाः पारम्परिके इतिहासे वर्तते।

अगस्त्याश्रमात् प्रस्थाय सीतालक्ष्मणाभ्यां सहितः रामचन्द्रः नदीपर्वतवनोपवनानि पश्यन् गृध्रराजस्य जटायोः दर्शनं कृतवान्। स जटायुः मन्दराचलपर्वतसमं विराजमानः असीत्। यश्च एकस्मिन् श्यामपर्वतस्य शिखरे उन्मुक्ते स्थले स्थितः आसीत्। तस्य कान्तिः सूर्यसमाना आसीत्। यया कान्त्या प्रकाशपुञ्जः प्रसृतः जायते। एवं तेजोयुक्तं जटायुं रामचन्द्रः ददर्श। रामचन्द्रः शंकितः सन् मनसा चिन्तितवान् यत् प्रायः कोऽपि महान् स्यात्।

जटायुरुक्तवान्—तव दिवंगतपितुः दशरथस्य सखा अस्मि। एतत् ज्ञात्वा राम- लक्ष्मणावपि प्रणमेतुः। जटायुरब्रवीत्—अहं महापापी अस्मि, मम सखा दशरथः स्वर्गतः। ममापि श्राद्धसंस्कारं कुरु। इदं श्रुत्वा रामो ब्रूते यत् पिता तु अस्मान् अनाथान् कृत्वा दिवंगतः। लक्ष्मणेन च श्रीरामचन्द्रस्य पूर्ववृत्तान्तं, विश्वामित्रेण सह गमनं, ताडकावधं, मिथिलायां शिवधनुर्भंगवर्णनं, सीतायाः विवाहः इति समग्रवर्णनं कृतम्। सर्वं विज्ञाय जटायुरवदत्—अहं तव रक्षां करिष्यामि। यूयं गोदावरीनदीतटे शान्तां सौन्दर्यमयीं पञ्चवटीं गत्वा तत्र तिष्ठत। यूयं पादैः चलत। अहं आकाशमार्गेण युष्माकं मस्तकेषु पक्षैः छायां कुर्वन् पञ्चवटीं यावद् गच्छामि। (इयमपि घटना नूतना)

तत्र पञ्चवटीक्षेत्रे लक्ष्मणेन निर्मितपर्णशालायां सीतासहितो रामः निवासं कुर्वन्नस्ति। तत्र सहसा शूर्पणखा दैवप्रेरिता समुपस्थिता। या च अस्मिन् क्षेत्रे एकाकिनी एव निवसन्ती आसीत्। अत्र कविकम्बेन कारणद्वयं प्रदर्शितम्। एकं च तस्याः "अतृप्त-कामवासना" अपरञ्च "स्वपत्युः हन्तारं रामं प्रति क्रोधः"। किन्तु रामस्याद्भुतसौन्दर्यं दृष्ट्वा मोहिता जाता। तथा रामं निकषा आगमनात् पूर्वं

स्वकीयराक्षसजातिसिद्धप्रक्रियाद्वारा अतिसुन्दररूपं धृत्वा समागतवती। येन रामः तदुपरि त्वरितमेव मुग्धो भवितुमर्हति।

राममुपगत्यावदत्—अहं त्वया सह विवाहयोग्या अस्मि। यदि मम विवाहः त्वया सह भविष्यति; तर्हि रावणः अपि देवैः ऋषिभिश्च वैरभावं परित्यज्य सर्वथा तव सहायकः भविष्यति। (एवं कथा वाल्मीकिरामायणे नास्ति।)

रामः शूर्पणखां प्रति उक्तवान्—त्वं शीघ्रमितः गच्छ। अन्यथा क्रोधी ममानुजः लक्ष्मणः किमपि कर्तुं शक्ष्यति। ततश्च लक्ष्मणः तां दृष्ट्वा तस्याः नासिकां स्तनं च चिच्छेद। सा हाहाकारं कुर्वती भूमौ निपतिता जाता। पुनश्च रक्तरञ्जितेन देहेन निरूपवती एव भ्रातरं खरनामकभीषणराक्षसं निकषा गत्वा घटनामिमां वर्णितवती। (स्तनच्छेदघटना वाल्मीकिरामायणादिषु न विद्यते।)

यद्यपि शूर्पणखा लङ्कां प्राप्तवती किन्तु खरदूषणत्रिशिराप्रभृतिमहाबलशालिनां भ्रातृणां विशालसैन्येन साकं विनाशस्य कथां विस्मृतवती। तस्याः मनसि केवलं रामचन्द्रस्य मनोहररूपमेव विद्यते स्म, येन सहसा विवाहं कृत्वा वासनातृप्तिं निरन्तरं कामयते स्म। यद्यपि तस्याः अङ्गानि छिन्नभिन्नानि जातानि। मणिमण्डपे विराजमानं महिमामण्डितं रावणसमीपमासाद्य घटनामिमां श्रावयितुं समुपस्थिता बभूव।

शूर्पणखा अवादीत्—ममापराधस्य एकमेव कारणं यत् एका स्त्री तेन सह विद्यते यस्याः वर्णनं चित्रांकनं च कठिनम्। यस्याः नाम सीता वर्तते। यस्याः वचनम् अमृतमयम्। जलवर्षकश्यामलमेघसदृशानां तस्याः सुदीर्घकेशानाम् आपादलम्बिता वेणी अत्याकर्षक- रूपेण विद्यते। पृथक् पृथक् तस्या अङ्गवर्णनं तु कठिनम्। त्वं तु स्वयमेव तां द्रक्ष्यसि। तामेव तुभ्यमानेतुं तत्राहं गतवती। यत्र ममेयं दुर्दशा जाता।

ततः आकाशमार्गेण वायुयानेन रावणः तपोरतं मारीचं निकषा समुपस्थितः। मारीचः तं दृष्ट्वा समुचितातिथिसत्कारं कृत्वा पृष्टवान् यत् कथं लंकाधिपतिः भवान् कष्टदायके अस्मिन् वनप्रान्तरे समागतवान्। रावणेनोक्तम् यद्

दण्डकारण्ये स्थितेन एकेन मनुष्येण तव भगीनीपुत्र्याः शूर्पणखायाः नासिका विच्छिन्ना । इतः परं मम कुलस्य का हेयता भवितुर्महति । अधुना मम मनः दग्धं विचलितं च वर्तते ।तं हन्तुं नेच्छामि किन्तु तेन साकं एका सुन्दरी स्त्री वर्तते तां येन केन प्रकारेण हर्तुमिच्छामि ।

मारीचेनोक्तम्—किं मया कर्त्तव्यम् । रावणो ब्रूते—त्वं-स्वर्णमृगो भूत्वा तां सर्वसुन्दरीं सीतां प्रलोभय । इत्युक्त्वा अन्येन मार्गेण रावणः निर्गतः । मारीचश्च स्वर्णमृगस्य रूपं धृत्वा तत्र गतवान् । तं स्वर्णमृगं दृष्ट्वा सीता लुलुभे, तथा रामचन्द्रं तमानेतुं प्रेरितवती । रामश्च तथैव कृतवान् । मारीचं च जघान ।

ततो रामश्च दुःखितः सन् त्वरितमेव कोऽपि उपद्रवः भविता इत्याशंक्य पञ्चवटी- पर्णशालां प्रति परावर्तितवान् । मारीचस्तु पञ्चत्वं गतः ।

रावणस्तु इदं सर्वं गुप्तस्थाने उपविश्य पश्यन्नासीत् । अवसरं प्राप्य हस्ते त्रिदण्डं धृत्वा संन्यासिवेषे तत्रोपस्थितः । स शनैः पदमग्रेसरं कृत्वा सीतायाः पर्णशालां प्राप्तः । कपटी स साधुः स्वकीयदशग्रीवमस्तकरूपं प्रदर्शयन् रावणरूपेण समुपस्थितः उक्तश्च-अहं त्रिभुवनविजयी रावणः अस्मि । बलेन एकेन लोहखण्डेन भूमिं खनित्वा भूखण्डसहितां सीतामुत्थाप्य स्वरथे स्थापितवान् ।

रावणश्च आकाशमार्गेण वेगेन गच्छन् जटायुना पृष्टः-रे नीच ! कुत्र गच्छसि ? तत्रैव तिष्ठ इति वज्रस्वरेण कथितवान् । त्वं पुरुषोत्तमरामस्य पत्नीं नीत्वा स्थलमार्गेण आकाशमार्गेण वा गन्तुं न शक्ष्यसि। इत्युक्त्वा जटायुः स्वकीयविशालपक्षैः मार्गं रोधयामास सीतां प्रति उक्तवान् यत् मा भैषीः । रावणेनानेन तव स्पर्शः न कृतः । यतो हि विशालभूमिखण्ड- सहितां त्वाम् उत्थाप्य रथे निवेशितवान् । अतश्च त्वं सर्वथा पवित्रा निर्दुष्टासि । (भूमिखण्ड- सहितसीतोत्थापनकथा अत्रैव विद्यते नान्यस्मिन् रामायणे । प्रायः न कोऽपि कविः सीतां रावणेनास्पृष्टां प्रदर्शितवान्)

अत्र इयं घटना जाता । तत्र पञ्चवटीक्षेत्रे लक्ष्मणेन सहितः रामचन्द्रः पर्णशालामागत्य सीतामदृष्ट्वा व्याकुलो जातः । लक्ष्मणश्च एकाकिनीं सीतां

परित्यज्य कथं भवदन्वेषणार्थं प्रस्थितवान् इति पूर्वोक्तसर्वाः घटना वर्णितान्। तद् उभौ विचारितौ यद् अत्र विलम्बकरणेन न किमपि फलम्। अग्रे गत्वा सीतान्वेषणं विधेयम्।

ततः रामेणोक्तम्—हे अनुज लक्ष्मण ! त्वं इतः गच्छ। अहं जीवित्वा किं करिष्यामि। प्राणप्रिया सीता हता। पितृतुल्यः जटायुः अपि मृतः। एवं स्थितौ मम निन्दापवाद- जीवनेनालम्। मया तु अद्यैव राक्षसस्य सामिषं भोजनं भवितव्यम्। (एवं रूपा कथा वाल्मीकि-रामायणे नास्ति।) ततः लक्ष्मणेनोक्तम्—हे मानवरूप-धारिन् ! अग्रज ! किमिदं कथनं तव शोभनम्? किं एवं कृत्वा भवतः कीर्तिः स्थास्यति वा निर्लुप्ता भविष्यति? वनगमन-समये मम माता सुमित्रा अवादीत् यत् निरन्तरं रामस्याज्ञायां स्थास्यसि। यदि मरणस्य स्थितिः संभाविता तर्हि प्रथमं त्वमेव मृत्योः वरणं करिष्यसि। पुनःश्चोक्तं लक्ष्मणेन-परात्परब्रह्मस्वरूपः किं भवान् मरिष्यति। यः अजः नित्यः शाश्वतः पुराणपुरुषः परब्रह्म अस्ति। भवतां कथनस्य कोऽयमर्थः?

अत्र लक्ष्मणस्य उभयथा उक्तिः अतीव गम्भीरतया श्लाघनीया विद्यते। यत्र एतेन वचसा मनुष्यरूपधारिणं रामचन्द्रं कर्त्तव्यं स्मारयति। अत्रैव अपरेण वचसा परात्परब्रह्म- स्वरूपं स्मारयति इति गुह्यात् गुह्यतमम्। (इयमपि गरीयसी नूतनकथा)

पश्चात् शवरीकुटीरमगच्छद् रामः शबरी च रामदर्शनेन योगशक्त्या शरीरं परित्यज्य गोलर्क-मोक्षपदं प्राप्तवती। रामलक्ष्मणौ च शबरीप्रदर्शितपथा नदीपर्वतादिकं लंघयन् पावनपम्पासरस्तटमागतवन्तौ। यत् पम्पासरः प्रतिदिनं असंख्यजनान् स्वकीयस्नानेन जलसिञ्चनेन च पापात् निवारयन्ती प्रवहति। अतः पम्पासरोवरं मूर्त्तरूपं पुण्यं सरः कथ्यते।

(इदं पुण्यं पम्पासरः दक्षिणभारतस्य कर्णाटकराज्ये इदानीमपि प्रवहति यच्च महत्तीर्थं विद्यते।)

किष्किन्धाकाण्डम्

पञ्चवटीक्षेत्रात् सीतान्वेषणार्थं शोकाकुलो रामचन्द्रः लक्ष्मणेन साकं पावनपम्पासरोवरतटं प्राप्तः। तत्र पम्पासरोवरस्यापूर्वां विचित्रां मनोहारिणीं शोभां कतिपयपद्यैर्वर्णयति कवि-कम्बन्-महाशयः।

अत्र कविकल्पनेयं यत् सुदीर्घवेणीयुक्तायाः सीतायाः संकेतं दातुमशक्ताः हंसाः अग्नौ प्रविशन्त्य इव दृश्यन्ते। तत्र पम्पायाः जलं पीत्वा जनाः मधुमत्ताः जायन्ते। यथा बिम्बाधरवतीनां नारीणामधरपानं कृत्वा लोकाः समदाः भवन्ति। तत्र हंसयुग्माः परस्परमालिङ्गनं कुर्वते। विभिन्नजातीयाः पक्षिणोऽत्रागत्य निवसन्ति ये चास्पष्टं कूजन्ति शब्दायन्ते च।

रामलक्ष्मणौ शबरीनिर्दिष्टमार्गेण ऋष्यमूकपर्वतं शीघ्रतया अनायासेन प्रस्थितौ। तस्मिन्नेव पर्वते भयभीतः सुग्रीवः निवसति स्म। तत्रागतं रामं दृष्ट्वा तं शत्रुमेव मत्वा ततः पलायितुं तत्परोऽभूत्। तत्र वायुपुत्रं हनुमन्तं प्रति अवादीत्।

ततः अञ्जनापुत्रः हनुमान् ब्रह्मचारीवेषं धृत्वा रामं निकषा आगत्य मनसि चिन्तितवान् यदयं तपस्विवेषधारी धनुर्धारी वर्तते। हनुमान् तौ प्रणम्य अत्रागमनकारणं पप्रच्छ। ततः पूर्वं स्वकीयपरिचयं कथयति यद् अहम् अञ्जनागर्भसम्भूतः पुत्रः हनुमान् अस्मि।

अस्मिन् पर्वते सूर्यपुत्रः सुग्रीवः निवसति यस्याहम् आज्ञाकारी सेवकः। भवदागमनेन सुग्रीवो व्याकुलो वर्तते। अत एव भवत्सम्बन्धिजिज्ञासार्थमत्रोपस्थितः। हनुमान् अब्रवीत्- इदं तु सुग्रीवस्य भाग्यं यत् स्वयं भवान् दर्शनं प्रदातुं समुपस्थितः। सूर्यपुत्रः सुग्रीवः इन्द्रपुत्रेण निर्दयेन वालिना पीडितः वर्तते सर्वेषाम् अभयप्रदानार्थं भवताम् आगमनं जातम्। किन्तु सुग्रीवं प्रति भवतां परिचयं केन रूपेण कथयिष्यामि इति विनम्रजिज्ञासा वर्तते। कृपया आज्ञां ददातु त्वरितमेव तं सूर्यपुत्रं सुग्रीवं भवतां शरणम् आनयामि। एवमुक्त्वा हनुमान् प्रस्थितः।

हनुमान् शिवतुल्यनृत्यं कुर्वन् सूर्यपुत्रं सुग्रीवं निकषा गत्वा प्रोवाच यद् भूभारहरणार्थमवतरितः श्रीरामचन्द्रः समुपस्थितः।

हनुमतः सर्वं विवरणं श्रुत्वा सुग्रीवः रामचन्द्र एव शरणमिति तच्चरणयोः आत्मानं समर्पितवान्। उभयोः मैत्री सञ्जाता। रामसुग्रीवयोः मैत्री तथा दृश्यते यथा पूर्वकृततपस्यायाः फलं तत्कालप्रयत्नश्च उभौ संमिलितौ। सुग्रीवेंण सर्वं स्वकीयवृत्तान्तं निवेदितं यथा अग्रजेन वालिना स निर्वासितः। सर्वं विज्ञाय रामेण प्रतिज्ञातं यत् तव शत्रुं वालिनं हत्वा त्वाम् तस्मिन् राज्ये स्थापयिष्यामि राज्यं तु अधुनैव प्रदत्तम्। चतुर्दशभुवनेषु त्रिलोकेषु च कोऽपि तं रक्षितुं न समर्थः। यतो हि स अनुजपत्नीं जहार केवलं तस्य वासस्थानं परिदर्शय। हनुमता सह सुग्रीवः तं नीत्वा महान्तं विशालं समुन्नतं च सप्ततालवृक्षसमीपमानीतवान्।

अनेन पथा गन्तव्यम् इति वदन् सुग्रीवः श्रीरामलक्ष्मणाभ्यां सहितः तत्रागतः। यत्र समुन्नताः विशालाः सप्ततालवृक्षाः आसन्। तत्रागत्य सुग्रीवोऽवदत्- यदि एकोऽपि वृक्षः भवद्बाणेन विद्धः स्यात्; तर्हि मम मनसः कष्टं दूरीभविष्यति।

त्वरितमेव रामचन्द्रः धनुषि प्रत्यञ्चामाधाय तत्र विशालशालवृक्षं निकषा गत्वा एकेनैव बाणेन सप्ततालवृक्षान् भेदयामास। तथा सप्तवृक्षातिरिक्तं किमपि वस्तु नासीत्। अतः स बाणः पुनः रामचन्द्रसमीपमागतः। अन्यथा यदि किञ्चिद् वस्तु अग्रेऽपि अस्थास्यत् तर्हि तदपि विद्धम् अभविष्यत्।

अतिविशेषः—

अनया घटनया समस्ते अस्मिन् विश्वस्मिन् एकीभूताः ये च सप्त संख्याकाः आसन् वर्तन्ते च ते सर्वे सहसा चिन्तिताः व्याकुलाश्च सञ्जाताः। यतो हि यदि एकेनैव बाणेन रामेण विशालाः सप्ततालवृक्षाः विद्धाः तर्हि अन्ये च ये सप्तसंख्याकाः एकत्रीभूताः पदार्थाः, लोकाः, देवाः, ऋषयः, पर्वतप्रभृतयः सन्ति तेऽपि कदाचिद् विनाशतां प्राप्स्यन्ति यथा

(१) सप्तलोकाः- भूलोकः, भुवर्लोकः, स्वर्गलोकः, जनः, महः, तपः, सत्यम् च।

(२) सप्त पर्वताः—कैलासः, हिमवान्, मन्दराचलः, विन्ध्याचलः, निषधः, हेमकूटः, गन्धमादनम् च।

(३) सप्तसमुद्राः-लवणम्, इक्षुरसः, सुरा, घृतम्, दुग्धम्, दधि, जलम् च ।

(४) सप्त ऋषयः—अत्रिः, भृगुः, कुत्सः, वशिष्ठः, गौतमः काश्यपः, अंगिराः च ।

(५) सप्तछन्दांसि-गायत्री, उष्णिक्, अनुष्टुप्:, बृहती, पंक्तिः, त्रिष्टुप्: जगती च ।

(६) सप्तकन्याः-ब्रह्माणी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा च ।

(७) सूर्यस्य सप्त अश्वाः-लोकसाक्षी, त्रिलोकेशः, कर्ता, हर्ता, तमिस्त्रहा, तपनः, तापनः । (साम्बपुराणे सूर्यस्तोत्रं—शब्दकल्पद्रुमः)

वर्णनमिदं सर्वथा अद्भुतम् अदृष्टपूर्वम् । भारतीयवाङ्मयेषु कस्मिन् अपि रामकाव्ये नेदं वर्णनं नेदृशी कल्पना नेदृशः चमत्कारः कुत्रापि परिलक्ष्यते । इदं हि वैशिष्ट्यम् ।

इत्थं च सुग्रीवेण निवेदितं यद् भवान् साक्षात् परब्रह्मरूपः परमात्मा सृष्टेः प्रपञ्चकर्ता धर्मसंरक्षकः वर्तते । सर्वे वानराश्च तत्र आनन्देन नृत्यन्ति स्म ।

सप्ततालवृक्षभेदनान्तरं दुन्दभिराक्षसस्य अस्थिपर्वतविध्वंसानन्तरम् ऋष्यमूक- पर्वते स्थितं रामचन्द्रं वार्तालापक्रमे सुग्रींवेणोक्तम्-एकस्मिन् दिने वयमत्र समुपविष्टाः आस्म । तदा दुष्टः रावणः आकाशमार्गेण एकां नारीं नीत्वा गच्छन्नासीत् । सा च नारी एकस्मिन् वस्त्रखण्डे कियन्ति आभरणानि अधः प्राक्षिपत् । अहं च आभरणसहितं वस्त्रखण्डं नीत्वा रक्षितवान् ।

अत्यन्तमधुरभाषी सुग्रीवः तानि आभरणानि आनीय रामसमीपं स्थापितवान् । तानि आभरणानि दृष्ट्वा रामचन्द्रस्य स्थितिः यादृशी जाता तस्याः स्थितेः वर्णनं नितान्तं करुणापूर्णं वेदनापूर्णं च । रामः तथा द्रवींभूतो जातः यथा अग्नौ घृतं द्रवीभूतं भवति । सर्वाणि आभरणानि हृदि मस्तके च निधाय रामो भृशं विललाप । विलापक्रमे एव सीतायाः अङ्गप्रत्यङ्गस्य स्मरणं जातम् ।

ततः सुग्रीवः रामचन्द्रं प्रति उक्तवान्—हे भगवन् ! ब्रह्माण्डस्य कस्मिन्नपि मार्गे स्थितां तां सीतामन्विष्य निश्चितमेव आनयिष्यामि । श्रीमान् निश्चिन्तं तिष्ठतु । इति श्रुत्वा हनुमान् अवदत्-प्रथमं वाली निहन्तव्यः तथा सुग्रीवाय राज्यप्रदानं, ततश्च विभिन्नदिशासु वानर-सैन्यानां सीतान्वेषणार्थं प्रेषणं वरम् । रामः विचारेणानेन सहमतो बभूव ।

रामः सुग्रीवं समीपमाहूय कथितवान् यत् त्वं वालिसमीपं गत्वा युद्धार्थं तम् आह्वय । अहं तु प्रक्षिप्तरूपेण युवयोः युद्धं पश्यन् बाणं प्रक्षेप्स्यामि । येन स निहितः स्यात् । सुग्रीवेण तथास्तु इत्युक्त्वा वालि समीपस्थप्राचीरं निकषा गत्वा उच्चैः उच्चतरैः गर्जनं कृतम् ।

वालिसुग्रीवयोर्मध्ये यादृशः भीषणः युद्धः प्रारब्धः तस्य वर्णनं शतशः पद्यैः महाकविना कम्बनेन कृतम् । विस्तरभयात् न तस्योल्लेखः क्रियते । वाली सुग्रीवं यदा भूमौ पातयितुमेव ऐच्छत् तन्मध्ये एव एकेन शरेण रामेण वाली विद्धः । वाली भूमौ निपपात ।

येन बाणप्रभावेण वाली भूमौ पतितः तस्मिन् बाणे अङ्कितं रामनाम दृष्ट्वा शोचते यत् कथं त्रिलोकस्य संरक्षकः भक्तानाम् अभीष्टदायकः ऐहिकः पारलौकिकभवरोगस्य महान् औषधः महान् महिमामयः रामशब्दः वर्तते । कथमयं गृहत्यागी वनवासी धर्ममार्गात् निर्गत्य सूर्यवंशस्य प्रख्यातकीर्तिं च विहाय कथमिदं दुष्कर्म कृतवान् । अत्र को मम दोषः ? यदि स्वयं राम एव एवं कुरुते तर्हि अन्यस्य का कथा ? मुमूर्षुः वाली पृच्छति—हे राम ! किं प्रच्छन्नो भूत्वा बाणसंचालनं क्षात्रधर्मः ? किं रिक्तहस्तस्य मम वक्षसि एवं रूपेण वाणवेधनं युक्तम् ?

ततः रामेणोक्तम्—त्वम् निरपराधं स्वानुजं सुग्रीवं हन्तुमुद्यत आसीत् । तथा च अनुजपत्नीं हृत्वा स्वपत्नीत्वेन स्वीकृतः । एतानि बहूनि कारणानि सन्ति । यैः कारणैः निर्दोषस्य रक्षार्थं मया बाणः प्रक्षिप्तः ।

ततः वाली रामं प्रार्थयामास यद्भूतं तत्र का चर्चा । अधुना ममानुजोपरि कृपा विधेया । अयं महाबुद्धिशाली बलवान् हनुमान् विद्यते । अयञ्च मम पुत्रः अङ्गदः

निरन्तरं तव सेवायाम् स्थास्यति । एवमुक्त्वा शिरसि अञ्जलिं निधाय स्वकीयमोक्ष-पदप्राप्त्यर्थं याचते स्म । रामेण 'तथास्तु' इति कथितम् । तदनन्तरम् अङ्गदसुग्रीवप्रभृतयो वानराः तथा वालिपत्नी तारा च विलापं कुर्वन्तः कुर्वन्ती च शोकसागरे निमग्नाः । तदा वालिनः अन्तिमसंस्कारार्थम् अंगदादयः सर्वे संलग्नाः बभूवुः ।

वालिश्राद्धानन्तरं श्रीरामचन्द्रः बुद्धिमन्तं कनिष्ठं लक्ष्मणम् आदिष्टवान् यत् सूर्यपुत्रं सुग्रीवम् अभिषेचयतु । रामस्याज्ञां प्राप्य लक्ष्मणः हनुमन्तं कथितवान्-राज्याभिषेकमंगल- कार्याय अपेक्षितावश्यकसाधनानि आनयतु ।

तदा रामेणोक्तम्—नारीकारणेन पुरुषस्य विनाशो भवति कष्टं जायते च । अस्य ज्वलन्तम् उदारहणं तवाग्रजः वाली तथा तवाग्रे चाहम् । नान्यद् उदाहरणं मया दीयते यद्यपि बहुशः उदाहरणानि सन्ति । यदि प्रजाः त्वाम् स्वामिनं मन्तुं नोत्सहन्ते तथापि त्वं प्रजां स्वजननीरूपां धात्रीतुल्यां मानय । तस्याः सेवां च कुरुष्व । एतानि अतिमहत्वपूर्णानि विशिष्टोपदेशवाक्यानि श्रुत्वा सुग्रीवः तथैव कर्तुं प्रतिज्ञातवान् ।

हनुमन्तं प्रति च अवादीत्—हे महावीर ! त्वमपि स्वबुद्धिबलेन शासन-कार्ये सहायको भव । रामचन्द्रमुखेन एतवान् महत्त्वपूर्णः उपदेशः राजनीतिशास्त्रस्य मूलभूतं तत्त्वं च नान्येषु रामायणेषु अवलोक्यते ।

वाल्मीकिना अपि अत्र वर्णनं विशिष्टरूपेण कृतम् । (किष्किन्धा काण्डस्य २४ तमे सर्गे वालमीकिना ७७ पद्येषु वर्णनं कृतं किन्तु कम्बनेन १२० पद्येषु वर्णनं कृतम् ।)

तत्र प्रसङ्गाद् वर्षर्तोः वर्णनावसरे इयं कल्पना नूतना विद्यते । मेघैः जल-धाराः पतन्ति । या जलधाराः सीतावियुक्ताय रामचन्द्राय कामदेवस्य पुष्पवाणाः इव अनुभूयन्ते इत्थं च इयं वर्षर्तुः रामचन्द्रम् उद्वेजयति । अस्मिन् पार्वत्यप्रदेशे "वेगै" नामकपुष्पाणि "काण्डिच्चीं" स्त्रीणां केशपाशेषु निबद्धानि "शूपुनाग" पुष्पाणि धीवरवालानां केशपाशेपु सुनिबद्धानि तथा व 'कुन्दपुष्प' मांल्यानि तत्र गोपबधूनां

सुदीर्घकेशजूटिकायां संलग्नानि दृश्यन्ते। याभिः पुष्पमालाभिः सुरभिः सुगन्धिः निःसरति तथा च तत्र भ्रमराः गुञ्जन्ति। वियोगव्यथितो रामचन्द्रः एतानि पुष्पाणि कण्टकतुल्यानि मन्यते। (विभिन्नजातिनार्यः विभिन्नपुष्पाणां मालाकेशपाशेन सन्नद्धाः सन्ति इयमपि नूतना कल्पना)।

अंगदः राज्यान्तःपुरं प्रविश्य सुग्रीवस्य चरणौ विधाय उक्तवान्-रामस्यानुजः क्रुद्धः लक्ष्मणः समुपस्थितः। भवान् निर्धारितसमये रामचन्द्रसमीपं न गतवान्। अत एव भवान् कृतघ्नः मिथ्यावादी जातः। हनुमता,लक्ष्मणस्य क्रोधः शान्तः कृतः। अतः शीघ्रमेव यथायोग्यं करणीयम्।

सुग्रीवः वेगेन लक्ष्मणस्य स्वागतार्थं द्वारि गत्वा लक्ष्मणाय नमश्चकार। ततो भगवतो रामचन्द्रस्य कुशलप्रश्नं पृष्टवान् लक्ष्मणश्च सुग्रीवं दृष्ट्वा स्वकीयक्रोधं मनसि एव निधाय राज्यान्तःपुरे प्रस्तरखण्डेन निर्मितायां एकस्यां पट्टिकायाम् उपविष्टवान्। रामसमीपमागत्य सुग्रीवः रामस्य चरणौ स्वहस्ताभ्यां प्रणम्य धृतवान्।

अस्मिन् पटले सुग्रीवस्य असीमितविशालसैन्यसागरस्य विचित्रं वर्णनं विद्यते। नैतादृशसैन्यवर्णनं, कस्मिन्नपि रामकाव्ये समुपलभ्यते।

किन्तु इदं तु सर्वथा चिन्तनीयं विचारणीयं यद् एतासां संख्यानां वर्णनस्य कः आधारः किञ्च मूलस्रोतः। समस्तभूमण्डलस्यैव न हि अपितु त्रिभुनस्यापि क्षेत्रफले इयत्यः सेनाः स्थातुं न शक्नुवन्ति। अतः कविकम्बनस्य एतद्वर्णनं प्रायः अर्थवादयुक्तं वर्तते। यद् वर्णनं सुग्रीवस्य बहुसंख्यकसेनापतीनां तथा च असंख्यसैन्यानां सङ्केतमात्रमेव। इयमपि कथा नूतना।

ततः सुग्रीवः वानरसैन्यमादिशत्-यत्रैव पवित्रा कावेरीनदी प्रवहति तत्रैव अगस्त्यस्य स्थायि स्थानं वर्तते। यस्मात् विशालतमिलदेशे यूयं प्रविश्य अग्रे गन्तुं यतध्वम्। एकमासस्य अवधिः मया दीयते। एतन्मध्ये एव सीतामन्विष्य भवद्भिः परावर्तितव्यम्।

सुग्रीवस्य इमाम् आज्ञां इदं च मार्गदर्शनवर्णनं श्रुत्वा रामचन्द्रः हनुमन्तं प्रति अवादीत्- हे हनुमन् ! सीतायाः परिचयार्थं कानिचित् लक्षणानि कथयामि। इत्युक्त्वा सीतापरिचयं हनुमते प्रदाय स्वाङ्गुलीतः स्वनामाङ्कितम् अङ्गुलीयकं निःसार्य सीताप्रत्ययार्थं ददौ। एवं हि सर्वे वानरवीराः सुग्रीवनिर्दिष्टमार्गेण यथायोग्यं यथास्थानं सोल्लासं सगर्जं प्रस्थितवन्तः।

तत्र दिग्गजतुल्ये महेन्द्रनामकपर्वते समागत्य हनुमत्प्रमुखाः सर्वे वानराः दक्षिण- समुद्रं मेघसदृशं गर्जन्तं तरङ्गायमानं दृष्टवन्तः। अत्र कविः कल्पनां करोति यद् एते उत्तालतरङ्गाः स्वहस्तैः वानरान् आमन्त्रयन्ति यद् अस्माकं पार्श्वे लङ्कायां सा विशालाक्षी सुकेशी सीता वर्तते।

तत्रैव विभिन्नदेशेभ्यः अन्ये च सैनिकाः समागत्य संमिलिताः। ते सर्वे स्वकीय- सफलतां विचारयन्तः चिन्तिताः आसन् यत् कार्यसिद्धिं विना परावर्त्तनं न हि वरम्। समयावधिः च व्यतीत एव दृश्यते। किं कुर्यामो वयम्।

महेन्द्रपर्वतसमीपे जटायोः भ्राता सम्पातिः निवसन् आसीत्। अनुजस्य जटायोः मरणं श्रुत्वा सम्पातिः क्रन्दनं कुर्वन् तेषां समीपमागतवान्। तं दृष्ट्वा क्रोधाविष्टः हनुमान् उच्चैः गर्जन् तं पृष्टवान्-अरे ! कपटवेषधारिन्! वञ्चक ! राक्षस ! किं त्वं मम हस्तात् मुक्तो भविष्यसि ? ततः सम्पातिना उक्तम् यत् जटायोः कः हन्ता वर्तते, कृपया सविस्तरं ब्रूहि। अहं तस्य अग्रजः सम्पातिः नाम गृध्रः अस्मि। यदीदं सर्वं कथयिष्यसि तर्हि अहमपि सीतासम्बन्धि सर्वं विवरणं दास्यामि। अहं तु भ्रातृरहितः जातः इति अतिदुःखितः अस्मि।

तदा हनुमान् जटायुमरणस्य सर्वं वृत्तान्तं सविस्तरं श्रावयामास। यथा रावणेन जटायुः निहतः। तत् श्रुत्वा सम्पातिः उवाच- आकाशमार्गेण गच्छता रावणेन हृता सीता मया दृष्टा। सा च सीता लङ्कायां कुत्रापि भयंकरकारागारे वर्तते किन्तु अधुनाऽपि जीवति। तत्र गत्वा तां पश्य, किन्तु लङ्कागमनं न सरलम्। अतिकठिनं तत् कार्यम्। यदि संभवेत् तर्हि एकाकी एव कोऽपि गच्छतु। प्रच्छन्नो भूत्वा ताम् अवलोक्य तया सह वार्तां कृत्वा परावर्तय। तथा तात्कालिकं दुःखं दूरीकृत्य शीघ्रमेव रामसमीपं गत्वा सर्वं निवेदय इत्युक्त्वा सम्पातिः आकाशमार्गेण प्रस्थितः।

जाम्बवान् हनुमतः स्मरणं कृत्वा तम् आहूतवान् उक्तवान् च यत् हे महावीर ! हनुमन् ! रामेण सह तव निकटता वर्तते । तस्य त्वं प्रेयान् वर्तसे । कदापि मेरुपर्वताकारो भवितुं शक्नोषि । त्वं हि समुद्रतरणे शक्तः । आकाशमार्गेण च गमने सुदक्षः । ततः सर्वे अङ्गदादयः वर्धापनं कृतवन्तः । आकाशाद् देवाः पुष्पवृष्टिं चक्रुः । हनुमान् च त्वरितमेव उत्कूर्दनं कृत्वा महेन्द्र-पर्वतस्य गगनचुम्बिनं शिखरं प्राप्तवान् । हनुमतः वेगेन तत्पर्वतारूढे सति तस्य महेन्द्रगिरेः कियान् अंशः पृथिव्यां प्रविष्टः । शिखराश्च यत्र तत्र विकीर्णाः जाताः । महेन्द्रपर्वतस्तु हनुमतः चरणतुल्यो दृष्टः ।

सुन्दरकाण्डम्

अस्मिन् काण्डे हनुमतः समुद्रतरणवर्णनं, यत्र मैनाक-सुरसाप्रभृतिभिः साकं साक्षात्कारवर्णनं, स्वकीय-(हनुमतः) विशालता वर्णनं, समुद्रशोभावर्णनं च सविशेषं विद्यते । सुन्दरकाण्डं रामायणमणिमालायाः "सुमेरुः" स्पष्टमिदम् ।

मङ्गलाचरणम्

तमिल्-मूलपद्यस्य मङ्गलाचरणरूपस्य संस्कृतानुवादः नीचैः दीयते—

पञ्चतत्त्वात्मक-विश्व-प्रपञ्चनिर्माणकरः

सर्पवद्रज्जुनिवारणरामो वरः ।

निर्गुणसगुणकारो यः सर्ववन्द्यः,

जगदिदं रक्षतु स महान् रामचन्द्रः ॥

हनुमांस्तु पलके एव स्वाकारं विशालं स्वल्पं पुच्छादिप्रदर्शनं कुर्वन् अन्तरिक्षे प्रविवेश । तस्य द्रुततरवेगेन वृक्षाः लताः पशवः असंख्यपदार्थाश्च इतस्ततः विकीर्णा अधस्तादुपरि उपरितोऽधः गताः ।

यदा पर्वताकारो हनुमान् झञ्झाझावातवेगेन गच्छन्नासीत् तदाकाशमार्गं स्पृशन् 'मैनाक' पर्वतः समुद्रान्निर्गतः । स तथैव दृश्यते स्म यथा क्षीरशायी 'सहस्त्रशीर्षा' विष्णुः शेषशय्यातः समुत्थाय समागतोऽस्ति । यतः तस्यापि पर्वतस्य

सहस्त्राणि रक्तमयशिखराणि सन्ति। मैनाकस्यापरं नाम 'हिरण्यनामः' अपि विद्यते । मैनाकः दुःखितः सन् पुनरुत्थाय हनुमतः समीपमागत्य प्रार्थितवान्-हे तात ! शृणु नाहं तव विरोधी । यदा इन्द्रेण मम पक्षच्छेदनं कृतं तदा तव पित्रा वायुना ममोपरि दयां विधाय समुद्रे निक्षिप्य कथितं यद् यदा रामचन्द्रस्याज्ञया सीतान्वेषणार्थं मम पुत्रः हनुमान् आगमिष्यति तदा तव उद्धारः भविष्यति, त्वं च तस्य साहाय्यं करिष्यसि । तस्य वचनेनैव अहं तव सेवार्थं समुपस्थितः । क्षणमत्र विश्रम्य गम्यताम् । अहं तव सर्वथा हितकारी । ममातिथ्यं स्वीकुरु । फलादिकं भक्षय । हनूमान् तं संबोद्ध्य प्रस्थितवान् ।

एतन्मध्ये देवाः सुरसानाम्नीं राक्षसीं हनुमत्समीपं प्रेषितवन्तः हनुमतः बलं ज्ञातुम् । इयं सुरसा यद्यपि राक्षसी तथापि गुणवती आसीत् । (वाल्मीकिना इयं नागमातृशब्देन कथिता)

हनुमतः समीपमागत्य उक्तवती यद्द्य देवैः मह्यं सामिषाहारः प्रेषितः । तव भक्षणेन बुभुक्षा शान्ता भविष्यति । हनुमान् अब्रवीत्-भवतु नाम तव मुखद्वारेणैव अहं गमिष्यामि । सुरसा च स्वमुखं तथा व्यादितवती यत्र असंख्याःलोकाः प्रवेष्टुं शक्ष्यन्ति । एवं दृष्ट्वा हनुमान् स्वकीयं लघुरूपं विधाय सुरसामुखं प्रविश्य त्वरितमेव बहिरागतः । इदमवलोक्य देवाः पुष्पवृष्टिं चक्रुः । सा सुरसा हनुमते आशीर्वादं प्रदत्तवती यत् तव कार्यसिद्धिः भविता ।

अस्मिन् समस्ते पटले लङ्कायाः शोभावर्णनानि लङ्कायाः स्वर्गसुन्दरीणां नारीणां अनुपमशोभायाश्च वर्णनानि विद्यन्ते । यद्यपि वाल्मीकिरामायणस्य सुन्दरकाण्डेऽपि लङ्कायाः मनोहारिणी शोभा नारीणां काम-कलाश्च कविना वर्णिताः; किन्तु स्वकीयविशिष्टकाव्य-शैली-वर्णनक्रमे कम्बन् कविः २३४ पद्येषु लङ्काशोभां वर्णितवान् ।

मार्गे गच्छन्तं हनुमन्तं निकषा लङ्का नाम्नी राक्षसी समागत्य हनुमन्तं प्रति उक्तवती यद् ब्रह्मणः वाणी चरितार्था जाता । धर्मः विजितः पापं पराजितं त्वं यदिच्छसि तत् कुरु । सर्वं सेत्स्यति । इमां स्वर्णनगरीं प्रविश इति कथयन्ती सा निर्गता ।

हनुमान् "चैत्य" नामकप्रासादसमीपस्थवनं गत्वा चिन्तितवान्-यदि अत्रापि सीता न मिलिष्यति तर्हि लङ्कामिमां विनष्टां कृत्वा स्वकीयप्राणान् त्यक्ष्यामि । नान्यः उपायो विद्यते । तदैव देवाः पुष्पवृष्टिं चक्रुः । अत्र कविः अशोकवाटिकायाः सौन्दर्यवर्णनं करोति यत्र सीतां बन्धिनीं विधाय रावणः अत्रैव स्थापितवान् ।

तत्र मातृतुल्या प्रियतमा त्रिजटानाम्नी एका राक्षसी सीतासमीपे विविध-भीषण- राक्षसीभिः सह आसीत् । अर्द्धरात्रौ समस्तां राक्षसीसमूहां सुप्तां दृष्ट्वा त्रिजटां प्रति सीता ब्रवीति-मातः ! अद्य मम वामाङ्गानि तथैव स्फुरन्ति यथा विश्वा-मित्रेण महर्षिणा सह रामचन्द्रस्य मिथिलागमनवेलायां प्रस्फुरितानि आसन् । कथय किं कारणं भवितुमर्हति ।

त्रिजटा अब्रवीत्-इदं शोभनं लक्षणं मङ्गलकारी कालः समायाति इति निश्चितम् । इदमनुमीयते यत् तव प्राणपतिद्वारा प्रेषितः कोऽपि दूतः शीघ्रं समाग-मिष्यति । मया विगतरात्रौ स्वप्नः दृष्टः यत् प्रायः सर्वथा सत्यमेव । रावणः रक्तव-स्त्रधारी मस्तके तैलमर्दनं कुर्वन् गर्दभ- वाहनयुक्तरथे समुपविश्य दक्षिणस्यां दिशि गच्छन्नस्ति । रावणपत्न्याः मन्दोदर्याः वेणीरूपेण स्थिताः कबरीसमूहाः विकीर्णाः । तेभ्यः दुर्गन्धाः जायन्ते । इदं सर्वम् अनर्थस्य कारणम् ।

एतस्मिन् एव समये रामदूतः हनुमान् तत्र समागतवान् । सीतास्थानं च दृष्टवान् या अशोकवाटिका वर्तते । तदैव तस्मिन् पुष्पोद्याने अशोकनामके उपवने राक्षसाधिपतिः रावणः समुपस्थितः ।

रावणस्य पेशलवचनानि सीतायाः कर्णे तप्ततैलवत् तप्तशलाकावत् सञ्जातानि । पतिव्रता सीता एकं तृणं मध्ये संस्थाप्य रावणं कथितवती (तृणरक्षण-वर्णनं वाल्मीकिना अपि कृतम् अन्यस्मिन् रामकाव्ये च इदं वर्तते, रामचरितमा-नसरचयिता तुलसीदासेन अपि वर्णितम् तृणरक्षणम् । अत्र कविः कल्पते सीता रावणं तृणवत् मन्यते स्म) हे पापाचारिन् ! मूर्ख रावण ! इदमशिष्टवचनम् उक्त्वा त्वं स्वकीयदशशिरांसि पातयसि । यद्येवं पराक्रमी विद्यते तर्हि कथं वंचकः त्वं मायामृगं संप्रेष्य मां जहार ।

इदं श्रुत्वा क्रोधाग्निना दग्धः रावणः कथितवान् यत् तव मरणस्य मासद्वयमेवावशिष्टम् इत्युक्त्वा परावर्तितः ।

ततो हनूमान् तत्रोपस्थितः उक्तवान् च-मम प्रस्थानसमये रामेण एका मुद्रिका प्रदत्ता, यस्यां 'रामनाम' अङ्कितं विद्यते । कृपया इमां मुद्रिकां गृह्णातु तत्र भवती । भगवती सीता च तां मुद्रिकां पौनःपुन्येन पश्यन्ती भूयो भूयः शिरसि नेत्रयोः कुचाग्रयोश्च स्पर्शं कारयन्ती श्रीरामचन्द्रं स्मरन्ती तिष्ठति स्म । यथा बुभुक्षिताः अमृततुल्यं सुभोज्यं प्राप्य मुदिताः भवन्ति तथैव जीविताशादायिकाम् औषधितुल्याम् इमां मुद्रिकां प्राप्तवती ।

हे हनुमन् । शृणु, यदि अहं शापं दास्यामि तर्हि न केवलं रावणः, अपि च लङ्कासहिताः समस्तलोकाः विनाशं प्राप्स्यन्ति । किन्तु एवं कृते सति रामस्य विजयकोदण्डे कालिमा संलग्ना भविष्यति । अत एव अयं विचारः मया परित्यक्तः । त्वं जानीहि यद् हीनमनाः रावणः मां न स्पृष्टवान् । पर्णशालासहितां भूमिं समुत्पाट्य माम् अत्रानीतवान् । अत एव पुत्रसमः जितेन्द्रियः त्वमपि न मम स्पर्शयोग्यः । यतो हि अन्ततः त्वमपि पुरुष एव । (नेदृशी कथा शृङ्खला वाल्मीकिरामायणे दृश्यते) ।

एवं विविधवार्तालापं विधाय स्वमस्तके सुरक्षितं चूडामणिम् आदाय हनुमते ददौ तथा उक्तवती यत् मम नेत्रपुत्तलिकातुल्यामिमां चूडामणिं रामाय प्रदास्यसि । त्वमत्रागत्य मह्यं प्राणदानं कृतवान् । हनुमान् चूडामणिं गृहीत्वा तं सुरक्षितवस्त्रे निधाय सीतां प्रणम्य ततः प्रतस्थे ।

सीताप्रदत्तचूडामणिम् आदाय हनुमान् उत्तरस्यां दिशि प्रस्थानस्य विचारं कृतवान् । किन्तु पुनः निश्चितवान् यत् केवलं मातरं सीतां दृष्ट्वा परावर्त्तनं नोचितम् । लङ्कायां किमपि करणीयम् । इति विचार्य हनुमान् स्वकीयविशालरूपं निधाय पादैः वृक्षान् मर्दयितुं प्रारभत । तस्य प्रहारेण शतशः वृक्षाः पतिताः । कियन्तः चन्दनादिवृक्षाः शाल-वृक्षाश्च विध्वंसिताः । इदं दृष्ट्वा लंकावासिनः भयभीताः सन्तः यत्र तत्र पलायिताः । इदं ज्ञात्वा रावणेनाक्षयकुमारः स्वकनिष्ठपुत्रः प्रेषितः ।

ततश्च अक्षयकुमारः हनुमन्तं बाहुपाशेन आबद्धवान् । हनुमान् च अक्षयकुमारं प्रति चपेटां चालितवान् तथा मुष्टिप्रहारं कृतवान् । येन अक्षयकुमारस्य उदरस्थमांसमज्जाप्रभृतयः बहिर्निर्गताः । अक्षयकुमारश्च क्षयं गतः । इदं दृष्ट्वा बहवः राक्षसाः पलायिताः बहवश्च हनुमतः शरणं सम्प्राप्ताः ।

वेदनापूर्णं समाचारमिमं श्रुत्वा मेघसदृशविशालकेशपाशवेणीं विकीर्य उरः हस्ताभ्यां ताडयन्ती मन्दोदरी विलापं कृतवती । रावणोऽपि पुत्रवधस्य दुःखदसमाचारं प्राप्य हतप्रभः शोकनिमग्नः संबभूव ।

ततो रावणस्य वरिष्ठः पुत्रः महाबलशाली इन्द्रजित् मेघनादः समायातः । बलवन्तं हनुमन्तमवलोक्य इन्द्रजित् मनसा ब्रह्मास्त्रं सम्पूज्य हंनुमतः उपरि प्रक्षिप्तवान् । येनास्त्रेण सर्पाकाररूपेण विराड्रूपः मारुतिः बद्धः । ब्रह्मास्त्रेण बद्धः सन् हनुमान् ज्ञातवान् यद् ब्रह्मास्त्रस्यापमानं न विधेयम् । तदा हनुमान् इन्द्रजिता मेघनादेन रावणसमीपमानीतः ।

तर्हि कस्त्वम्? हनुमता चोक्तम् यत् महाबलशालिनः रामचन्द्रस्य दूतोऽहं यस्य पत्नी त्वया हृता । यः रामचन्द्रः परात्परब्रह्मस्वरूपः वेदवन्दितः ज्ञानमूलम् ॥ यो हि ऋषीणां देवानां च रक्षणाय राक्षसवधार्थम् अवतारं गृहीतवान् । तस्यैवाहं दासः मम नाम हनुमान् । अहं च सूर्यपुत्रस्य वालिनः अनुजस्य सुग्रीवस्य सखा अस्मि । सुग्रीवः रामचन्द्रेण सह मैत्री कृतवान् । सो हि रामः महाबलशालिनं वालिनं हतवान् । येन वालिना स्वपुच्छे बद्धः त्वं चिरदिनं भ्रामितः ।

इत्थं श्रुत्वा तस्य वधार्थं रावणः आदिष्टवान् । तदा रावणस्य भ्राता नीतिज्ञः विभीषणः अवादीत्-नीतिशास्त्रे दूताः सदा अवध्याः । दूतस्तु सन्देशवाहकः भवति । अत एव दूतस्य मारणं न विधेयम् । यथा रामः मम भगिनीं शूर्पणखां विरूपां कृत्वा त्यक्तवान् किन्तु न मारितवान् तथैव अयमपि वानरः विरूपं कृत्वा त्यक्तव्यः ।

विभीषणस्य परामर्शं मानयित्वा वानरस्य पुच्छे तैलं दत्वा अग्निना दग्धुम् अदिष्टवान् । राक्षसाश्च तथैव कोलाहलं कुर्वन्तः हनुमतः पुच्छे अग्निं

प्रज्वालितवन्तः । हनुमान् ज्वलितेन पुच्छेन युक्तः उत्कूर्दन् लङ्कायाः अट्टालिकायां ययौ ।

प्रदीप्तपुच्छः हनुमान् रत्नजटितलङ्काप्रासादे स्वर्णमयभवने इतस्ततः समुत्प्लुवन् क्रमशः लंकां दग्धुं प्रारभत । कियत्क्षणानन्तरमेव लङ्का प्रज्ज्वलिता जाता । सर्वत्र नरनार्यः चीत्कारं कुर्वन्त्यः इतस्ततः पलायितवत्यः । सर्वत्र हाहाकाराः सञ्जाताः । धूमेनाच्छादिते आकाशे दिशः ज्ञानं न जातं यत् के कुत्र गच्छन्ति ।

रावणश्च स्वकीयं विशालं स्वर्णमयभवनम् अग्निज्वालया द्रवीभूतं दृष्ट्वा पत्नीसहितः पुष्पकयानमारुह्य अन्यत्र गतः । (इयं कथा वाल्मीकिरामायणे नास्ति) ।

हनुमान् स्वकीयपुच्छं समुद्रे निर्वाप्य पुनः अशोकवाटिकायां सीतासमीपं समुपस्थितः । या अशोकवाटिका संरक्षिता एव आसीत् । न तस्याः कापि हानिः सञ्जाता ।

हनुमान् यथाशीघ्रं भगवन्तं रामचन्द्रं प्रति प्रस्थानस्यं विचारं कृत्वा तत्रैव प्रस्थितवान् यत्र सुग्रीवलक्ष्मणसहितः रामचन्द्रः आसीत् । यतो हि सीतावृत्तान्तं यथाशीघ्रं रामः जानातु इति सवेगं गतवान् ।

तदनन्तरं सीतया प्रदत्तं चूड़ामणिमादाय अशोकवाटिकाविध्वंस-राक्षसादिवध- लंकादहनवृत्तान्तं वर्णितवान् । इत्थं च सीताप्रदत्तचूड़ामणिं रामाय समर्पितवान् । तम् आदाय रामः नानाविधपूर्ववृत्तान्तस्य स्मरणं कृत्वा चिन्ताकुलो जातः । अन्ते च सर्वे सुग्रीवादिसहिता वानरसैन्याः दक्षिणस्यां दिशि प्रस्थिताः । हनुमल्लक्ष्मणसहितः श्रीरामः अपि प्रस्थितवान् ।

युद्धकाण्डम्

किष्किन्धानगरीतः ऋष्यमूकपर्वतात् प्रस्थाय विशालवानरसैन्यसहिताः सुग्रीवादयः तथा लक्ष्मणहनुमत्सहितः रामचन्द्रश्च समुद्रतटं प्राप्तवन्तः । तत्र विस्तृतसैन्यपरिवृतो रामः स्वकीयोन्निद्रनेत्राभ्यां समुद्रं ददर्श । सीतायाः अश्रुजलानि सागरे समागतानि । किन्तु सागरः स्वकीयमलयानिलमिश्रितजलकणैः रामस्य

अभिषेकं चकार । यतो हि रामचन्द्रः समुद्रस्य जामाता आसीत् । लक्ष्मी समुद्रकन्या वर्तते, लक्ष्मीपतिः विष्णुः सीतापतिः तथा रामः एक एव । अनेन गम्भीरसम्बन्धेन रामः सागरस्य जामाता । अत एव रामस्य सत्कारं चकार ।

रत्नाकरः आनन्दातिरेकेण महता हर्षेण च रामचन्द्रस्य सत्कारार्थं समुपस्थितः तथा च स्वकीयतरङ्गहस्तैः रामचन्द्रम् अभिवादयते । दुःखितां सीतां (स्वपुत्रीं) समुद्धर्तुं समागतोऽस्ति इदमपि स्वागतस्य कारणम् ।

लङ्कायां तदनन्तरं रावणस्यानुजः विभीषणः अवादीत्- हे सर्वशास्त्रमर्मज्ञ ! अग्रज ! भवान् लङ्कादहनेन दुःखितः चिन्तितश्च वर्तते । किन्तु परनारीं वञ्चनारूपेण हरणं कृत्वा आनीतवान् तत् किं सुखमयं कार्यम् ? किं तेन कर्मणा भवतां यशांसि न विनष्टानि अभवन् । पार्श्वे असंख्यानुपमसौन्दर्ययुक्ताः नार्यः सन्ति । किमनया सीतया ! अस्तु अधुना यदि तां सुकेशीं सीतां समर्पयिष्यति तदापि निन्दापात्रमेव भवान् चिरं स्थास्यति ।

विभीषणद्वारा कथितामिमां कथां रावणः यद्यपि ध्यानेन श्रुतवान्, किन्तु सीताहरण- मोहेन तस्य बुद्धिः विकृता जाता एव । अत एव विभीषणस्योक्तेः प्रभावः तदुपरि न सञ्जातः ।

ततः विभीषणः उत्थाय आकाशमध्ये गत्वा उक्तवान्- हे अग्रज ! इदं ज्ञायतां यत् सर्वे मम बन्धुबान्धवाः रामेण निहताः भविष्यन्ति । इदं न विस्मर्त्तव्यं यत् मम बहवः सैन्याः सेनापतयः विनष्टाः । पुत्रः अक्षयकुमारः मारितः इति सर्वं स्मरन् यत् कर्तव्यं तद्भवता विधेयम् ।

मया तु पूर्वं रामस्य दर्शनं न कृतं तेषां सम्बन्धे नाधिकं श्रुतं च । किन्तु तेषां स्मरणेन मनः शीतलं भवति । तथा स पतितपावनो वर्तते इति अनुमीयते । ब्राह्मणवंशे समुत्पन्नेन मया महत्तपः कृत्वा भगवति भक्तिः, धर्मपरायणता, नीतिमार्गे गमनं , सर्वभूतदया, ब्राह्मणानां कृपा च वरदानेन प्राप्ता । तस्य वरदानस्य फलप्राप्तिसमयः समुपस्थितः । अत एव तत्रैव तेषां शरणं प्राप्तव्यम् इति रामशरणं ययौ । तदा सन्ध्या समायाता अत एव कुत्रापि स्थित्वा समयं यापयामास ।

सन्ध्या समायाता। तत्रैव स्थितो रामचन्द्रः सन्ध्यावन्दनादिकं विधाय रात्रिं यापयामास। तत्र स्थितो रामः विभिन्नभावनायामभिभूतो जातः। सुकेशीं सीतां स्मरन् शोकनिमग्नः आसीत्। समुद्रतटीयबालुकाक्षेत्रे चन्द्रकिरणानि दुग्धतुल्यस्वच्छानि अदृश्यन्त। शीतलमन्दसुगन्धदायको मलयानिलः विषयुक्तसर्पसदृशः दष्टुमागत इवानुभूयते रामेण।

एवं व्यथितो रामः सुग्रीवं कथयामास- कार्यार्थी भवान्। समागतेन विभीषणेन साकं परामर्शं विधायाग्रिमकर्त्तव्यपथं कथं न निर्धारयति। तत्रान्तरे विभीषणस्तत्रोपस्थितो जातः। रामेणोक्तम्- लङ्कायाः सुरक्षाव्यवस्थाप्रसंगे तत्रत्यनिखिलं वस्तुजातं सुस्पष्टं वर्णयतु भवान्। एवं भूतास्त्रयः प्राचीराः विराजन्ते यत्र राजद्वारस्था द्वारपालाः चतुःषष्टि-(६४) कोटिपरिमिताः सन्ति। दशसहस्रं पद्मसंख्याकाः रथाः ततो द्विगुणिताः गजाः ततो द्विगिणिताः अश्वाः ततश्च द्विगुणिताः उष्ट्राः सन्ति।

(इयती संख्या तु सर्वथा चिन्तनीया अनुसन्धेया च)

एतदतिरिक्तं शिवप्रदत्तं चन्द्रहासनामकः करवालः रावणं निकषा निरन्तरं सन्निहितोऽस्ति। तस्य निकुंभ-महोदर-भानुकोप-महापार्श्व-वज्रदंष्ट्र-पिशाच-दुर्मुख-विरूपाक्ष-धूम्राक्ष-नामानः भीषणराक्षससेनापतयः दुर्जेयाः क्रूरकर्मकारकाः सन्ति। येषां पार्श्वे कोटिकोटिसंख्याकाः सैन्याः वर्तन्ते। ततश्च इन्द्रजिन्मेघनादनामा विश्वविजयी पुत्रोऽस्ति। देवान्तक-नरान्तक-त्रिशिरानामानो त्रयः दुर्दान्ताः दैत्याः सन्ति।

एवं महाबलशालिनं रावणं जेतुं नाशयितुं च भवन्त एव क्षमाः। भवतां हस्तेनैवायं मरिष्यति। भवतां दासस्य हनुमतोऽपि पराक्रमोऽवर्णनीयः। येन हि लंकास्थविशाललौहस्तम्भमुत्पाट्यासंख्यराक्षसाः निहताः। अनेनैव हनुमता जम्बुमाली निहतः, अक्षयकुमारः हतः। स्वर्णमयी विशाला लङ्का दग्धा। इत्थमाकर्ण्य रामः हनुमन्तं यथायोग्यमादिष्टवान्।

श्रीरामचन्द्रः समुद्रतटे दर्भासने उपविश्य वरुणमन्त्रं जपन्नतिष्ठत् । दर्भशायी रामः एकाग्रचित्तेन समुद्रतरणोपायार्थं वरुण-मन्त्रद्वारा तं प्रार्थितवान् । किन्तु सागरदेवो वरुणः नागतः । क्रुद्धो रामः अचिन्तयद् यद् भावनायाः ह्रासतायाश्च परिचयो जायते । भवतु नाम, अधुना मम क्रोधः सहतां स समुद्रः ।

इदानीं तु रामस्य बाणेन सह महर्षेः अगस्त्यस्य समता जाता यतश्चागस्त्येन समुद्रः शोषितः । ततश्च रामेण ब्रह्मास्त्रमभिमन्त्रितम् इति दृष्ट्वा सर्वे देवाः कम्पिताः बभूवुः । असहायो वरुणश्च स्तुतिं कुर्वन् रामसमीपमुपस्थाय प्रार्थनां च चकार । तेनोक्तम्-हे पुराण- पुरुष ! नमस्तुभ्यं नमस्तुभ्यम् । रोषं त्यज, प्राणान् रक्ष, क्षमां कुरु । भवन्त एव भूम्यबनलवथ्वाकाशस्वरूपाः । भवन्तं कोऽपराद्धुं समर्थः ? अभयं देहि, तव शरणमागतोऽहम् ।

तदनन्तरं वरुणोऽवादीत्- यदि सागरस्य गौरवं भवद्भिः विलुप्यते तर्हि महद् अपयशः भविता । अत एव पर्वतखण्डान् संग्राह्य सेतुबन्धनं कारयन्तु । अयमेव प्रशस्तः पन्थाः ।

इत्थं च नलप्रमुखाः वानराः दिनत्रयमध्ये सागरे सेतुनिर्माणपूर्णतायाः सूचनां प्रदत्तवन्तः । एवं हि महानयं विधिः सुसम्पन्नः ।

रामः स्वकीयनेत्रकमलाभ्यां लङ्कां ददर्श । इयं लङ्का अमरावतीनगर्याः अपि मनोरमा । रक्तकिरणैः व्याप्ता लङ्का हनुमता दह्यमाना यथा तथा दृश्यते । अस्मिन् नगरे सर्वत्र महान्तः प्रासादाः सन्ति । येषु मध्ये रावणस्य सुसज्जितः प्रासादः विद्यते । हे लक्ष्मण ! पश्य प्रवाल-प्रसादान्, यत्र सुसज्जितपुष्पालङ्कृतकेशपाशान् सुगन्धयितुम् अगुरुधूपादिकं प्रददाति । येन श्यामलप्रासादः भगवतः अर्द्धनारीश्वरस्य तुल्यो जातः । एवं प्रकारेण लङ्कां दर्शं दर्शं रामः प्रसन्नतां लेभे ।

अस्मिन् पटले रामचन्द्रद्वारा शान्तिदूतरूपेण प्रेषितस्य अङ्गदस्य रावणेन साकं वार्तालापः सर्वथातिशेते । यद्यपि रावणाङ्गदयोः संवादः सर्वस्मिन् रामकथाकाव्ये प्रायः विद्यते किन्तु यथा अस्मिन् रामायणे गम्भीरोत्तेजकसंवादो दृश्यते न तथा अन्यस्मिन् रामायणे । एतेन इदं पटलं विशिष्टतामेति ।

तत्र विभीषणं प्रति रामेणोक्तम्-मम मनसि एकः विचारः समायाति यत् अन्तिमवारं दूतमेकं रावणसमीपं सम्प्रेष्य सीतापरावर्तनार्थं कथयेयम्। इयं च राजनीतिः। विभीषणेनोक्तं- सुन्दरोऽयं विचारः। सुग्रीवेण कथितम् इदं राजोचितकार्यम्। यत्र लक्ष्मणेनोक्तं-मम विचारेन नेदं शोभनम्। रावणं प्रति दया नैव विधेया। युद्धे एव साक्षात्कारः भवेत्।

पुनः लक्ष्मणेन अतिगम्भीर विचारः प्रकटितः यदि रावणः देवीं सीतां परावर्त्तयिष्यति तर्हि भवता विभीषणाय प्रदत्तराज्यस्य किं भविष्यति, दण्डकारण्यवासिभ्यः यद्वचनं प्रदत्तं भवता तस्य किं भविष्यति इति सर्वं विचारणीयम्। इत्थं सर्वं श्रुत्वा रामः अंगदं विलोक्य रावणसभां गन्तुमादिष्टवान्।

ततः अङ्गदः लङ्कां ययौ। रावणं प्रति उक्तवान्-येन रामेण तव भ्रात्रे विभीषणाय युद्धात् पूर्वमेव लङ्काराज्यं प्रदत्तं तस्मै रामाय तस्य सुकेशिनीं पत्नीं सीतां प्रदाय निश्चिन्तो भवतु। आगच्छतु मया सह।

इदं श्रुत्वा रावणेन चीत्कारः कृतः। यद् इमं वानरं मारयस्व। रावणस्य दूताः अङ्गदं परितः संवृत्ताः अङ्गदः सहसा उपरि उत्थाय तान् राक्षसान्रावणस्य गोपुरद्वारसमीपं प्रक्षिप्तवान्। तथा रामसमीपमागत्य निवेदितवान् यत् स रावणः स्वहठं न त्यक्तुं शक्नोति। अयमेव वार्तालापस्य सारांशः। (अत्र अङ्गदपादरोपणकथा न वर्तते।)

अतिविस्तृते युद्धकाण्डे इदं पटलं ३५५ पद्यात्मकं विस्तृतं वर्तते। युद्धकाण्डस्य विगतचतुर्दशपटलेषु प्रथमपटले वर्णितमस्ति यद् रावणः रामेण पराजितः शस्त्ररहितः सन्ध्यासमये नतमस्तकः सन् नगरे समागतवान्। अथ च अस्मिन् पटले कविः वर्णयति यत् महापण्डितः दशमस्तकविंशतिहस्तयुक्तः शंकरप्रदत्तचन्द्रहासहस्तः रावणः अद्य रिक्तहस्तः नतमस्तकः पदातिना एव नगरं प्रविष्टः। इदं दृष्ट्वा अनुभूयते यत् सूर्यास्तो जातः। रावणागमनमार्गे उभयोः पार्श्वयोः सुदीर्घकेशपाशयुक्ताः समलंकृताः दिव्याङ्गनाः अञ्जलिबद्धाः आसन्। यासामुपरि दृष्टिनिक्षेपणमपि अकृत्वा रावणः अन्तःपुरम् प्रविवेश। अयं स एव रावणः येन नवग्रहाः कारागारे बन्दीकृताः दशदिक्पालाः सेवकत्वेन निगृहीताः, समस्ताः इन्द्र-

पुर्याः अप्सरसः वशीकृताः । तेनैव रावणेन तासां स्तनद्वये दृष्टिः न प्रदत्ता । कालस्यायमेव प्रभावः ॥

उत्तरार्ध युद्धकाण्डम्

महाबलशालिनः खरपुत्रस्य मकराक्षस्य शोणिताक्षस्य तथा अन्येषां राक्षससैन्यानां विनाशसमाचारं श्रुत्वा रावणः क्रुद्धः सन् स्वपुत्रम् इन्द्रजिन्मेघनादं समानेतुं समादिष्टवान् । दूतवचनं श्रुत्वा इन्द्रजित् पितरं निकषा त्वरितमेवागतवान् । तेनोक्तम्-पितः ! शोकं मा कुर्वीत । सकलवानरसैन्यैः सह मृतौ रामलक्ष्मणौ सीतां द्रक्ष्यति देवाश्च विलोकयिष्यन्ति ।

रामसैन्यमध्ये सुग्रीवः अङ्गदः मारुतिः अरुणाश्वविभीषणः लक्ष्मणश्च आसन् । स्वयं हि रामचन्द्रोऽपि समुपस्थितः आसीत् । उभौ रामलक्ष्मणौ हनुमतः अङ्गदस्य स्कन्धोपरि स्थितौ वृषभगरुडोपरि स्थितौ शिवविष्णु-सदृशौ सुशोभेते स्म । तत्र रामचन्द्रेणोक्तम्- यदा इन्द्रजिद् दिव्यास्त्रं संचालयिष्यति तदा यूयं तत्र स्थातुं न शक्ष्यथ । अत एव मम पृष्ठभागे तिष्ठथ ।

रामलक्ष्मणौ युद्धं प्रारभेताम् । तत्र रथोपविष्टः इन्द्रजित् प्रस्तरवत् स्थितः । अर्थाद् रामलक्ष्मणयोः तुमुलयुद्धारम्भम् अवलोक्य मेघनादः स्तब्धः सञ्जातः तथा च रामशरवर्षा स्वसैन्यरक्तधारां च पश्यन् किंकर्त्तव्यविमूढो जातः । इन्द्रजिद् उरः ताडयन्तींरुदन्तीं भूमौ लुठन्तीं स्वसैन्यविधवामपि ददर्श । अङ्गदहनुमतोः तेजः इन्द्रजित् ज्ञातुं नाशक्नोत् । तस्य दृष्ट्या एकः हनुमान् एकः अङ्गदः सहस्रसंख्याकः जातः । यतो हि उभौ तथा तीक्ष्णवेगेन युद्ध- मकुरुतां येन स्थितिरियं समायाता ।

सहसा इन्द्रजिद् ब्रह्मास्त्रं प्राक्षिपत् । तेन सर्वे वानरप्रमुखाः मूर्च्छिताः जाताः क्षणमध्ये एव अघटितघटना सञ्जाता । सर्वे मूर्च्छिताः जाताः । न कोऽपि कस्याऽपि जिज्ञासां कर्त्तुमपि अशक्नोत् । इति सूचनां रावणाय सैन्याः निवेदितवन्तः । रावणेन पृष्टः- किं रामो हतः । दूताः कथितवन्तः- नैवम् । किन्तु युद्धक्षेत्रे वानरसेनापतयः मूर्च्छिताः जाताः । लक्ष्मणश्च मृततुल्यः भूमौ पतितः अस्ति ।

अत्र रामशिबिरे महान् कोलाहलः सञ्जातः लक्ष्मणस्य स्वसैन्यानां च दशां श्रुत्वा रामः विचित्रकारुणिकरूपेण चिरं विललाप । न कोऽपि सान्त्वनां दातुमपि समर्थः । शोकसागरे पतितं रामचन्द्रं दृष्ट्वा येन केनापि प्रकारेण हनुमान् समागत्य पृष्टवान् यत् महाज्ञानी जाम्बवान् कुत्र वर्त्तते । जाम्बवान् मिलितः । विभीषणः सुप्रसन्नो जातः । जाम्बवता पृष्टं- भगवान् रामः कुत्र वर्तते । विभीषणेनोक्तम्- स तु दुःखप्रवाहे मूर्च्छितो वर्त्तते ।

तदा जाम्बवान् उक्तवान्- हे हनुमन्! समुद्रं लङ्घयित्वा नवसहस्त्रयोजनगमनानन्तरं हिमालयनामकः पर्वतः अस्ति। तं विलङ्घ्य नवसहस्त्रयोजनानन्तरं हेमकूटपर्वतः ततः नव- सहस्त्रयोजनानन्तरं निषध नामकः पर्वतः वर्त्तते । ततश्च पुनः नवसहस्त्रयोजनानन्तरं मेरु पर्वतः वर्तते । तस्मात् पर्वतात् नवसहस्त्रयोजनानन्तरं नीलगिरिः वर्तते । तस्माद् गिरेः चतुः- सहस्त्रयोजनानन्तरं कृष्णपर्वतः वर्त्तते तत्र ब्रह्मास्त्रनिवारकाः औषधयः सन्ति । तान् यदि गृहीत्वा सूर्योदयात् पूर्वम् अत्र आगमिष्यति तर्हि लक्ष्मणस्य प्राणरक्षा भवितुमर्हति ।

हनुमता चिन्तितं यत् निष्प्रभावो जातः तर्हि तु निखिलः परिश्रमः व्यर्थः । यतो हि सूर्योदयात् पूर्वमेव मया औषधिं नीत्वा लंकायुद्धक्षेत्रे प्रत्यावर्त्तनमावंश्यकम् । ततश्च स्मृतवान् सूर्यस्तु पूर्वस्यां दिशि उदेति इयं तु उत्तरदिशा वर्तते । तदनन्तरं स हनुमान् तं नीलपर्वतं प्राप्तवान् यत्र संजीवनी औषधिः आसीत् ।

हनुमन्तं दृष्ट्वा देवाः ऊचुः- हे दूत ! त्वं स्वकार्यं कुरु । शीघ्रं गच्छ स्वकार्यं समाप्य पुनः इमाः औषधयः परावर्तयस्व । हनुमता चिन्तितं यद् औषधविषये कोऽपि तर्कवितर्कः व्यर्थः । सर्वं नीत्वा आकाशामार्गेण प्रस्थितः ।

एतन्मध्ये एव आकाशे महान् रवः संजातः । येन नादेन सर्वाः दिशाः व्याप्ताः समुद्रजलानि च्छलितानि । ब्रह्माण्डव्यापी स नादः । तं श्रुत्वा जाम्बवता उक्तम्-आगतः आगतः । हनुमतः शरीरस्य वायुना स्पृष्टाः सर्वे वानरसैन्याः संजीविताः । राक्षसास्तु सागरे पतिताः अत एव ते न जीविताः इयं तु विचित्रा घटना जाता यत् स्वयमेव लक्ष्मणशरीरात् शराः निर्गताः । तस्य पीड़ा विनष्टा । सहसा प्रश्वासहितः लक्ष्मणः पूर्ववद् उत्थितः । यथा कश्चित् शयनाद् उत्तिष्ठति । सर्वे प्रसन्नाः बभूवुः ।

देवाः स्तुतिं कृतवन्तः । श्रीरामचन्द्रः अनुजं भुजाभ्याम् आलिङ्गितवान् । मुनयः चतुर्वेदान् गायन्ति स्म ।

अतिविशेषः—

अत्र संजीवनीसम्बन्धिकथावर्णनं कम्बन् कवेः सर्वथा नूतनां घटनां प्रदर्शयति । या च घटना पूर्वं कस्मिन्नपि रामायणे नैव दृश्यते ।

ततश्च मेघनादसमीपं सहसा रावणः समुपस्थितः । पुत्रं दृष्ट्वा रावणः प्रोवाच-ज्ञायते यत् तव यज्ञः नैव पूर्णतां प्राप्तः । अत एव इयं स्थितिः । इन्द्रजिता कथितं-लक्ष्मणः यज्ञस्थलं स्वपरिधौ कृत्वा यज्ञध्वंसमकरोत् । मया च त्रीणि दिव्यास्त्राणि प्रयुक्तानि ब्रह्मास्त्र- पाशुपतास्त्र- नारायणस्त्राणि । लक्ष्मणेन तानि अवरुद्धानि । तत्र नारायणास्त्रं लक्ष्मणं परिक्रम्य निर्गतम् । इदं तु अस्माकं पापस्य फलम् । अधुना निश्चितं स माम् हनिष्यति ।

तदा विभीषणेनोक्तम्-यदि अस्मिन्काले इन्द्रजितं भवान् त्यक्ष्यति अथवा केनापि प्रकारेण स न मृतः तर्हि विजयः संदिग्धः । वीराग्रगण्यः वीरः दिव्यः धनुर्धारी वर्तते । तदुपरि देवानां पुष्पवृष्टिः जाता । अत एव त्वर्यतां भवद्भिः ।स अन्धकारे न मरिष्यति । दिने एव तस्य मरणं, तत्र चिन्ता विधेया । इत्थं च उभयोर्मध्ये क्रूरतरं युद्धम् अभूत् । उभयोः सैन्ययोर्मध्ये च घोरतरं युद्धमभवत् ।

तत्राद्भुतसंग्रामे इन्द्रजितः करः प्रथमं छिन्नः । तदनन्तरं तस्य शिरः छिन्नं लक्ष्मणेन । यत् शिरः वक्त्रविद्युत्सहितं कृष्णमेघसदृशं छिन्नं भूमौ पतितम् । वानराः ननन्दुः, देवाः पुष्पवृष्टिं चक्रुः ।

तदा चतुर्भुजः ब्रह्मा अब्रवीत्-युद्धोऽयम् एकस्मिन् दिने एव समाप्तो भविष्यति । रामः विजयी भविष्यति । भयं परित्यज्य शीघ्रं स्वर्णरथं रामसमीपं संप्रेषय इति श्रुत्वा देवेन्द्रः सारथिमातलिम् आज्ञापयामास यत् त्रिभुवनभ्रमणशालिनं स्वसाधनयुक्तरथं शीघ्रमानीय रामं निकषा गच्छतु ।

तस्य रथस्य "काडियजु" नामके भागे सप्तकुलगिरीणां बलमासीत् तथा च तस्य रथस्य रज्जुसमूहः अष्टमहानागसदृशः विद्यते । सर्वेषां विध्वंसनाय विना-

शाय च शक्तिः एतस्मिन् रथे विद्यते । एवम्भूतः दिनमासवर्षभूतभविष्यकालाद्यङ्ग-रूपः नक्षत्ररत्नजटितः स विजयी रथः आसीत् । तथा च रथोऽयं चतुर्वेदपूर्णः पूर्णयज्ञस्वरूपः क्षीर- दधि- घृत- इक्षु- मधु- मदिरा- लवणनामकसप्तसमुद्रतुल्यः, पूर्वोक्तसप्तपर्वतसदृशः, पञ्चभूत- अग्नित्रय- पञ्चान्तःकरण-पञ्चाग्नि- चतुर्दिक्-त्रिगुणसंचरणशीलः दशपवने सुदीर्घः दिनरात्रौ गमनशीलः स रथः आसीत् ।

विशेषः—

इत्थं रथवर्णनं वाल्मीकीयरामायणादौ न दृश्यते । इयं च कम्बन् कवेः नवीना गुरुतरा गरिमामयी महिमामयी परिकल्पना विद्यते ।

समेषामेतेषां विशदवर्णनं नात्र सम्भवं नापेक्षितं च । फलतः संक्षिप्तरूपेण प्रमुख- युद्धवर्णनमत्र विधीयते । प्राचीनेयमुक्तिः सर्वथा साधीयसी "रामरावणोर्यु-द्धम्" "रामरावणयोरिव" । अस्मिन् रामायणे विलपन्ती मन्दोदरी मृता । इयमपि कथा सर्वथा नूतना वर्तते । यतो हि वाल्मीकिरामायणतः आरभ्य कम्बरामायणात् पूर्वं न कुत्रापि मन्दोदरीमरणवर्णनं दृश्यते । न चापि ततः परं कस्मिन्नपि रामायणे मन्दोदरीमरणवर्णनं विद्यते । सा सधवैव मृता ।

सीतायाः अग्निप्रवेशः

अथ रामः सीतायाः परिशुद्धतायै अग्निप्रवेशार्थमादिष्टवान् । रामस्य वचनं श्रुत्वा लक्ष्मणोऽपि हतप्रभो जातः । रामः लक्ष्मणं सङ्केतेन आज्ञापयामास । लक्ष्मणः तत्र अग्निं समानीतवान् । भजवती सीताऽग्निं प्रदक्षिणीकृत्य निवेदितवती- हे अग्निदेव ! यदि मनसाऽपि अहं कलङ्किनी तदा मां भस्मीभूतां कुरु । तथा च अग्निप्रवेशसमये रामस्य च वन्दनां कृतवती ।

एवं कृत्वा सीता ज्वलिते अग्नौ प्रविवेश । तस्मिन् काले रामं विहाय तत्रत्याः जनाः आकाशस्थाः देवाः देव्यश्च विदीर्णाः सम्भूताः । त्वरितमेव साक्षाद् अग्निः प्रकटीभूय रामं प्रति उक्तवान्- मया कः अपराधः कृतः कथं ममोपरि भवान् क्रुद्धः । रामेणोक्तम्-त्वं कः असि कथं नेयं स्त्री अग्नौ ज्वलिता-सोऽब्रवीत्-अहम् अग्निः, अस्याः देव्याः पातिव्रत्याग्निज्वालया अहं स्वयमेव दग्धः जातः । सर्ववेद-विहितकर्मसाक्षी अस्मि । कथं भवद्भिरेवं कृतम् ।

रामः विहस्य अवोचत्-त्वं लोकस्य अक्षयसाक्षी। इयं सीता त्वया कलङ्करहिता कृता। इयं मम धर्मपत्नी, मम प्राणप्रिया, अत्याज्या। एवं श्रुत्वा सर्वे देवगणाः महर्षयः कपयश्च प्रसन्नतायां नृत्यन्ति स्म। देवैरुक्तं यद् अयं रामचन्द्रः स्वमायापाशे लोकान् भ्रामयति। तेनैव इदं कठोरतमं नाटकं प्रदर्शितम्। येन वयम् भ्रान्ताः आस्म। सीता च यावत् चन्द्रदिवाकरौ पतिव्रता पूजनीया महनीया श्लाघनीया च सञ्जाता।

भरतस्य रक्षा

लक्ष्मणोऽवादीत्-भवतां वनागमनस्य चतुर्दशवर्षाणि पूर्तिमाप्स्यन्ति। यतो हि अद्य पञ्चमी तिथिर्वर्तते। यदि अद्य सायं भवान् भरतेन न मिलिष्यति तर्हि भरतः अग्नौ प्रविश्य आत्मदाहं करिष्यति। अत एव तद्वारणार्थं भवान् अद्यैव अयोध्यां प्राप्नोतु।

रामेण चिन्तितम्-इदं तु सत्यं यदि अद्य अहम् न तत्र प्राप्स्यामि तर्हि भरतः प्राणत्यागं करिष्यति। येन मम वंशः विनक्ष्यति इति विचारेण कथं तत्र गच्छेम इति विभीषणं पृष्टवान्। विभीषणेनोक्तम्- एकं विमानं विद्यते येन अद्यैव भवन्तः तत्रायोध्यां प्राप्स्यन्ति। रामः आज्ञापयामास- तम् आनयतु। विभीषणः सङ्केतं कृतवान्। क्षणेनैव तद् विमानं तत्रोपस्थितम्। इदम् विमानं ब्रह्मणा यक्षराजकुबेराय प्रदत्तम्। यद् विमानं निर्लिप्तज्ञानिनः मनसः तुल्यपवित्रं देवानां विस्मयकारकं मनोवेगेन गमनशीलं च यस्य नाम "पुष्पकम्"।

विमानोपरि गच्छन् रामचन्द्रः मार्गे समागतं तत् तद्विशेषस्थानं महत्वपूर्णं वस्तु सीतां दर्शयति स्म। रामः कथयति-हे सीते! पश्य अयं गन्धमादननामककन्दरासहितः पर्वतः अस्ति यः इन्द्राद् भीतः समुद्रे विलीनः आसीत्। मदीयसेतुबन्धनेन पावनोऽयं पर्वतः।

इमाः च गंगा- यमुना- गोदावरी- नर्मदा- कावेरीप्रभृतयः नद्यः सन्ति। ताः पापं हरन्ति। परन्तु मदीयसेतुबन्धने तीर्थस्थानं प्राप्तं समुद्रं यः पश्यति तस्य पापं दूरीभवति। अत्र च मया स्वधनुषा नौकाचालनसुविधार्थं मार्गः निर्मितः। अत्र पवित्रतां ज्ञात्वा गंगाऽपि पश्चात्तापं करोति।

पश्य इदं तदेव स्थानं यत्र वरुणः ममाग्नेयास्त्रभयात् मम शरणमागतः आसीत्।

हे वैदेहि ! पश्य, इदं तदेव पवित्रं स्थानम् अयं स एव पवित्रगिरिः यत्र तमिल- वैयाकरणस्य ऋषेः अगस्त्यस्य वासस्थलमस्ति।

इदं तु रत्नमयः "तीरुमालिरुंजोलयमलयनामकः श्रीविष्णोः पर्वतः ततः एव समुन्नतः वैंकटाचलपर्वतः दृश्यते।

मध्ये रामः परिजनैः सह भरद्वाजाश्रमं प्राप्नोत्। हनुमान् तु रामाज्ञया भरतं सूचयितुं पूर्वमेवऽयोध्यां प्राप्तवान्। ततः प्रातः पुष्पकविमानमारुह्य पूर्ववद् रामचन्द्रः सीतालक्ष्मण- सहितः विभीषण-सुग्रीवादिसहितश्च प्रस्थितवान्। आकाशमार्गे समागन्तं पुष्पकविमानं दर्शयन् हनुमान् प्रोक्तवान्- हे सूर्यकुलभूषण ! महामहिमाशालिन् ! पश्यन्तु भवन्तः, सीता- लक्ष्मणाभ्यां सहितः प्रभुः समागच्छति। सर्वे सावधानाः बभूवुः। रामचन्द्रः कियद्दूरमेव पुष्पकविमानाद् अवतीर्यः पादाभ्यां एव स्वनगरीं प्रविवेश। सहसा तिस्रः मातरः गुरुवशिष्ठश्च तत्रोपस्थिताः आसन्। रामः सर्वप्रथमं महर्षिवशिष्ठं प्रणम्य मातृणां चरणेषु पतितवान्। क्रमशः सीतालक्ष्मणौ च यथायोग्यं प्रणामं चक्रतुः। भरतश्च रामपादुकां भक्त्या रामाय समर्प्य चरणेषु दण्डवत् प्रणामं कृतवान्। रामः तम् उत्थाप्य आलिङ्गनं कृतवान्। मातृणां स्थितिः तु विचित्रा आसीद् यथा वत्सवियुक्तानां धेनूनां वत्सप्राप्त्यनन्तरं जायते।

अयोध्यानगरी पुष्पैः तथालङ्कृता आसीद् येन सर्वत्र पुष्पमयमेव परिलक्ष्यते स्म। अयोध्यामागत्य रामचन्द्रः सर्वप्रथमं मातृणां वन्दनां कृतवान्। ततः विष्णुमन्दिरमागत्य इष्टदेवस्य श्रीरङ्गनाथस्य पूजां कृतवान्। पुनश्च गुरूवशिष्ठस्य अभिनन्दनं चकार। तदानीम् अयोध्यावासिनः पुरुषाः तत्रत्यानार्यश्च तथा उच्छलिताः आसन् येन ते ताश्च वस्त्ररहिता बभूवुः।

रामस्य राज्याभिषेकः

ततश्च सा शुभवेला समागता तत्र यथायोग्यम् ऋषयो ब्राह्मणा वेदज्ञाः मन्त्रिणः ज्ञानिनः सर्वे मिलित्वा पवित्रतीर्थजलेन रामं स्नापितवन्तः। ततश्च वशिष्ठः

रामस्य मस्तके मुकुटं धारयामास । तत्क्षणे इत्थमनुभवो जातः यत् त्रैलोक्यस्य दुःखं गतम् आनन्दः समायातः । त्रैलोक्यं समुज्ज्वलितम् । तत्र हनुमता सिंहासनं धृतम्, अङ्गदेन खड्गः धृतः, भरतः श्वेतच्छत्रं धृतवान् । लक्ष्मणशत्रुघ्नौ चामरं वीज्यमानौ स्तः । इत्थं च रामचन्द्रः भूमिपतिः भूपतिः बभूव । भूमिसुता सद्यः पत्नी सञ्जाता । अत एव दम्पत्योः सुखभोगविलासवैभवादिके रामः संलग्नोऽभूत् । ततश्च वशिष्ठस्याज्ञया यथाविधि त्रयाणामनुजानां मस्तकेषु रत्नकिरीटान् रामः धारयामास स्वयं च विलासे निमग्नो जातः ।

ततश्च रामचन्द्रः हनुमन्तं, अंगदं, जाम्बवन्तं, सुग्रीवं, निषादराजं च कथितवान् यत् ममाज्ञया यूयं स्वस्वस्थानं गत्वा निजकार्यं कुरुत । यद्यपि कथनमिदम् अत्यप्रियम् कठिनं च आसीत् । किन्तु आज्ञामादाय सर्वे यथायोग्यं परिक्रमां कृत्वा प्रणम्य पुष्पकविमानेन अयोध्यातः प्रस्थितवन्तः । तत्कालीनं दृश्यं महत् कारुणिकम् आसीत् ।

रामश्च मातृभिः सहितः सीतासहितः मानवीयलीलां कुर्वन् राज्यशासनं कृतवान् । लौकिकरीतिं च विहितवान् । चतुर्दशभुवनानि च पालितवान् । एवं च रामराज्यं रामराज्यमेव । न तस्य काऽपि तुलना आसीद्, अस्ति, भविष्यति वा ।

एवम् च महामहिमाशालिनः आदिपुरुषस्य रामचन्द्रस्य यः कथां शृणोति, वर्णयति च स नराधिपतिः राजा भवति । तथा च यमराजस्य भयं तस्मै न जायते ।

विशेषः—

(क) अस्मिन् विशिष्टे कम्बरामायणे उत्तरकाण्डं नास्ति न च सीतापरित्यागसदृश- कठोरकथाचर्चाऽपि विद्यते । केवलमग्निपरीक्षापूर्वं लंकायां सीताभर्त्सननाटकं रामेण कृतम् । यस्य वर्णनं सविशेषं तत्र सन्निहितमस्ति ।

(ख) अस्मिन् रामायणे शृंगारभक्तिवीररसानां समन्वयस्त्वद्भुतः इति प्रथममेवोल्लिखितमस्ति ।

(ग) कामिनीकेशपाश-सौन्दर्यवर्णनेन कविरयं पूर्ववर्तिनं संस्कृतकाव्यसहितं समग्र-भारतीयभाषायाः काव्यं पश्चात्कृतवान् ।

Bhavan's Sri Sankaracharya ... Bharatiya Vidya ... Mahavidyalaya

(घ) यत्र तत्र कथाप्रसंगे केशपाशवर्णनं विद्यते। विद्वांसः पाठकास्तत्र तत्र द्रष्टुं शक्ष्यन्ति।

॥ इति कम्बरामायणम् ॥

॥ ग्रन्थश्च समाप्तः ॥

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya Vidya... 631



आचार्य आद्याचरणझा बिहारप्रान्तस्य मधुवनी-मण्डले संस्कृतिवैदुष्ययोः प्रसिद्धतमे मङ्गरौनीग्रामे १९२१तमे ख्रिष्टाब्दे लब्धजन्मा विपश्चितः पितुस्ताराचरणझाशर्मणः पण्डितश्रीनमोनारायणझा-शर्मणश्च पारम्परिकपद्धत्या लब्धव्याकरणविद्यः स्वायत्तीकृतसाहित्यश्च कामेश्वर-सिंहदरभंगासंस्कृत-विश्वविद्यालयस्य प्रतिकुलपति-पदेऽन्येषु च संस्कृतशिक्षासम्बन्धिषु महीयस्सु पदेषु यथावसरं विराजमानोऽनारतं संस्कृतविद्याया अभ्युन्नत्यै संलग्नचेताः विद्वत्सु धवलामक्षुण्णां च कीर्तिं प्रतनुते।

संस्कृतहिन्दीमैथिलीभाषासु शताधिकानां शोधनिबन्धानां प्रणयनमन्तेवासिनामध्यापनं नूतन-ग्रन्थानामध्ययनञ्चास्य जीवनव्रतमिव प्रतिभाति।

कम्बरामायणस्य विशदं व्याख्यानमस्य पाण्डित्यं प्रथयति। विपश्चिदपश्चिमोऽयं लब्धराष्ट्रपति-सम्मानोऽधुना विविधासु भारत-सर्वकारीयसमितिसु साहित्यिकसंस्थासु च परामर्शदातृत्वं केन्द्रीय-संस्कृतमण्डलस्य सदस्यत्वञ्च बिभर्ति।

राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)